**स्वामिनः विवेकानन्दस्य** साहित्यपाटवं प्रसिद्धसाहित्यसमीक्षकैः लेखकैः च महता प्रमाणेन अङ्गीकृतम् अस्ति।लिओ टॉल्स्टॉयः, रोमा-रोलाँ, रवीन्द्रनाथ ठाकुरः इत्येतादृशाः श्रेष्ठचिन्तकलेखकाः तस्य लेखनकौशलं विचारप्रकटनशैलीं च अश्लाघन्त चिन्तकस्य लेखकस्य च रूपेण सः आधुनिकतायाः पारम्परिकतायाः च शोभनं सम्मिश्रणं द्योतयति स्म। तस्य सर्जनात्मकलेखने सः लेखनविषयाणां लेखनशैल्याः च दृष्ट्या नवीनप्रकाराणां योजनाय प्रयत्तवान्।

प्राध्यापकः **निमायिसाधनबोसः** सुख्यातः इतिहासलेखकः शिक्षाविद् च अस्ति। भारते विदेशे च कृताध्ययनः सः विश्वभारती, शान्तिनिकेतन इत्यस्याः संस्थायाः भूतपूर्वः उपकुलपतिः आसीत्। तेन आङ्ग्लभाषया लिखितेषु पुस्तकेषु कतिपयानां नामानि सन्ति -- *ऑन आउटलाइन, द इंडियन अवेकनिंग अॅन्ड बेंगाली* इत्यादीनि।

**डा. सरिता कृष्ण शास्त्री** दर्शनशास्त्रे स्नातकोत्तरोपाधिं सम्पाद्य शिक्षाशास्त्रम् अधीत्य संस्कृताध्यापिकारूपेण कार्यम् अकरोत्।कविकुलगुरुकालिदाससंस्कृत-विश्वविद्यालयात् डाक्टरेट्-उपाधिं प्राप्तवती सा हिन्दी-मराठी-आङ्ग्लादिभाषाणां कथा-उपन्यास-वैचारिक-व्यक्तित्वविकासादिसम्बद्धानां षोडशाधिककृतीनां संस्कृततानुवादं कृतवती अस्ति। प्रकृतं सा संस्कृतभारत्याः कार्यकर्त्री सती संस्कृता-ध्यापन-पठनपाठनसाहित्यनिर्माण-लेखनप्रशिक्षण-ग्रन्थसम्पादनादिषु कार्येषु निरता अस्ति।

ISBN 978-81-260-4532-7

साहित्य अकादेमी

मूल्य : ₹ 50

स्वामी विवेकानन्दः

निमायि साधनः बोसः

भारतीयसाहित्यस्य स्रष्टारः

# स्वामी विवेकानन्दः

## निमायि साधनः बोसः



स्वामी विवेकानन्दः

अन्तरावरणपत्रयोर्मुद्रिते भास्कर्यप्रतिचित्र आलिखितं दृश्यम्-त्रयो ज्यौतिषा नृपतये शुद्धोदनाय बुद्धजनन्या राज्ञ्या मायादेव्या दृष्टस्य स्वप्नस्य तात्पर्यं व्याचक्षते। तदधः कश्चिल्लेखकस्तत् तात्पर्यव्याख्यानं पुस्तमारोपयति। संभाव्यते यदेतदेव भारतवर्षे लिपिकौशलस्य प्राचीनतमं चित्रार्पितं निदर्शनमिति।

नागार्जुनकोण्डातः (क्रैस्तवद्वितीयशताब्दी)।
नवदेहलीस्थ-राष्ट्रीय संग्रहालय-सौजन्यात्।

*भारतीयसाहित्यस्य स्रष्टारः*

# स्वामी विवेकानन्दः

**निमायि साधन बोसः**

संस्कृतानुवादः

**सरिता कृष्ण शास्त्री**

साहित्य अकादेमी

**Swami Vivekanandah** : Sanskrit translation by Sarita Krishna Shashtri of a monograph in Bengali by Nimai Sadhan Bose on modern Bengali writer and social refomer. Sahitya Akademi, New Delhi (2014). ₹ 50

© साहित्य अकादेमी

प्रथम संस्करण : 2014

साहित्य अकादेमी

प्रधान कार्यालय

रवीन्द्र भवन, 35 फ़ीरोज़शाह मार्ग, नई दिल्ली-110 001

विक्रय विभाग, स्वाति, मंदिर मार्ग, नई दिल्ली-110 001

वेबसाइट: www.sahitya-akademi.gov.in

ई-मेल: sahityaakademisale@yahoo.com

क्षेत्रीय कार्यालय

172, मुंबई मराठी ग्रंथ संग्रहालय मार्ग, दादर, मुंबई-400 014

4, डी.एल. ख़ान मार्ग, कोलकाता-700025

सेंट्रल कॉलेज परिसर, डॉ. बी. आर. आंबेडकर वीथी, बेंगलूरु-560 001

चेन्नई कार्यालय

मेन बिल्डिंग, गुना बिल्डिंग्स (द्वितीय तल), 443(304)
अन्ना सालइ, तेनामपेट, चेन्नई-600 018

ISBN 978-81-260-4532-7

मूल्य : पचास रुपए

शब्द संयोजक एवं मुद्रक : विकास कम्प्यूटर एंड प्रिंटर्स, नवीन शाहदरा, दिल्ली-110032

# प्रस्तावना

स्वामिनः विवेकानन्दस्य जीवनस्य बहुमुखसिद्धीनां च वर्णनं परिमितशब्दैः करणम् इत्येतद् आह्वानपूर्णं कार्यम् अस्ति। गतेषु शतवर्षेषु स्वामिनः जीवनस्य विषये, समयस्य विषये, आधुनिकभारतस्य निर्माणाय, भारतीयवाङ्मयाय च तस्य विशिष्टप्रदानाना। विषये च विशदानि तीव्राणि च अनुसन्धानानि जातानि सन्तिं भारते विदेशेषु च तस्य जीवनसम्बद्धाः, क्रियाकलापसम्बद्धाः च नूतनाः प्रश्नाः पृच्छ्यन्ते, नवाविष्काराः च जायन्ते। एतस्मिन् लघुजीवनचरित्रे तस्य प्रमुखप्रमाणभूतजीवनचरित्राणां तथा च तत्सम्बद्धानाम् अनुसन्धानानां निष्कर्षान् समावेशयितुम् अहं प्रायते। अहम् आशासे यत् विवेकानन्दस्य वर्णमयजीवनस्य तथा च राष्ट्रनिर्माणे तस्य भूमिकायाः व्यापकं चित्रं सामान्यवाचकाः प्राप्स्यन्ति इति। अधिकज्ञानवतां कृते अपि कदाचित् एतत् पुस्तकं प्रयोजनवत् स्यात्।

अन्येषां तथा च मम शिक्षकस्य कृष्णपादबानर्जीवर्यस्य अहं गभीरतया अधमर्णः अस्मि यः दक्षतया हस्तलिखितं पठित्वा तस्य सुपरिवर्तनाय अमूल्यसूचनाः अयच्छत्। दुःखस्य विषयः एषः अस्ति यत् एतत्पुस्तकं यदा मुद्रणालये आसीत् तदा सः दिवङ्गतः। यदा अहं विद्यालये पठन् बालः आसं तदा अहं विवेकानन्दस्य विषये यत् प्रथमलेखनम् अकरवं तस्य सम्पादनं सः अकरोत्। तस्य मृत्योः अल्पकालात् पूर्वं वात्सल्यपूर्णया दक्षतया विशदतया च तेन कृतसम्पादनम् अन्तिमपुस्तकम् अस्ति एतत्पुस्तकम्।

—निमायि साधन बोसः

18-2-1994

# अनुक्रमणिका


*प्रस्तावना* 5
पृष्ठभूमिका 9
गुरुः आरम्भः च 14
भारतस्य अन्वेषणम् 21
पश्चिमे लक्ष्यसाधनम् 25
गृहागमनम् 44
पश्चिमं प्रति पुनः गमनम् 51
प्रवासस्य समाप्तिः 61
विवेकानन्दः तस्य साहित्यकृतयः च 67
दृष्टिः लक्ष्यं च 84
राष्ट्रस्य पुनारचनायाः निमित्तम् आह्वानम् 96
उपसंहारः 109
विवेकानन्दस्य लेखनेभ्यः उद्धृतांशाः 112
अन्तिमसत्रे कृतम् उद्बोधनम् 114
राजयोगः 116
युरोपखण्डीयस्य प्रवासस्य स्मरणानि 118
स्वदेशमन्त्रः 120
पूर्वा पश्चिमा च 121
पठनाय चितानां पुस्तकानां सूचिः 123

# पृष्ठभूमिका

विश्वे विद्यमानाभिः सर्वाभिः प्राचीनसभ्यताभिः सर्वदेशानां मनुष्यैः च उन्नत्यवनत्योः अवधयः दृष्टाः सन्ति। केचन अवधयः उन्नतिसफलतयोः आसन्, इतरे च केचन अवनत्यसफलतयोः आसन्। भारतदेशेन अपि एषः ऐतिहासिकानुभवः प्राप्तः एव। नवदशतमस्य शतकस्य भारतेन नूतनस्य कस्यचित् देशस्य निर्माणम् अक्षिसात्कृतम्। मुगलसाम्राज्यस्य विघटनात् परं ब्रिटिशशासनस्य आरम्भकाले कश्चन कालावधिः तादृशः आसीत् यस्मिन् जीवनस्य सर्वेषु क्षेत्रेषु भ्रमः अराजकता अधोगतिः च व्याप्ता आसीत्। ततः परं जीवनस्य चिन्तनस्य च सर्वेषु क्षेत्रेषु प्रगतेः विकासस्य च चिह्नानि दृष्टेः गोचरतां गतानि आसन्। एतस्मिन् समये याः नवकल्पनाः, नवान्दोलनानि, नवशक्तयः च शनैः अभिव्यक्ताः अभवन् तासां दूरगामिनः परिणामान् दृष्ट्वा इतिहासतज्ज्ञाः तं कालखण्डं भारतस्य जागरणकालः अथवा भारतस्य पुनरुत्थानकालः इति निर्दिशन्ति। परिवर्तनस्य लक्षणानि प्रथमं बङ्गाले दृष्टानि इत्यतः सः कालः नवदशतमस्य शतकस्य बङ्गपुनरुत्थानकालः इत्यपि प्रसिद्धः। भारते अन्यस्थानेभ्यः पूर्वं बङ्गप्रदेशे पुनरुत्थानप्रक्रियायाः आरम्भस्य पृष्ठतः बहूनि ऐतिहासिककारणानि आसन्। ततः मुख्यकारणद्वयम् एवम्-आसीत् - प्रथमं तावत् भारते प्रथमतया ब्रिटिशशासनं दृढतया बङ्गाले प्रस्थापितं जातम् इति तथा च द्वितीयं नाम परिवर्तनस्य प्रमुखयन्त्रं नाम आङ्ग्लशिक्षणम् अथवा पाश्चात्त्यशिक्षणम् अपि सर्वप्रथमं बङ्गाले एव आरब्धम् इति। ब्रिटिशशासनस्य पाश्चात्त्यशिक्षणस्य च प्रभावः तथा च भारतस्य प्राचीनसाहित्यसंस्कृतिभ्यां प्राप्ता प्रेरणा इत्याभ्यां सृष्टाः परिणामाः बङ्गप्रदेशे जनैः तीव्रतया अनुभूताः। 1784 इति वर्षे कलकत्तायां सर विलियम जोन्स इत्यनेन आरब्धा एशियाटिक् सोसायटी इति संस्था भारतस्य वैभवपूर्णभूतकालस्य समृद्धपरम्पराणां च पुनरन्वेषणस्य आरम्भकर्त्री प्राचीनतमा संस्था आसीत्। आरम्भे पाश्चात्त्यैः तदनन्तरं च भारतीयैः कृतानां संशोधनानां फलरूपेण भारतस्य प्राचीनवैभवं महदैतिहासिकरिक्थं च यद् एतया संस्थया प्रकाशितं तेन भारतीयानां मनांसि आनन्दमयेन अभिमानेन आत्मविश्वासेन च पूरितानि।

यानि उपेक्षितुं न शक्यन्ते स्म तादृशानि जागरणस्य स्पन्दमानानि लक्षणानि सर्वेषु क्षेत्रेषु व्यक्तानि आसन्। भविष्यत्काले येषां महत्त्वपूर्णप्रभावः दृश्येत तादृशानि परिवर्तनानि शिक्षासमाजधार्मिकसाहित्यक्षेत्रेषु आरब्धानि तथा च विज्ञानकलाक्षेत्रयोः राजनीतिक्षेत्रे च बौद्धिकनवसर्जनमपि आरब्धम्। भारते राष्ट्रियतावादस्य विकासः स्वातन्त्र्यान्दोलनस्य आरम्भः इत्येते अपि नवदशतमस्य शताब्दस्य भारतस्य पुनरुत्थानप्रक्रियायाः फले आस्ताम्। एतस्य शताब्दस्य अपरा काचित् उपलब्धिः आसीत् धर्मसम्बद्धविषयेषु सुपरिवर्तनार्थं क्रियमाणानि आन्दोलनानि। अष्टादशे शतके सामान्यतया हिन्दुधर्मस्य स्थितिः दुरवस्थायाः विनाशोन्मुखतायाः च आसीत्। मूढविश्वासानाम् अर्थहीनरूढीनां च प्राधान्यम् आसीत्। सामान्यजनानाम् अज्ञानस्य आशुप्रत्ययशीलतायाः च उपयोगं पुरोहितवर्गाः स्वेषां भौतिकलाभार्थं कुर्वन्तः आसन्। भारते विद्यमानाः क्रैस्तमतप्रचारकाः भारतीयानां सामाजिकधार्मिकविधीन् पद्धतीः च प्रकाशपथम् आनीय ताः निन्दन्ति स्म। ते भारतीयानां मतान्तरणमपि महत्या शक्त्या उत्साहेन च कुर्वन्ति स्म। तेषाम् आशा आसीत् यत् ब्रिटिशशासनम् आङ्ग्लशिक्षणम् इत्यनयोः कारणेन महासङ्ख्यया भारतीयाः अचिरादेव क्रैस्तमतीयाः भविष्यन्ति इति।

समाजधर्मयोः दुरवस्थायाः क्रैस्तमतप्रचारकाणां क्रियाकलापानां च प्रतीकारप्रक्रिया शनैः आरब्धा। भारतस्य पुनरुत्थानप्रक्रियायाः आरम्भकर्तृरूपेण ख्यातः राजा राममोहनरायः (1774-1833) ब्राह्मसमाजस्य आरम्भम् अकरोत्। वेदाः ये हिन्दुधर्मग्रन्थेषु प्राचीनतमाः पूज्यतमाः च सन्ति तेषु निराकारस्य एकस्य वास्तविकदेवस्य पूजा एव सर्वोत्तमा इति मतं प्रतिपादितम् अस्ति तथा च तदनन्तरकालस्य पुराणकालस्य धर्मस्य भागभूते प्रतिमापूजनं बहुदेवतावादः इत्येते अङ्गे एव हिन्दुधर्मसमाजयोः नाशाय कारणीभूते इत्येतेषां विचाराणां प्रसारः इत्येतदेव ब्राह्मसमाजस्य मुख्यम् उद्देश्यम् आसीत्। ब्राह्मसमाजः एकेश्वरवादे वेदानां निर्दोषत्वे च विश्वसिति स्म। ब्राह्मसमाजस्य महाशक्तिरूपेण विकासः अभवत् तथा च तस्य द्वारा जीवनस्य विविधक्षेत्रेषु अनेकानि प्रगतिशीलानि आन्दोलनानि आरब्धानि। एतेन क्रैस्तमतप्रचारकाणां सशक्तमतान्तरणकार्यस्य अपि सम्यक् विरोधः अभवत्।

क्रैस्तमतप्रचारकैः ब्राह्मसमाजीयैः च तत्कालीनस्य हिन्दुधर्मस्य समाजस्य च यत् निन्दनं क्रियते स्म तेन हिन्दुधर्मसमाजयोः परम्पराणां रक्षणाय पारम्परिकहिन्दुभिः अपि सङ्घटनीयम् अभवत्। बङ्गालस्य प्रभावशालिनः परम्परावादिनः नेतारः अपि शिक्षिताङ्ग्लानां युवकानां विशेषतया हिन्दुकॉलेज इत्यस्य छात्राणां कार्यैः व्याकुलाः आसन्। एते उग्रविचारवन्तः युवकाः 'तरुण बङ्गाल = Young Bengal' इति ख्याताः अभवन्। 'हिन्दुकॉलेज' इत्यत्र (1809-1831) हेन्री-लुईस-विवियन-डेरोझियो इति तेषां यः बुद्धिमान् प्रेरणादायी युवशिक्षकः आसीत् तस्य नाम्ना एतेषां बङ्गयुवकानां 'डेरोझियन्स' इत्यपि अभिधानम् आसीत्। प्रगतिशीलानां, पारम्परिकाणाम्, उग्रमतवादिनां च वैचारिकसङ्घर्षेण



समकालीनः समाजः उद्दीप्तः आलोडितः च अभवत्।

राज्ञः राममोहनरायस्य मृत्योः अनन्तरं ब्राह्मसमाजः कञ्चन कालं यावत् प्रभावहीनः आसीत्। ततः देवेन्द्रनाथटागोरः (1817-1905) यदा तस्य नेतृत्वं स्व्यकरोत् तदा ब्राह्म-आन्दोलनेन नवजीवनं प्राप्तं, नैके प्रतिभावन्तः युवकाः तत्प्रति आकृष्टाः च। देवेन्द्रनाथस्य प्रेरणया आरब्धाभ्यां तत्त्वबोधिनीसभापत्रिकाभ्यां सांस्कृतिकसाहित्यिकक्षेत्राभ्यां महत् प्रदानं कृतम्। किन्तु स्वल्पकालात् परं केशवचन्द्रसेनस्य (1838-1884) नेतृत्वयुक्तः युवब्राह्मसमाजीयानां गणः कश्चन देवेन्द्रनाथस्य समाजसम्बद्धचिन्तनशैलीविषये अतृप्तिम् अन्वभवत्। तयोः मतभेदानां समाधानं नाभवत् अतः 1866 इति वर्षे केशवचन्द्रः ब्राह्मसमाजात् पृथग्भूय नवं किञ्चित् सङ्घटनम् आरभत यस्य नाम आसीत् 'Brahmo Samaj of India'. राममोहनरायेण आरब्धं सङ्घटनम् आदि-ब्राह्मसमाजः इति नाम प्राप्नोत्। केशवचन्द्र सेनः अतिगुणशाली ऊर्जावान् नायकः च आसीत्। सः उत्तमः वक्ता सङ्घटकः चासीत्। सामाजिकपरिवर्तनानां विषये सोऽपि उत्साहवान् आसीत्। भारतस्य अन्यभागेषु विदेशेषु विशेषतया इङ्गलेण्डदेशे (यत्र सः गतवान्) सः प्रसिद्धः अभवत् जनाः तम् इच्छन्ति स्म च। परन्तु यथा सामान्यतया भवति तथैव केशवचन्द्रः अपि युवब्राह्मसमाजीयानां तीव्रचिन्तनशैलीम् अङ्गीकर्तुं कष्टम् अन्वभवत्। केषुचित् धार्मिकसामाजिकविषयेषु केशवचन्द्रस्य अभिप्रायाः नवयुवकानाम् असन्तोषाय अभवन्। केषुचित् विषयेषु तस्य वैयक्तिकनेतृत्वविषये अपि एषः नवगणः प्रश्नान् उपास्थापयत्। एतेन ब्राह्मसमाजे इतोऽपि एकः भेदः उत्पन्नः। 1878 इति वर्षे एतेन असन्तुष्टेन गणेन 'साधारणब्राह्मसमाजः' इत्यस्य स्थापना कृता।

केशवचन्द्रसेनस्य धार्मिककल्पनासु निष्ठासु च अपि महान्ति परिवर्तनानि अभवन् येषां मुख्यं कारणम् आसीत् दक्षिणेश्वरस्थस्य कालीमन्दिरस्य पुरोहितस्य ब्राह्मणस्य श्रीमतः रामकृष्णपरमहंसस्य प्रभावः। केशवचन्द्रः प्रथमवारं रामकृष्णेन सह 1875 तमे वर्षे मार्चमासे अमिलत्। तदा आरभ्य स्वस्य मृत्युपर्यन्तं केशवचन्द्रः बहुधा रामकृष्णेन सह मेलनाय गच्छति स्म अपि च रामचन्द्रपरमहंसः अपि केशवेन मेलनाय आगच्छति स्म। तयोः द्वयोः अपि परस्परम् अतीव आदरभावपूर्णः स्नेहमयः च सम्बन्धः आसीत्। सुलभसमाचार, थेईस्टिक क्वार्टरली इत्यादीनां ब्राह्मसमाजस्य पत्रिकाणां माध्यमेन केशवचन्द्रः एव समाजस्य विशालभागस्य निमित्तं रामकृष्णपरमहंसस्य परिचयम् अकारयत्। 1880 तमे वर्षे केशवचन्द्रः तदीयं नवविधानम् उपस्थापितवान्। नवविधानं सर्वधर्माणां संयोजनं शिक्षयति स्म तथा च प्रतिमापूजनस्य अध्यात्मिकं विश्लेषणमपि ददाति स्म। रामकृष्णस्य प्रभावेण एव केशवचन्द्रस्य धार्मिककल्पनासु निष्ठासु च परिवर्तनम् अभवत् इति बहवः अभिप्रयन्ति।

साधारण ब्राह्मसमाजः इति काचित् महत्त्वपूर्णा प्रगतिशीला शक्तिः आसीत्। एतस्य समाजस्य सदस्याः शिक्षासामाजिकसुपरिवर्तनसाहित्यसंस्कृति-

राजनैतिकान्दोलनादिभ्यः क्षेत्रेभ्यः महत्त्वपूर्णप्रदानानि अकुर्वन्। किन्तु धार्मिकान्दोलनरूपेण ब्राह्मवादस्य सजीवता गतिशीलता च शनैः समाप्ता। तेषां परस्परभेदाः एतदर्थं प्रामुख्येण कारणीभूताः आसन्। एतस्य अपरं कारणं हिन्दुजागरणम् इति आसीत् यस्य द्रष्टा श्रीरामकृष्णः आसीत् प्रतिपादकः च स्वामी विवेकानन्दः।

नवदशतमस्य शतकस्य आरम्भदशकेषु हिन्दूनां पुनरुज्जीवनान्दोलनं किञ्चित् आरब्धम् आसीत्। क्रैस्तमतप्रचारकाणाम्, उग्रमतवादिनां ब्राह्मसमाजीयानां च निन्दया हिन्दुसमाजस्य, तन्नायकानां च जागरणम् अभवत्। एतेन कारणेन हिन्दुधर्मस्य, तदीयपरम्पराणां च हठेन बहुधा तर्कशून्यतया रक्षणाय अनेकासां पारम्परिकहिन्दुसंस्थानां बङ्गाले भारतस्य अन्यभागेषु च आरम्भः अभवत्। हिन्दुजागरणान्दोलनस्य अन्ये बहवः प्रकाराः अन्यानि बहूनि मुखानि च आसन्। केशवचन्द्रस्य प्रेरणया उत्साहेन च 1867 तमे वर्षे महाराष्ट्रे प्रार्थनासमाजः इति सङ्घटनम् आरब्धम्। परन्तु एतस्य अनुयायिनः आत्मनः हिन्दुधर्मात् पृथक् कस्यचित् नवस्य मतस्य अथवा सम्प्रदायस्य अनुयायिनः इति न मन्यन्ते स्म। प्रार्थनासमाजः सामाजिकसुपरिवर्तनस्य कार्यक्रमं प्रावर्तयत् शिक्षणस्य प्रसारम् अकरोत्, पाश्चात्यतर्कवादं भावात्मकदृष्ट्या अपश्यत् च। तस्य सुख्यातनेतृषु अन्यतमः आसीत् महादेव-गोविन्द-रानडे। पञ्जाबे संस्कृतस्य बहुश्रुतः विद्वान् दयानन्दसरस्वती आर्यसमाजस्य स्थापनाम् अकरोत्। 'पुनः वेदान् प्रति गमनम्' इति तस्य नीतिवाक्यम् आसीत्। सः वैदिकादर्शानुसारं हिन्दुसमाजस्य पुनारचनां कर्तुं वाञ्छति स्म। एकेश्वरवादस्य निष्ठावान् प्रतिपादकः सः पौराणिकधर्मम् अनिन्दत्। सः समाजे प्रबलपरिवर्तनानां पक्षे आसीत्। सः 'शुद्धी' इत्यान्दोलनम् आरभत यच्च अहिन्दून् हिन्दुधर्मं प्रत्यानयति स्म। अन्यानि सर्वाणि अपि मतानि असत्यानि इति सः मन्यते स्म। सः सर्वस्याः अपि पाश्चात्यकल्पनायाः दर्शनशास्त्रस्य च प्रतिकूलः आसीत्। उत्तरभारतस्य सामान्यजनेषु तस्य कार्यं सुमहत् यशः प्राप्नोत्। शक्तिहीनस्य हिन्दुधर्मस्य उत्साहवर्धनाय तेन बहु कार्यं कृतम्।

थियोसोफिक-मूव्हमेंट इति सङ्घटनमपि हिन्दुधर्मस्य पुनरुज्जीवनकार्ये संयुक्तम् अभवत्। श्रीमती एच्.पी.बालवाट्स्की तथा च कर्नल एच्.एस्. ऑल्कॉट् अमेरिकादेशे 1875 तमे वर्षे 'Isoteric religious philosophies of the East' इत्यस्य अध्ययनस्य प्रचारार्थम् एतत्सङ्घटनम् आरब्धवन्तौ। तौ भारतम् आगत्य 1886 तमे वर्षे चेन्नैसमीपे 'थियोसोफिक् सोसायटी' इत्यस्याः संस्थायाः आरम्भम् अकुरुताम्। हिन्दुसिद्धान्तानां संस्थानां च पुनरुज्जीवनेन पुनः संस्थापनेन चैव भारतस्य समस्यानां समाधानं भविष्यति इति थियोसोफिसंस्थायाः अनुयायिनां विश्वासः आसीत्। अनन्तरकाले श्रीमती ॲनी बेझण्ट् एतस्याः संस्थायाः कार्यम् अग्रे अनयत्। सा भारतस्य राष्ट्रियान्दोलनस्य दृढसहायिका नेत्री चापि आसीत्। शिक्षणस्य भारतीयमहिलानां च कार्यस्य प्रसारार्थं थियोसोफिक् सोसायटी बहु कार्यम् अकरोत्।



हिन्दुपुनरुत्थानान्दोलनस्य मुख्यः उद्देशः आसीत् - पौराणिकधर्मस्य, सर्वशास्त्राणां, प्राचीनविधिप्रथासंस्काराणां च रक्षणम्। पुनरुत्थानप्रक्रियायाः अनेकविधाः आसन्। हिन्दुपुनरुत्थानस्य कार्यकर्तृषु केचन अतिरूढिवादिनः आसन् ये च मूढविश्वासान्, अपायकारिसामाजिकप्रथाः चापि रक्षितुम् इच्छन्ति स्म। तेषां चिन्तनशैल्यां तर्कसङ्गतेः लेशमात्रमपि नासीत्। अन्ये केचन आसन् येषां चिन्तनशैली अनिश्चिता आसीत्। तेषु परस्परविरुद्धपद्धतयः प्रचलिताः आसन्। अर्थदृष्ट्या अभिव्यक्तिदृष्ट्या च परस्परम् असमानाः हिन्दूनां पुनरुत्थानसम्बद्धाः हिन्दूनां जागरणसम्बद्धाः च विचाराः समकालीने साहित्ये प्रतिबिम्बिताः। तत्कालीने बङ्गसाहित्ये एषः अंशः विशेषस्फुटतया दृश्यते। हिन्दुजागरणस्य प्रमुखेषु अन्यतमः आसीत् बङ्किमचन्द्रः चट्टोपाध्यायः। परन्तु सः हिन्दुपुनरुत्थानस्य सङ्कीर्णविचाराणां पुरस्कर्ता नासीत्। तर्कसङ्गतचिन्तनशैलीवतः तस्य कदापि परम्परासु अन्धतुल्यः स्नेहः नासीत्, न वा कस्यापि अपायपूर्णायाः रूढ्याः अथवा कालबाह्यसामाजिकपद्धतेः विषये आदरभावः वा। नवीनचन्द्रसेनः, हेमचन्द्रबन्दोपाध्यायः भूदेवमुखोपाध्यायः इत्येते तादृशाः केचन सुख्याताः बङ्गलेखकाः कवयः च आसन् येषां कृतिषु हिन्दुजागरणसम्बद्धानां विचाराणां प्रतिबिम्बं दृश्यते स्म। हिन्दुधर्मसंस्कृतिपरम्पराणां विषये आग्रहपूर्णस्य आत्मविश्वासभावस्य विकासाय तस्य शक्तिवर्धनाय च एतैः कृता साहित्यसृष्टिः कारणीभूता आसीत्। राजनैतिकचेतनायाः शैशवावस्थायां विद्यमानस्य राष्ट्राभिमानभावस्य विकासे चापि एतद् प्रतिबिम्बितम्।

नवदशतमस्य शतकस्य उत्तरार्धे यानि महान्ति परिवर्तनानि जायमानानि आसन्, अभिव्यक्तानि अभवन् च तैः समकालीनानि ग्रहणशीलानि युवमनांसि तत्रापि विशेषतया यैः आङ्ग्लशिक्षणं प्राप्तम् आसीत् तानि एतस्य नवबौद्धिकपर्यावरणस्य सम्पर्कं प्राप्नुवन्। स्वामिनः विवेकानन्दस्य पृष्ठभूमिः अपि एषा एव आसीत्। जीवने येषां सम्मुखे बहवः प्रश्नाः, आह्वानानि, विकल्पाः च आसन् तेषु युवसन्तानेषु अन्यतमः आसीत् स्वामिविवेकानन्दः।

# गुरुः आरम्भः च

1863 तमे वर्षे जनवरीमासे द्वादशदिनाङ्के एकस्मिन् धनिके प्रतिष्ठायुते मध्यमवर्गीये बङ्गकुटुम्बे स्वामिनः विवेकानन्दस्य जन्म अभवत्। तस्य पिता विश्वनाथदत्तः कलकत्तायाः उच्चन्यायालये अधिवक्ता आसीत्। तस्य मातुः नाम भुवनेश्वरी देवी इत्यासीत्। नरेन्द्रनाथस्य पितुः चिन्तनरीतिः उदारमतवादिनी आसीत् तथा च तस्य स्वभावः अपि उदारः आसीत्। सम्यक् अधीतवान् सः बायबल्, इस्लामसंस्कृतिः, पर्शियन्साहित्यम् इत्येतेषु ये मानवतावादिविचाराः, तादृशं दर्शनशास्त्रं च आसीत् तेन प्रभावितः आसीत्। सः आङ्ग्लभाषासाहित्यमपि महत्या रुच्या पठति स्म। सः स्वयं नास्तिकः आसीत् तथा च सामाजिकपरम्पराणां भर्त्सनं करोति स्म। विश्वनाथेन बालनरेन्द्रः, अन्यानि अपत्यानि च तादृशे कौटुम्बिकवातावरणे वर्धितानि यस्मिन् सङ्कुचितक्षुद्रमनोभावानां कृते स्वल्पमपि स्थानं नासीत्। विश्वनाथस्य पत्नी भुवनेश्वरी विनयसम्पन्ना, दयालुः, धर्मनिष्ठा च आसीत् तथा च नारीधर्मस्य कौटुम्बिकजीवनस्य च प्राचीनहिन्दुपरम्पराधारिते आदर्शे दृढं विश्वसिति स्म। कौटुम्बिकवातावरणं पितरौ च नरेन्द्रनाथस्य विकासस्य प्रमुखौ घटकौ आस्ताम्। तस्य पितामहः दुर्गाचरणः प्रथमपुत्रस्य जन्मनः अनन्तरं विरक्तः भूत्वा संन्यस्तजीवनम् अयापयत्। बालः नरेन्द्रः अत्यन्तसावधानतया विस्मयेन च मात्रा कथ्यमानाः रामायणमहाभारतयोः कथाः, अन्यपौराणिककथाः च शृणोति स्म। ताभिः कथाभिः, कौटुम्बिकप्रथाभिः च नरेन्द्रस्य हिन्दुदेवेषु गभीरा रुचिः उत्पन्ना। परिव्राजकाणां विषये तस्य मनसि विशिष्टं किञ्चित् आकर्षणम् आसीत्। बाल्यावस्थायाम् अपि सः शिवस्य प्रतिमायाः पुरतः उपविश्य ध्यानं करोति स्म। देवस्य विषये, तं परितः विद्यमाने जगति ये अद्भुतांशाः आसन् तद्विषये च चिन्तने सः बहुधा मग्नः भवति स्म।

नरेन्द्रनाथः स्वल्पं कालं यावत् एकस्मिन् स्थानिके प्राथमिकविद्यालये अध्ययनम् अकरोत्। ततः गृहं प्रति आगच्छतः शिक्षकस्य मार्गदर्शने तस्य अध्ययनं प्राचलत्। तस्य स्मरणशक्तिः अद्भुता आसीत् तथा च मनः जिज्ञासु। बाल्ये एव तस्मिन् नायकत्वगुणाः, धैर्यम्, आत्मविश्वासः च प्रकटिताः आसन्। सप्तमे वयसि नरेन्द्रनाथः उच्चप्राथमिकविद्यालयम् अगच्छत्। अल्पे वयसि एव तस्मिन् असाधारणी बुद्धिमत्ता, असीमोत्साहः, अनेकविधसाहित्यप्रकाराणां पठने रुचिः, आङ्ग्लभाषायां प्रभुत्वं क्रीडादिषु पटुत्वम् इत्यादयः प्रस्फुटिताः आसन्। मल्लयुद्धं, नौकाचालनं, खड्गयुद्धं, पादकन्दुकक्रीडा, अन्ये शारीरकव्यायामाः च तस्य इष्टाः आसन्, सः तान् अभ्यस्यति स्म च। तस्मिन् काचित् आकुलता, ज्ञानस्य नवक्षेत्राणाम् अन्वेषणस्य तीव्रा मनीषा च काचित् आसीत्। कस्यचिदपि विषयस्य स्वयं कृतात् अन्वेषणात् परमेव सः तस्मिन् विश्वसिति स्म। यथा यथा सः ज्येष्ठः अभवत् तथा तथा बौद्धिकानुसन्धानेषु परिकल्पनासु च तस्य गभीरा रुचिः प्रवृद्धा। शास्त्रीयसङ्गीतस्य कलायाः च प्रशंसकः सः स्वयम् उत्कृष्टः सङ्गीतज्ञः अभवत्। तस्य कण्ठे अद्भुतं माधुर्यम् आसीत्।

1879 तमे वर्षे सः माध्यमिकविद्यालयस्य अन्तिमपरीक्षां प्रथमश्रेण्याम् उत्तीर्णवान्। आरम्भे सः कलकत्तायाः प्रसिद्धं प्रेसिडेन्सीमहाविद्यालयम् अगच्छत्, किन्तु अनन्तरं जनरल् असेम्ब्लीज् इंस्टिटयूशन् इत्यस्यां संस्थायाम् अध्ययनम् अकरोत्। प्रेसबायटेरियन् मिशनरी इत्यस्याः प्रसिद्धसंस्थायाः संस्थापकः रेव्ह. अलेक्झाण्डर डफः तस्याः संस्थापकः आसीत्। अनन्तरम् एतस्याः संस्थायाः स्कॉटिश चर्च कॉलेज इति नामपरिवर्तनम् अभवत्। प्रतिभावतः छात्रस्य रूपेण अधुना नरेन्द्रनाथः वेगेन विकासं प्राप्नुवन् आसीत्। सः पाश्चात्त्यतर्कशास्त्र- दर्शनशास्त्र- विज्ञान-इतिहास-मानववंशशास्त्र-भूगोलादीनां विषयाणां तत्सम्बद्धानां च विषयाणां व्यापकम् अध्ययनं कृतवान्। सः युगपदेव भारतस्य अन्येषां प्राच्यदेशानां च इतिहाससंस्कृतिसभ्यतानां प्रकृष्टाध्ययनमपि कृतवान्। तस्य बुद्धिमत्ता ज्ञानस्य अनेकासां शाखानाम् अवगमनस्य स्वाधीनीकरणस्य च क्षमता अतिविशिष्टा आसीत्। महाविद्यालयस्य प्राचार्यः यः आङ्ग्लभाषायाः प्राध्यापकः च आसीत् सः डब्ल्यू. हेस्टीमहोदयः नरेन्द्रस्य विषये अकथयत् - "नरेन्द्रः वस्तुतः धीमान् अस्ति। अहं जगति सुदीर्घं सुविस्तृतं च अटितवान् परन्तु जर्मनविश्वविद्यालयानां दर्शनशास्त्राधीयानेषु छात्रेषु अपि नरेन्द्रम् इव प्रतिभावन्तं क्षमतावन्तं च युवकं न दृष्टवान्। सः अवश्यमेव जीवने बहु साधयिष्यति।" हेस्टीमहोदयः भविष्यत्कथनमेव अकरोत्। तस्मादेव नरेन्द्रः स्वस्य भाविगुरोः विषये अशृणोत्।

पाश्चात्त्यशिक्षणं प्राप्नुवतां धीमतां नवयुवकानां मनः सामान्यतया जिज्ञासु भवति स्म। ब्राह्मसमाजे नरेन्द्रस्य रुचिः उत्पन्ना। ब्राह्मसमाजस्य प्रगतिशीलं सुपरिवर्तनजनकं चारित्र्यं, तस्य उद्देशाः च नरेन्द्राय अरोचन्त। सः साधारणब्राह्मसमाजस्य सदस्यः अभवत्। यद्यपि समाजस्य तर्कसङ्गता चिन्तनशैली अभ्युपगमनपद्धतिः च तस्य एकया दृष्ट्या इष्टे आस्तां तथापि वास्तविका- ध्यात्मिकानुभवप्राप्तेः तस्य अत्युत्कटा इच्छा ब्राह्मसमाजे अन्यत्र वा पूर्णा नाभवदेव। मूलभूतप्रश्नाः तस्य मनः तुदन्ति स्म। धर्मस्य लक्ष्यं किम् अस्ति, देवस्य साक्षात्करणं नाम किं, तद् केनापि कर्तुं शक्यते किम्

इत्यादीन् अंशान् सः ज्ञातुम् इच्छति स्म। यः तं बोधयितुं शक्नुयात् तस्य प्रश्नानां समाधानकारकाणि उत्तराणि दातुं शक्नुयात् तादृशं जनं सः आतुरतया अन्विष्यति स्म। किन्तु एतादृशं कमपि धार्मिकजनं सः न प्राप्तवान्। कस्मिंश्चित् दिने सः ब्राह्मसमाजस्य आदरणीयेन नेत्रा रवीन्द्रनाथठाकुरस्य पित्रा देवेन्द्रनाथठाकुरेण सह अमिलत्। 'महोदय, भवान् देवं दृष्टवान् किम्?' इति तस्य अन्वेषणशीलेन ऋजुना प्रश्नेन आश्चर्यचकितः देवेन्द्रनाथः एतावदेव वक्तुम् अशक्नोत् - 'पुत्र, तव नेत्रे योगिनः नेत्रे स्तः। त्वया ध्यानम् अभ्यसनीयम्' इति। एतेन उत्तरेण नरेन्द्रनाथस्य समाधानं नाभवत्। तेन अन्वेषणम् अग्रे अनुवर्तितम्।

रामचन्द्रदत्तः इत्याख्यः कश्चन नरेन्द्रनाथस्य बन्धुः आसीत्। अध्यात्मिकजीवनविषये नरेन्द्रस्य तीव्रेच्छां ज्ञात्वा सः तम् उक्तवान् - यदि त्वं वास्तविकज्ञानं प्राप्तुम् इच्छसि तर्हि कोलकातायाः समीपस्थस्य दक्षिणेश्वरस्थस्य कालीमन्दिरस्य अर्चकेन रामकृष्णेन मिल। रामकृष्णे अतिभक्तिमत्सु गृहस्थशिष्येषु अन्यतमः आसीत् रामचन्द्रः।

नरेन्द्रनाथेन डब्ल्यू. हेस्टीमहोदयात् रामकृष्णस्य विषये पूर्वमेव श्रुतम् आसीत्। कस्मिंश्चित् दिने सुख्यातस्य आङ्ग्लकवेः विलियम्वर्डस्वर्थस्य विषये भाषमाणः हेस्टीमहोदयः अवदत् - शुचितायाः एकाग्रतायाः च परिणामः भवति धार्मिकपरमानन्दावस्था। आधुनिके जगति एतां स्थितिं प्राप्तवन्तः जनाः कदाचिदेव दृश्यन्ते। ताम् अत्यानन्दावस्थां प्राप्तवन्तमेकमेव यं जनम् अहं जानामि सः अस्ति दक्षिणेश्वरस्य रामकृष्णः। यदि भवन्तः तेन महापुरुषेण मिलन्ति तर्हि उत्कटभावसमाधिं ज्ञास्यन्ति। एतत्सर्वं ज्ञात्वा अपि नरेन्द्रनाथः दक्षिणेश्वरं गन्तुम् अनिच्छुकः आसीत् यतः यस्य मनः तर्कसङ्गतचिन्तनशीलम् आसीत् अपि च यः सुशिक्षितः नवयुवकः आसीत् तस्य नरेन्द्रस्य दृष्ट्या रामकृष्णः नाम कश्चन अशिक्षितः अर्चकः केवलः आसीत्। एतादृशः कश्चन मनुष्यः कथं तस्य प्रश्नानाम् उत्तराणि उक्त्वा तस्य अध्यात्मिकावश्यकतानां समाधानं करिष्यति? किन्तु अचिरादेव तयोः मेलनस्य अवसरः उत्पन्नः। 1881 तमे वर्षे नोव्हेम्बरमासे सुरेन्द्रनाथमित्रः इति रामकृष्णस्य भक्तः नरेन्द्रनाथं भक्तिगीतानि गातुं स्वगृहं प्रति आहूतवान्। तत्र रामकृष्णः अपि उपस्थितः आसीत् अपि च सः नरेन्द्रनाथस्य सुश्राव्यगीतानि अतीवावधानेन अशृणोत्। नरेन्द्रनाथस्य पवित्रतया भावपूर्णतया च रामकृष्णः प्रभावितः। अतीवस्नेहेन सः नरेन्द्रं दक्षिणेश्वरं प्रति आहूतवान्। एतदेव तयोः द्वयोः प्रथमम् ऐतिहासिकं भविष्यतः दृष्ट्या महत्त्वपूर्णं मेलनम् आसीत्। नरेन्द्रनाथः रामकृष्णं 'न' इति वक्तुं न अशक्नोत्। किन्तु रामकृष्णः एव सः जनः अस्ति यं सः आतुरतया अन्विष्यन् अस्ति इति विश्वासम् अननुभवन् नरेन्द्रनाथः तदा अपि रामकृष्णेन सह मेलनाय अनुत्सुकः आसीत्।

नरेन्द्रनाथस्य मनसि रामकृष्णस्य विषये संशयः आसीत् किन्तु रामकृष्णः सपदि



एव तं जनम् अभिज्ञातवान् यं सः सम्पूर्णजगति स्वसन्देशं प्रसारयितुम् अधीरतया प्रतीक्षमाणः आसीत्। सर्वमतानि सत्यनिष्ठानि सन्ति, प्रत्येकं मतं परमसत्यस्य अखण्डितस्य शाश्वतास्तित्वस्य ज्ञानस्य आनन्दस्य च किञ्चन मुखं साग्रहं प्रतिपादयति इति तेन साक्षात्कृतम् आसीत्। स्नेहस्य त्यागस्य मतैक्यस्य च सन्देशः आसीत् तस्य। नैकानि वर्षाणि यावत् कृतात् अध्यात्मिकगवेषणात् परं विविधमतानां यथार्थतायाः ज्ञानात् परं रामकृष्णेन अन्तिमसत्यं साक्षात्कृतम् आसीत्। तस्य विशिष्टया अनुकर्तुम् अशक्यया शैल्या सः तद् एवं प्रत्यपादयत् - "मया एवं ज्ञातं यत् सर्वेऽपि समानस्य भगवतः दिशायां पदानि निक्षिपन्ति किन्तु विभिन्नैः मार्गैः।" एतं विचारं स्पष्टीकर्तुं सः जलस्य निमित्तं विभिन्नभाषाणां शब्दान् उदाहरति स्म। सः वदति स्म - "विभिन्ननामभिः जनैः अन्विष्यमाणः पदार्थः तु समानः एव अस्ति। सर्वे तमेव पदार्थम् अन्विष्यन्ति। वातावरणस्वभावनामसु केवलेषु भेदः भवति। प्रत्येकं जनः स्वेच्छया चितं मार्गम् अनुसरतु। यदि सः सरलतया उत्साहेन च देवं ज्ञातुम् इच्छति तर्हि सः शान्तिम् अवाप्नोतु। सः निश्चयेन देवं साक्षात्करिष्यति एव।" कोलकातायां विद्यमानस्य जानबझार इति स्थानस्य राज्ञ्या राशमण्या दक्षिणेश्वरे निर्मिते मन्दिरे रामकृष्णः दिव्यमातरं कालीं यां सः भवतारिण्याः रूपेण भजते स्म तामेव सः स्वस्य सजीवां मातरं तथा च सकलविश्वस्य चापि मातरं मन्यते स्म। गङ्गानद्याः तटे विद्यमाने तस्य एव मन्दिरस्य प्राकारे कृष्णशिवयोः अपि प्रतिमे आस्तां ये च शाक्तवैष्णवशैवसिद्धान्तानाम् ऐक्यं प्रतिपादयतः स्म। रामकृष्णः तादृशान् पवित्रात्मनः नवयुवकान् काङ्क्षति स्म ये देवस्य साक्षात्कारार्थं दुःखिनां सेवार्थं च सर्वस्य अपि परित्यागार्थं तत्रापि विशेषतया शारीरकसुखानां सम्पदः च त्यागार्थं सज्जाः आसन्। युवकः नरेन्द्रः एव सः मनुष्यः अस्ति यः रामकृष्णस्य दिव्यलक्ष्यं पूर्णतां प्रति नेष्यति तथा च दिव्यभावनया परिपूर्णानां युवकानां गणस्य, देशे विदेशेषु अगणितानां जनानां च नायकत्वं निर्वक्ष्यति इति रामकृष्णस्य अवगमनं साकल्येन दोषरहितम् आसीत्। यः विश्वगुरुः भविष्यति सः शिष्यः गुरुणा प्राप्तः आसीत्।

किन्तु नरेन्द्रनाथः रामकृष्णेन सह प्रथममेलनेन अतिप्रभावितः नासीत्। तस्य तार्किकं मनः तु रामकृष्णस्य अत्युत्साहं, तस्य विषये स्नेहप्रदर्शनं च अवगन्तुं कष्टमेव अन्वभवत्। रामकृष्णस्य आग्रहवशात् दक्षिणेश्वरं प्रति गमनं तेन अङ्गीकृतम् आसीत् चेदपि हृदयेन तादृशीं कामपि इच्छां सः न अन्वभवत्। अन्ते स्वल्पकालात् परं सः तत्र अगच्छत्। रामकृष्णः अत्यन्तोत्साहेन तस्मै स्वागतं व्याहरत्। निश्चितधीः नरेन्द्रः तं साक्षात् एव अपृच्छत् - "महोदय, भवान् देवं दृष्टवान् किम्?" झटिति एव तेन उत्तरमपि प्राप्तम् - "आम्, यथा अहं त्वाम् अत्र पश्यामि तथैव तमपि पश्यामि, किन्तु इतोऽपि अधिकतीव्रभावनया। देवः साक्षात्कर्तुं शक्यः। यथा अहं त्वां द्रष्टुं शक्नोमि त्वया सह वक्तुं शक्नोमि च तथैव देवेन सह अपि कर्तुं शक्नोमि, किन्तु कः तद्

वाञ्छति? जनाः पत्नीपुत्रादीनां कृते, ऐश्वर्यस्य कृते अश्रूणां नदीः एव प्रवाहयन्ति, किन्तु देवस्य कृते कः करोति एतत्सर्वम्? यदि कश्चन सरलतया तस्य निमित्तं रोदिति, तर्हि सः निश्चयेन आविर्भवति। नरेन्द्रनाथः अतिप्रभावितः। एतावत्पर्यन्तं केनापि एतादृश्या ऋजुतया, स्पष्टतया, सनिश्चयं च तस्य प्रश्नस्य उत्तरं न उक्तम् आसीत्। नरेन्द्रस्य संशयाः साकल्येन न लुप्ताः किन्तु तेन अनुभूतं यत् एषः कश्चन तादृशः जनः अस्ति यः गभीरस्वानुभवस्य बलेन वदति। एषः पवित्रतमः, वास्तविकः सत्पुरुषः च अस्ति इत्यतः एव समग्रमानवजात्या श्रद्धेयः अस्ति।"

एतदनन्तरं नरेन्द्रनाथः मध्ये मध्ये दक्षिणेश्वरम् अगच्छत्। ततः अनुभवपरीक्षणयोः मालिकायाः परं नरेन्द्रनाथः रामकृष्णं गुरुरूपेण स्व्यकरोत्। आपाततया गुरुः तस्य प्रियतमशिष्यः च पृथिव्याः विपरीतध्रुवौ इव आस्ताम्। सामान्यतया 'निरक्षरः' इति पदेन यः अर्थः जनैः बुध्यते तन्नाम अक्षरज्ञानरहितः इति कथयितुम् अर्हः रामकृष्णः आसीत् अपि च नरेन्द्रनाथः आङ्ग्लशिक्षां प्राप्य 1894 तमे वर्षे कोलकाताविश्वविद्यालयस्य B.A परीक्षाम् उत्तीर्णवान्। ज्ञानस्य अनेकशाखानां ग्रन्थाः तेन पठिताः आसन्। रामकृष्णः भारतस्य संस्कृतेः अध्यात्मपरम्पराणां च शुद्धप्रतीकभूतः आसीत्। नरेन्द्रस्तु यथार्थतया आधुनिकजगतः प्रतिनिधिरूपेण तर्कसङ्गतचिन्तनरीतिवान् आसीत्, भौतिकजगत् गभीररुच्या जिज्ञासुदृष्ट्या च अवलोकते स्म। रामकृष्णः माधुर्यस्य, शालीनतायाः, रमणीयतायाः, सर्वेषां विषये स्नेहभावस्य च मूर्तिमत्स्वरूपम् आसीत्। तस्य विरोधकानां निन्दकानां च निमित्तम् अपि सः स्नेहं सौजन्यं चैव अनुभवति स्म। एतद्विरुद्धं नरेन्द्रनाथः तदा ईषद् अधीरः, अशान्तः, व्यर्थनिन्दां, सङ्कुचितभावम्, अनुचिताचरणं च सोढुम् अशक्तः च जनः आसीत्। एवं सत्यपि रामकृष्णस्य सान्निध्ये यापितैः पञ्चभिः वर्षैः (1881-1886) शनैः युवकस्य नरेन्द्रस्य भविष्यतः विवेकानन्दे परिवर्तनं कृतम्। नरेन्द्रनाथस्य, तत्समकालीनस्य समर्पितचित्तस्य लघुशिष्यगणस्य एकस्य च पवित्रहृदयवत्सु, स्नेहशीलेषु, वैराग्यवत्सु, तीव्राध्यात्मभावपूर्णेषु जनेषु जातं परिवर्तनं गुरुः दक्षतया अपश्यत्। तेषु प्रत्येकं जनस्य स्वशैल्या जायमानं विकासम् अनुमन्यमानः रामकृष्णः तत्समकाले तेषां मित्ररूपेण, दार्शनिकरूपेण, मार्गदर्शकरूपेण च कार्यम् अकरोत्। नरेन्द्रनाथस्य व्यक्तित्वं परिवर्तयितुं रामकृष्णः न कदापि प्रायतत। नरेन्द्रः तर्काधिष्ठितं चिन्तनं त्यजतु अथवा प्रश्नं विना रामकृष्णं तस्य कथनानि वा अङ्गीकरोतु इति रामकृष्णः तं कदापि न अवदत्। परन्तु लोहस्य संयमनं प्रतिदिनमेव भवति स्म। शिष्यस्य प्रचण्डान्तरिकक्षमतानाम् उद्घाटनं, दिव्यत्वस्य प्रकटनम्, अग्रे करिष्यमाणस्य कार्यस्य निमित्तं सज्जीकरणं च अखण्डं प्राचलत्।

1884 तमे वर्षे नरेन्द्रनाथस्य पिता अकस्मात् दिवङ्गतः। सः तस्मिन् समये B.A परीक्षार्थं सज्जतां करोति स्म। बहूनां निर्धनानां, बहुविधकार्याणां च अर्थसाहाय्यं कुर्वता तस्य पित्रा अल्पस्य अपेक्षया अधिकः धनव्ययः कृतः। तस्य मृत्योः अनन्तरं



तत्कुटुम्बम् आर्थिकसङ्कटेन ग्रस्तम् अभवत्। दिने द्विवारं भोजनं कर्तुमपि तेषां धनं नासीत्। असहायः नरेन्द्रनाथः आजीविकान्वेषणम् अकरोत्, किन्तु सफलः नाभवत्। यस्मिन् विधवामाता, भ्रातरौ भगिन्यौ च आस्तां तत् क्षुधाग्रस्तं कुटुम्बं पश्यतः आशाहीनस्य गभीरचिन्ताग्रस्तस्य नरेन्द्रस्य मनसि स्नेहशीलः दयालुः कश्चन देवः विद्यते अपि वा इति गहनः संशयः उत्पन्नः। दुःखितायाः पुण्यवत्याः अतीवधर्मनिष्ठावत्याः तस्य मातुः अपि देवे श्रद्धा हीयमाणा अस्ति इति भासते स्म। नरेन्द्रनाथस्य अन्तरङ्गे गभीरसङ्घर्षः प्रचलति स्म। सुदीर्घावकाशात् परं सः रामकृष्णस्य समीपम् अगच्छत्। तं दृष्टवान् गुरुः अत्यन्तप्रमुदितः। अश्रुधारां स्रावयन् सः नरेन्द्रनाथम् अवदत् - 'त्वं जगदम्बायाः कार्यार्थं जातः असि इति तथा च संन्यासी भविष्यसि इति अहं जानामि। परन्तु यावदहं जीवामि तावत्पर्यन्तं मम निमित्तं वा त्वम् अस्मिन् लोके तिष्ठ।" युवा नरेन्द्रः आत्मानम् अनुगृहीतं प्राप्तसान्त्वनं च अन्वभवत्। अचिरादेव सः तात्कालिकाजीविकां काञ्चित् प्राप्नोत् यया तस्य कुटुम्बस्य उपवासात् रक्षणम् अभवत्।

ततः किञ्चित्कालात्परं रामकृष्णः कस्मिंश्चित् सायङ्काले नरेन्द्रनाथं जगदम्बायाः मन्दिरं गत्वा स्वकुटुम्बस्य दारिद्र्यनिवारणं कर्तुं मातरं प्रार्थय इत्यसूचयत्। जगदम्बा तव इच्छां पूरयिष्यति इति रामकृष्णः नरेन्द्रनाथं समाश्वासयत्। नरेन्द्रनाथः मन्दिरं गत्वा दिव्यमातुः प्रार्थनाम् अकरोत्, किन्तु सः तां विवेकं, वैराग्यं, ज्ञानं, भक्तिं चैव प्रष्टुम् अशक्नोत्। गुरुणा साग्रहं प्रेषितः नरेन्द्रनाथः तदनन्तरं स्वकुटुम्बस्य निर्धनतां कष्टानि च निवारयितुं मातरं प्रार्थये एव इति निश्चयेन द्विवारं मन्दिरं गतः, किन्तु एतादृशान् क्षुद्रान् वैयक्तिकभौतिकलाभान् सः मातरं प्रष्टुं न अशक्नोत् एव। पूर्वं यद् प्रार्थितं तदेव तेन पुनरपि प्रार्थितम्। पूर्णवैराग्याय रामकृष्णस्य कल्पनां साकारीकर्तुं च नरेन्द्रनाथः अधुना सज्जः जायमानः अस्ति इति द्रष्टुं समर्थः रामकृष्णः सुप्रसन्नः अभवत्।तव कुटुम्बस्य सामान्याः आवश्यकताः पूर्णाः भविष्यन्ति इति उक्त्वा सः नरेन्द्रं समाश्वासितवान्। स्वामिनः विवेकानन्दस्य जीवने एषा घटना एषः अनुभवः च अत्यन्तमहत्त्वपूर्णः आसीत्।

गुरोः मार्गदर्शनानुसारं प्रशिक्षणम् अधुना अधिकतीव्रतया प्राचलत्। श्रीरामकृष्णः अधुना नरेन्द्रनाथम्, अन्यशिष्यान् च यथार्थाध्यात्मिकजीवनं, तादृशस्य जीवनस्य गहनमुखानि च अवगमयन् आसीत्। सः तान् भगवत्साक्षात्कारस्य मार्गं प्रदर्शयन् आसीत्। स्वजीवनस्य द्वारा, अनुज्ञाभिः च रामकृष्णः तान् प्रादर्शयत् यत् ज्ञानिना (विवेकवता), भक्तेन (भक्तियुता), विभिन्नाकृतिषु विश्वसता (साकारे), आकृतिरहिते देवे विश्वसता (निराकारे) च देवः साक्षात्कर्तुं शक्यः। धर्मस्य वास्तविकं लक्ष्यम् अन्यमतानाम् अङ्गीकारमात्रं न अपि तु तानि अङ्गीकृत्य तेषाम् आत्मसात्करणम् इति अस्ति। प्रार्थनायाः विविधप्रकाराः देवस्य तु इष्टाः एव। मनुष्येण कृताः सर्वप्रार्थनाः तस्य समानतया इष्टाः अनुमताः च भवन्ति। यथार्थाध्यात्मसाक्षात्कारस्य मुख्याः

पूर्वावश्यकताः सन्ति - वैराग्यं, स्नेहः, श्रद्धा, भक्तिः, शुचिता च। दुःखे विद्यमानायाः मानवजातेः विचारेण रामकृष्णः कष्टम् अनुभवति स्म। एकदा विवेकानन्दः रामकृष्णस्य वचनम् अशृणोत् - जीवः एव शिवः अस्ति। अतः तस्य विषये करुणां प्रदर्शयितुं कस्य वा धैर्यम्? करुणा न, सेवा। सेवा। नरसेवा एव नारायणसेवा इति मन्तव्या। यदा विवेकानन्दः रामकृष्णं निर्विकल्पसमाधेः मार्गं प्रदर्शयितुं प्रार्थयत तदा सः तम् अतर्जयत्। देवस्य वैयक्तिकसाक्षात्कारः, वैयक्तिकमुक्तिः च इत्येतद् जीवनस्य महत्तमं लक्ष्यमिति न चिन्तनीयमिति रामकृष्णः विवेकानन्दम् अकथयत्। ये भगवतः सजीवरूपं सन्ति तेषां मानवानां सेवायै मम प्रियतमशिष्यः आत्मानं समर्पयेत् इति रामकृष्णः ऐच्छत्। एतेन विचारेण विवेकानन्दे गभीरः प्रभावः जनितः, सः प्रेरितः च जातः। समग्रजीवने विवेकानन्दः एतं सन्देशं कदापि न व्यस्मरत्। अग्रे रामकृष्णमिशन् इत्यस्य स्थापनायै तेन इतः एव प्रेरणा प्राप्ता।

1885 तमस्य वर्षस्य मध्यभागे रामकृष्णे कण्ठार्बुदरोगस्य चिह्नानि प्रकटितानि। तस्य आरोग्यं शनैः ह्रीयमाणम् आसीत् किन्तु तस्य प्रवचनानि न स्थगितानि। वैद्यकीयसूचनाः अपालयन् एव सः जनैः सह मिलति स्म, तान् सान्त्वयति स्म, स्वसन्देशं बोधयति स्म च। तस्य पत्नी शारदादेवी यां सः शक्तेः मूर्तरूपं मत्वा पूजयति स्म सा तथा च तस्य शिष्याः अवगतवन्तः यत् गुरुः अचिरादेव मर्त्यशरीरं त्यक्षति इति। नरेन्द्रनाथः तस्य गुरुबन्धवः च गुरोः शुश्रूषां कुर्वन्ति स्म तथा च ध्यानेन, अध्ययनेन, भक्तिमयसङ्गीतेन, अध्यात्मचर्चया च कालं नयन्ति स्म। मम युवशिष्याः त्वया अवधातव्याः इति रामकृष्णः नरेन्द्रनाथम् असूचयत्। सः अकथयत् - 'तेषु तीव्रस्नेहः भवतु तथा च मम मृत्योः अनन्तरम् अपि ते अध्यात्माभ्यासं कुर्युः, गृहं न गच्छेयुः।" अनेकेभ्यः युवशिष्येभ्यः सः संन्यासदीक्षाम् अयच्छत्। नरेन् जगत् बोधयिष्यति इति सः भविष्यत्कथनम् अकरोत्।' गुरोः भविष्यतः वियोगस्य विचारेण युवकाः दुःखिताः आसन्। नरेन्द्रनाथस्य मार्गदर्शने ते अधुना ध्याने, प्राच्यपाश्चात्त्यदर्शनशास्त्रयोः अध्ययने बुद्धयेशुशङ्कराचार्यरामानुजश्रीचैतन्या- दीनां सत्पुरुषाणाम् उपदेशानाम् अध्ययने च आत्मनः अधिकतया प्रवर्तितवन्तः। स्वस्य मृत्योः स्वल्पकालात् पूर्वं रामकृष्णः नरेनं स्वशय्यासमीपम् आहूतवान् गहनध्यानमग्नः अभवत् च। विद्युतः अतिशक्तिमान् कश्चन तरङ्गः इव प्रचण्डः किन्तु सूक्ष्मः तरङ्गः कश्चन मां प्रविशति इति नरेन्द्रः अन्वभवत्। किञ्चिदनन्तरं भौतिकलोकं प्रत्यागतः प्राप्तसंवेदनः रामकृष्णः अतीवकोमलतया नरेनम् अवदत् - 'मम समीपे यद् यदासीत् तत्सर्वम् अद्य अहं तुभ्यम् अयच्छम्। अधुना अहम् अकिञ्चनः भिक्षुकः केवलः अस्मि। मया याः शक्तयः त्वयि सम्प्रेषिताः सन्ति ताभिः त्वम् अस्मिन् लोके महत्साधयिष्यसि तथा च तदनन्तरमेव यस्मात् त्वम् आगतः तत् स्रोतः प्रतिगमिष्यसि।"

16-8-1886 इति दिनाङ्के तस्य इहयात्रा समाप्ता।



# भारतस्य अन्वेषणम्

श्रीरामकृष्णस्य मृत्योः अनन्तरं तस्य शिष्याः खेदम् एकाकित्वं च अन्वभवन् परन्तु तस्य आत्मा सदैव तैः सह अस्ति इति ते जानन्ति स्म। तस्य शरीरस्य अन्तेन सह तस्य कार्यस्य अन्तः नाभवत्। सर्वाधिककष्टमयेषु दिनेषु नरेन्द्रः तं गणम् एकत्र रक्षन् अग्रे अनयत्। अन्नवस्त्राश्रयादीनाम् आत्यन्तिकाभावः तैः सोढव्यः अभवत्। किन्तु गणरूपेण तेषाम् आत्मविश्वासः अत्यधिकः आसीत् रामकृष्णे तस्योपदेशेषु च तेषां श्रद्धा अविचला आसीत्। गुरुः एव तेभ्यः काषायवस्त्रं दत्त्वा संन्यस्तजीवनम् आचरितुम् आज्ञप्तवान् आसीत्। सः सङ्कटकालः तैः महता धैर्येण सम्मुखीकृतः। ततः वर्षात् परं वराहनगरे (कोलकातादक्षिणेश्वरयोः मध्ये) तैः एकं गृहं भाटकेन स्वीकृतम्। तद् वासं कर्तुम् अनर्हम् इव अतीवदुरवस्थायां विद्यमानं गृहं किञ्चन आसीत्। भविष्यतः रामकृष्णशाखायाः प्रथमः मुख्यालयः आसीत् सः। ततः कतिपयवर्षाणाम् अनन्तरं मुख्यालयः आलमबझारं (दक्षिणेश्वरस्य समीपे) प्रति नीतः। अन्ते यः इदानीं मुख्यालयः अस्ति तत्र हावरायां बेलूरमठः इति स्थाने 1898 तमे वर्षे विधिवत् स्थायिमठस्य स्थापना अभवत्। 1887 तमे वर्षे जनवरीमासे रामकृष्णेन चिताः शिष्याः धार्मिकविधिभिः संन्यासं स्वीकृतवन्तः। रामकृष्णशिष्याणां बन्धुगणस्य एतस्य सर्जनम् इत्येतद् प्रामुख्येण नरेन्द्रनाथस्य एव कार्यम् आसीत्। प्रत्येकस्मै शिष्याय संन्यासाश्रमस्य नाम नरेन्द्रनाथेन दत्तम्। तेन स्वस्मै विविदिषानन्दः इति नाम स्वीकृतं, किन्तु विरलतया एव तेन तदुपयुक्तम्। अग्रे तेन द्विवारं नामपरिवर्तनं कृतम् - प्रथमं विवेकानन्दः इति ततः च सच्चिदानन्दः इति। अन्ते 1893 तमे वर्षे मेमासे पश्चिमं प्रति प्रस्थानात् पूर्वदिने प्रायः 'खेत्री' इति स्थानस्य महाराजस्य प्रार्थनानुगुणं सः विवेकानन्दः इति नाम स्व्यकरोत्। एतेन एव नाम्ना सः जगति ख्यातः अभवत्।

अटन् संन्यासी प्रवहत् जलं च कदापि दूषितं न भवति इति काचित् लोकोक्तिः अस्ति। आसक्तिं विना स्थानात् स्थानं प्रति यात्राकरणं तु हिन्दुसंन्यासिनः इष्टमेव। अशान्ततायाः कश्चन भावः नरेन्द्रनाथे सदैव आसीत्। अधुना तीर्थयात्रां कर्तुं मनीषा

तस्मिन् उत्पन्ना। मठेन सह, गुरुबन्धुभिः सह च भावबन्धनं नाम काचित् शृङ्खला अस्ति इति भयं तस्य उत्पन्नम्। भगवत्साक्षात्कारस्य तस्य प्रयासे एषः कश्चन अवरोधः इति तेन अनुभूयते स्म। अन्यदपि कारणं किञ्चन आसीत्। सः देशं द्रष्टुम् आकुलः आसीत्। मातृभूमिं, तस्याः कोटिशः निवासिनः, तेषां कष्टानि, भारतस्य सनातनपरम्पराः संस्कृतिं च सः ज्ञातुम् इच्छति स्म। सा मनीषा बलवती आसीत्। विविधतीर्थस्थलानां लघुयात्राभिः आरभ्य अग्रे 1890 तमे वर्षे जुलैमासे विवेकानन्दः समग्रभारते सुदीर्घयात्रार्थं प्रातिष्ठत। सः कदाचित् रेलयानेन कदाचिच्च पादाभ्याम् अटति स्म। परिव्राजकरूपेण (अटतः संन्यासिनः रूपेण) प्राप्तैः अनुभवैः तस्य जीवने ध्येये च महान्तः दूरगामिनः परिणामाः सृष्टाः।

भ्रमणारम्भात् पूर्वं विवेकानन्दः अकथयत् - "यदा अहम् अत्र प्रत्यागमिष्यामि तदा समाजे विस्फोटकरूपेण स्फोटितः भविष्यामि।" भविष्यवाणी एव आसन् ते शब्दाः। भगिनी निवेदिता स्वामिनः विवेकानन्दस्य विकासे प्रभावजनकान् त्रीन् मुख्यान् अंशान् उल्लिखति - आङ्ग्लभाषायाः संस्कृतभाषायाः च वाङ्मयस्य तस्य अध्ययनं, तस्य गुरुः श्रीरामकृष्णः, तस्य मातृभूमिः तत्प्रजाजनाः च। तृतीयः अंशः परिव्राजकरूपेण प्राप्तानाम् अनुभवानां परिणामः आसीत्। तदा सः कश्चन अत्यन्त- युवा अख्यातः च संन्यासी आसीत्। परिव्राजकसंन्यासिनः तस्य समीपे दण्डं पात्रमेकं च विहाय अन्यत् किमपि नासीत्। वैद्यनाथधाम, वाराणसी, अयोध्या, आग्रा, लखनौ, राजपुताना, गुजरात, मुम्बयी, मैसुरु, त्रावणकोर, मद्रास इत्येतानि स्थानानि तथा च अन्यानि दुर्गमानि अनेकानि स्थानानि तेन गतानि। सत्पुरुषैः सह मेलनेन, अनेकमतानां प्रमुखैः सह मेलनेन च सः ज्ञानवर्धनम् अकरोत्। त्रैलङ्गस्वामी पवहारीबाबा च तेषु अन्यतमौ आस्ताम्। अलाहाबादे केनचित् मुस्लिमसत्पुरुषेण सह मिलितवान् स्वामी अलिखत् - 'तस्य एकैकापि रेखा एकैकं च वलयं सः परमहंसः अस्ति इति प्रदर्शयति स्म।' उत्तरभारतस्य हिमालयप्रदेशेषु पर्वते विद्यमानगुहासु तेन ध्यानमग्नतया अनेकानि दिनानि यापितानि। परन्तु प्रतिवारं यदा सः समाधेः अत्युन्नतावस्थायाः (ब्रह्मैक्यावस्थायाः) समीपं प्राप्नोति स्म तदा एव तव वैयक्तिकमुक्तेः समयः इतोऽपि दूरे अस्ति इति स्मारयन्ती काचित् दिव्यशक्तिः तं गुहायाः बहिः क्षिपति स्म इति सः अनुभूतवान्। मुक्तेः समयः इतोऽपि नागतः आसीत्। जगति तेन इतोऽपि बहु कार्यं करणीयम् अवशिष्टम् आसीत्।

भ्रमणकाले विवेकानन्दः विविधमतानाम् अनुयायिभिः सह अमिलत्। अनेकसम्प्रदायानां तीर्थक्षेत्राणि पश्यन् सः हिन्दुधर्मस्य अन्यमतानां च ग्रन्थान् वाङ्मयं च गाम्भीर्येण अपठत्। भारतस्य ग्रामेषु वसतां जनानां दुःस्थितिं दृष्टवान् विवेकानन्दः अतीवविचलितः। जनानाम् अज्ञानम्, मूढविश्वासान्, दारिद्र्यं, बुभुक्षां, वर्णभेदं, सामाजिकान्यायं, धनिकानां द्वारा निर्धनानां शोषणम्, उच्चवर्गीयैः साधनसम्पन्नैः निर्धनैः



सह क्रियमाणम् अमानवीयम् आचरणं च दृष्ट्वा सः महत्कष्टम् अनुभूतवान्। सः बहुभिः बुद्धिसम्पन्नैः, आजीविकावद्भिः, उन्नताधिकारिभिः, स्थानीयराजकुमारैः च सह अपि अमिलत्। सामान्यजनानां सम्बन्धे तेषां व्यवहारशैलीं दृष्टवतः, मानवीयकष्टानां विषये दयाहीनम् उपेक्षाभावं च दृष्टवतः तस्य महान् आघातः सञ्जातः। एतस्य सर्वस्य अपवादभूताः केचन सज्जनाः अपि आसन्। तेषु केचन तस्मै प्रेम्णा स्वागतम् उक्तवन्तः। भारतस्य पुनरुत्थानविषये तस्य कल्पनां दृष्टिं च अङ्गीकर्तुं ते अनुकूलाः आसन्। मैसुरोः महाराजः, खेत्र्याः महाराजः, मद्रासनगरस्य केचन उत्साहिन नवयुवकाः च तेषु निर्देशार्हाः सन्ति। परिव्राजकसंन्यासिनः रूपेण भारतस्य पुनरन्वेषणेन सहैव वास्तविकः भारतदेशः इति निर्देष्टुम् अर्हाणां कोटिशः असहायानां भारतीयानां पाकशालानां हृदयानां च प्रवेशः विवेकानन्देन कृतः। स्वामी भारतमातरं दृष्टवान्। तस्य दृष्ट्या सा यथार्था आसीत् तस्य आराध्यदेवी चासीत्। अधुना सः भारतस्य पुनर्जागरणाय दृढतरनिश्चयवान् आसीत्। रामकृष्णेन एकदा उक्तम् - 'धर्मः रिक्तोदराणां निमित्तं नास्ति।' अधुना तेषां शब्दानाम् अर्थः आकर्षणं च स्वामिनः दृष्ट्या भिन्नम् आसीत्। गुरोः अन्या काचित् भविष्यवाणी यथार्था जाता।

श्रीरामकृष्णेन सह परिचयात् परमपि तरुणनरेन्द्रे स्वस्य अध्ययनज्ञान-तर्कसङ्गतचिन्तनादीनां कारणेन अभिमानभावः कश्चन विद्यते स्म। गुरुः तद् जानाति स्म। एकदा सः अवदत् - यदा नरेन्द्रनाथः क्षुधादारिद्र्ये नाम किम् इति ज्ञास्यति, जीवनस्य वास्तविकताः काः सन्ति इति अवगमिष्यति च तदा तस्य अध्ययनं पूर्णं भविष्यति, किं करणीयमस्ति इति सः ज्ञास्यति च। सा भविष्यवाणी अधुना तथ्ये परिणता। भ्रमणेन अहङ्कारस्य अवशिष्टांशाः सर्वेऽपि साकल्येन प्रक्षालिताः। अबुपर्वतात् शिष्याय प्रेषिते पत्रे सः लिखति (30-4-1891) - 'हे पुत्राः! धर्मस्य रहस्यं सिद्धान्तेषु न, आचरणेषु वर्तते। सदाचारिणः भूत्वा सदाचरणं करणीयम् इत्येतावान् एव अस्ति समग्रधर्मः।"

1892 तमे वर्षे डिसेम्बरमासे कन्याकुमार्यां शिलायाम् उपविश्य विवेकानन्देन यद् ध्यानं कृतं तद् तस्य जीवनस्य चरमबिन्दुः कश्चन आसीत्। दक्षिणभारते विस्तृतप्रयाणं कृत्वा स्वामी त्रिवेन्द्रमं प्राप्नोत्। के.एस्. रामस्वामिशास्त्री यः तदा महाविद्यालयच्छात्रः आसीत् यस्य च कुलगृहे स्वामिनः वासः आसीत् तं स्वामी अवदत् - प्रायोगिकी देशभक्तिः नाम काचित् भावना अथवा मातृभूमेः निमित्तं प्रेमभावमात्रं न, अपि तु अस्मद्देशवासिनां सेवायाः उत्कटभावना काचित् अस्ति सा। पादाभ्यां समग्रदेशे अटितवता मया अस्माकं जनानाम् अज्ञानं, कष्टानि, धनाभावेन जाता अस्वच्छा दयनीया च स्थितिः नेत्राभ्यां दृष्टा। तेन मम समग्रात्मा दहति। एतस्याः निन्द्यस्थितेः परिवर्तनस्य प्रखरेच्छया अहं ज्वलन् अस्मि ...यदि त्वं भगवन्तं प्राप्तुम् इच्छसि तर्हि मानवं सेवस्व। नारायणं प्राप्तुं दरिद्रनारायणाः - भारतस्य कोटिशः बुभुक्षिताः जनाः सेवनीयाः एव।"

त्रिवेन्द्रमतः स्वामी भारतस्य दक्षिणान्तं कन्याकुमारीम् (Cape Comorian) अगच्छत्। दिव्यमातुः कन्याकुमार्याः मन्दिरगमनात् परं सः समुद्रे सामान्यतया फर्लांगद्वयमिते अन्तरे विद्यमाने द्वे शिले अपश्यत्। ध्यानं कर्तुं तां शिलां गन्तुं तीव्रा काचित् आन्तरिकेच्छा तस्मिन् उत्पन्ना। अशान्ते समुद्रे कूर्दित्वा तरणं कुर्वन् सः तां शिलां प्राप्नोत् या च भारतीयोपखण्डस्य सुदूरतमः बिन्दुः आसीत्। भारतस्य वर्तमानस्थितेः विषये, भविष्यतः विषये, तस्य अधः पतनस्य मूलकारणानां विषये, भारतस्य जागरणविषये पुनरुज्जीवनविषये च सः ध्यानम् अकरोत्। दिनत्रयं यावत् प्रचलति ध्यानस्य अवधौ अनेकशतकानां भारतीयजीवनं तस्य दृग्गोचरः अभवत्। भारतस्य अनेकाः सुप्ताः शक्यताः सुस्पष्टवास्तविकतानां रूपेण तेन दृष्टाः। भारतदेशः तस्य अत्युन्नताध्यात्मचेतनायाः नवीकरणेन पुनर्नूतनतां प्राप्स्यति इति विषयः स्वामिनः स्पष्टः अभवत्। भारतस्य दौर्बल्यानि, तस्य आन्तरिकसामर्थ्यानि च सः अपश्यत्। भारतस्य भविष्यतः माहात्म्यं प्रगतिः च त्यागसेवयोः आदर्शयुगलमात्रेण एव साधयितुं शक्या। शिलायां कृतस्य ध्यानस्य विषये स्वामी अग्रे अलिखत् यत् भारतस्य अन्तिमशिलायां काचित् योजना तस्य स्फुरिता - "एतावन्तः वयं संन्यासिनः अटन्तः जनान् अध्यात्मविज्ञानं यत् पाठयामः तद् उन्मत्तकार्यमेव। राष्ट्ररूपेण अस्माकं यः व्यक्तित्वनाशः जातः अस्ति सः एव भारतस्य सर्वकष्टानां कारणम् अस्ति। अस्माभिः राष्ट्राय तस्य नष्टं व्यक्तित्वं प्रतिदातव्यम्," सामान्यजनानाम् उन्नतिः साधनीया ...। तेषाम् उन्नतिसाधनस्य शक्तिः अन्तर्भागात् एव आगच्छेत् ..."

अधुना किं करणीयमस्ति इति, तस्य जीवनस्य लक्ष्यं किम् अस्ति इति च स्वामी विवेकानन्दः जानाति स्म अपि च तद् कार्यं तेन न केवले भारते अपि तु पारेसमुद्रं विद्यमाने पाश्चात्त्यजगति अपि करणीयम् आसीत्।



# पश्चिमे लक्ष्यसाधनम्

1893 तमे वर्षे शिकागोनगरे जातायां विश्वधर्मसंसदि स्वामिना विवेकानन्देन स्वीकृतः भागः, तत्र तेन प्राप्तम् ऐतिहासिकं यशः इत्येषः प्रसङ्गः तस्य जीवनस्य सुख्याततमः प्रसङ्गः। वस्तुतः आधुनिकभारतस्य नवनिर्माणस्य ऐतिहासिकप्रक्रियायाः दृष्ट्या, भारतस्य स्वस्य अभिज्ञानान्वेषणस्य दृष्ट्या च एषः अत्यन्तपरिणामकारी प्रसङ्गः कश्चन आसीत्। शिकागोभाषणानि, तेषाम् अमेरिकादेशीयानां युरोपप्रदेशीयानां च मानसे जातः प्रभावः चापि स्वामिनः जीवने महत्त्वपूर्णः भविष्यतः दृष्ट्या परिणामकारी च आसीत्। भारतीयानां दारिद्र्यपीडयोः निवारणस्य स्वस्य योजनायाः निमित्तं धनं सङ्ग्रहीतुम् अमेरिकां प्रति गमनं स्वामिना निर्णीतम् इति चिन्तने सामान्यतया जनाः विश्वसन्ति। 1893 तमस्य वर्षस्य आरम्भे सः तस्य गुरुबन्धू स्वामिनौ ब्रह्मानन्दतुरीयानन्दौ अकथयत् - 'अहं सम्पूर्णभारते अटितवान्। हन्त, जनानां दारिद्र्यस्य स्वचक्षुर्भ्यां दर्शनम् अतीवदुःखदायकम् आसीत्। अहम् अश्रूणि अवरोद्धुं न अशक्नवम्! जनानां दारिद्र्यदुःखयोः निवारणाय प्रयत्नम् अकृत्वा तेषां धर्मबोधनं व्यर्थम् अस्ति इति मम दृढविश्वासः अस्ति। एतदर्थमेव नाम भारतस्य निर्धनानाम् उद्धारस्य साधनानि अन्वेष्टुम् अहम् अमेरिकां गच्छन् अस्मि।' शिकागोनगरे विश्वधर्मसंसद् भविष्यति इति या वार्ता भारतीयदिनपत्रिकासु प्रकाशिता तया विवेकानन्देन योग्यः अवसरः अपि प्राप्तः। स्वामिनः दक्षिणभारतीयाः प्रशंसकाः, केचन सुहृदः च तं हिन्दुधर्मस्य प्रतिनिधिरूपेण तस्यां संसदि भागं स्वीकर्तुं साग्रहं निवेदितवन्तः। यः हिन्दुधर्मः अधिकतया भर्त्सितः मिथ्या अधिक्षिप्तः च अस्ति तस्य यथार्थचित्रं स्वामी शिकागोनगरे संसदि प्रस्तुयात् इति ते स्वामिनं प्रार्थितवन्तः। स्वामिनः उपदेशानां सन्देशानां च पश्चिमे प्रचारः अवश्यं भवेत् यतः भारतस्य अपेक्षया अमेरिकादेशे जनाः तान् अधिकम् इच्छेयुः इत्यपि ते अनुभवन्ति स्म। बहुषु सन्दर्भेषु स्वामी स्वयमपि नैकवारम् अकथयत् यत् अमेरिकां प्रति आगमनस्य तस्य मुख्योद्देशेषु अन्यतमः उद्देशः भारते तस्य कार्याणां निमित्तं धनसङ्ग्रहणम् इत्यासीत् इति। परन्तु स्वामिनः अन्ये उद्देशाः अपि आसन् 'इति तस्य पत्रैः भाषणैः उपलब्धैः अन्याभिलेखैः

च ज्ञातुं शक्यन्ते। अमेरिकायाम् अन्यपाश्चात्त्यदेशेषु च वेदान्ततत्त्वज्ञानस्य प्रचारं कृत्वा सः तेषाम् अवधानं भारतस्य समृद्धसांस्कृतिकपरम्पराः अध्यात्मशास्त्रं च प्रति आक्रष्टुम् इच्छति स्म। विज्ञानतन्त्रज्ञानयोः यैः प्रयोगैः यया प्रगत्या च अमेरिकादेशे एतादृशी भौतिकसम्पन्नता सृष्टा तां सः नेत्राभ्यां द्रष्टुम् इच्छति स्म। दारिद्र्योन्मूलनाय आर्थिकप्रगत्यर्थं च भारतेन अपि एतदेव करणीयम् इति तस्य विश्वासः आसीत्। पाश्चात्त्यानां मनस्सु भारतस्य विषये सुदीर्घकालतः ये पूर्वाग्रहाः आसन् याः सर्वव्यापिन्यः भ्रान्तयः च आसन् तासां निवारणमपि अमेरिकायां तस्य मुख्यकार्यम् आसीत् इत्यपि तस्य विश्वासः आसीत्। हिन्दुधर्मस्य तस्य परम्पराणां च तासां शुद्धताभिः सह दीप्तिमत् उपस्थापनम् आवश्यकम् आसीत्। हिन्दुधर्मस्य तथा च अन्यमतानां विषये हिन्दुधर्मस्य भावानां च श्रीरामकृष्णस्य उपदेशानुगुणं पुनर्व्याख्यानम् इत्येषः अपि तस्य अमेरिकां प्रति गमनस्य निर्णयस्य पृष्ठतः विद्यमानः सशक्तः उद्देशः एकः आसीत्।

तस्मिन् समये अमेरिकां प्रति गमनस्य योजना तदर्थं प्रयतनं च सुकरं नासीत्। यं जनाः न जानन्ति स्म, यस्य समीपे स्वीयानि साधनानि कान्यपि न आसन् तादृशस्य युवसंन्यासिनः तु एतद् इतोऽपि दुष्करम् आसीत्। समाजस्य बहुभ्यः भागेभ्यः तस्य महान् विरोधः सञ्जातः। विशेषतया पारम्परिकहिन्दवः येषां दृष्ट्या समुद्रोल्लङ्घनं, म्लेच्छानां (हिन्दूनां सुस्थापितसामाजिकधार्मिकपद्धतीनाम् अनुगुणम् आचरणम् अकुर्वताम् अशुद्धानां वैदेशिकानां) सम्पर्कः, भोजननित्यकर्मणां विषये शास्त्राज्ञानाम् उल्लङ्घनं च निषिद्धम् आसीत् ते तस्य विरोधम् अकुर्वन्। परन्तु स्वामी सर्वविरोधान् अवरोधान् च अतिक्रम्य विश्वधर्मसंसदि भागग्रहणाय 31-5-1893 इति दिनाङ्के मुम्बयीतः नौकायानेन प्रयाणम् अकरोत्। एस्. एस्. पेनिन्सुलर इत्याख्यया नौकया प्रवासं कुर्वन् सः कोलम्बो, सिंगपुर, हाँगकाँग, याकोहामा, ओसाका, टोक्यो इत्येतानि स्थानानि दृष्ट्वा ब्रिटिशकोलम्बियास्थं व्हँकूव्हर इति स्थानं प्राप्नोत्। ततः सः रेलयानेन 30-7-1893 इति दिनाङ्के शिकागोनगरं प्राप्नोत्।

वर्ल्डस् कोलम्बियन् एक्स्पोझिशन् इत्यस्य भागरूपेण शिकागोनगरे 1893 तमस्य वर्षस्य मेमासतः ऑक्टोबर्मासपर्यन्तं विश्वधर्मसंसद् निश्चिता आसीत्। ख्रिस्तोफरकोलम्बसस्य द्वारा अमेरिकायाः अन्वेषणस्य चतुश्शतवर्षाणि अतीतानि इत्येतां घटनाम् अङ्कितुम् एतद् सम्मेलनम् आयोजितम् आसीत्। तन्त्रज्ञानक्षेत्रे जाता अत्याधुनिकप्रगतिः कलाः च प्रदर्शनीयाः इत्येतस्य प्रधानोद्देशः आसीत्। यादवीययुद्धात् परम् अतीतेषु दशकेषु अतिवेगेन या सर्वाङ्गीणा प्रगतिः अमेरिकीयैः साधिता आसीत् तद्विषये ते महागर्वम् अनुभवन्ति स्म। यं ते शिकागोमेलः इति वदन्ति स्म तस्मिन् मनुष्यैः विशेषतया अमेरिकीयैः विज्ञानतन्त्रज्ञानकलाक्षेत्रेषु कृतायाः साधनायाः प्रदर्शनम् आसीत्। सम्मेलनेन सह विविधविषयाधारिताः सभाः अपि अभवन्। विश्वधर्मसंसद् अपि एतादृशीषु सभासु अन्यतमा आसीत्। सा भवतु इति सूचना चार्ल्स.सी.बॉनीवर्यः



अयच्छत्। जॉन-हेन्री-बरोझ् इति विश्वधर्मसंसदः सामान्यसमितेः अध्यक्षः आसीत्। जेन्किन् लॉईड् जोन्सः इति उत्कट-युनिटेरियन् क्रैस्तः विश्वधर्मसंसदः उत्साहिषु आयोजकेषु अन्यतमः आसीत्। आयोजकाः सामान्यतया उदारमतीयाः क्रैस्तवाः आसन् ये च मतान्तरेषु अन्योन्यावगमनम् ऐक्यं च भवतु इति तीव्रतया इच्छन्ति स्म। जगतः विभिन्नमतानुयायिषु अनुभवादीनाम् आदानप्रदानाभ्यां सख्यभावः वर्धताम् इत्येतदर्थं तथा च जगति विद्यमानेषु क्रैस्तमतानुयायिषु अन्येषु च यदन्तरं विद्यते तद् न्यूनीकर्तुम् एषा धर्मसंसद् आयोजिता आसीत्। यस्मिन् काले अमेरिकादेशे पाश्चात्त्यजगति च स्वमताभिनिवेशः मतानुसारम् आचरणस्य आग्रहः च अतीवशक्तिशाली सर्वव्यापी च आसीत् तस्मिन् समये धर्मसंसदः उपक्रमः तस्याः लक्ष्याणि च स्तुत्यानि आसन्। संसदः आयोजकैः विभिन्नमतानां प्रसिद्धाः प्रतिनिधयः स्वमतस्य विषये भाषणं कर्तुम् आहूताः येन प्रमुखेषु पृथक् मतेषु काचित् समानता विद्यते वा इति अन्वेष्टुं शक्येत।

शिकागोनगरम् आगतवतः स्वामिनः विवेकानन्दस्य धर्मसंसदः आयोजकाः के, कदा सा भविष्यति, तत्र किं भविष्यति इत्यादीनां विषये स्पष्टा कल्पना कापि नासीत्। तेन अधिकृतं निमन्त्रणं किमपि न प्राप्तम् आसीत्। कस्यचित् विशिष्टमतस्य अधिकृतप्रतिनिधिरूपेण तं स्वीकर्तुम् अपेक्षितानि प्रमाणपत्रादीनि अपि तत्सविधे नासन्। तस्य समीपे पर्याप्तं धनम् नासीत् तस्य वासव्यवस्था चापि नासीत्। शिकागोनगरं प्राप्य धर्मसंसद् सप्टेम्बरमासे एकादशदिनाङ्के भविष्यति इति ज्ञातवतः तस्य स्थितिः असमीचीनतरा जाता। संसदः पूर्वं षट् सप्ताहानां कृते तेन स्वस्य भोजनावासव्यस्था कल्पनीया आसीत्। तस्मिन् समये तस्य विवशा परिस्थितिः, बोस्टन्नगरे कस्याश्चित् धनिकायाः दयावत्याः अमेरिकादेशीयायाः महिलायाः गृहे आश्रयप्राप्तिः पूर्वं सः यानि कष्टानि सम्मुखीकृतवान् च इत्यस्य कथा अद्भुता अस्ति। परन्तु स्वस्य दृढेच्छाशक्त्याः, धैर्यस्य, ईश्वरेच्छायाम् अविचलश्रद्धायाः च आधारेण स्वामी एताम् आपत्तिं तीर्णवान्। परन्तु अन्तिमक्षणे अपि तस्य धैर्यस्य अविरतप्रयत्नेच्छायाः कठोरपरीक्षा अभवत् एव। संसदः आयोजकानां सङ्केतः यः तत्सविधे आसीत् सः नष्टः अभवत् इति कारणेन् सः तस्मिन् विशालनगरे मार्गभ्रष्टः अभवत्। तेन रेलस्थानकस्य वस्तुविभागे एकस्मिन् रेलयानप्रकोष्ठे शैत्ये रात्रिः यापिता। भाग्येन श्रीमती जॉर्ज.डब्ल्यू.हेल् इति शिकागोनगरस्य उन्नतवर्गीया उदारमनस्का महिला तस्य साहाय्यं कृतवती। सा तम् आयोजकानां समीपम् अनयत्। हिन्दुधर्मस्य प्रतिनिधिरूपेण तैः स्वामी स्वीकृतः।

धर्मसंसदः आरम्भः सप्टेम्बरमासस्य एकादशे दिनाङ्के अभवत् समाप्तिः च सप्तविंशतौ। यस्यां कलासंस्थायाम् उद्घाटनकार्यक्रमः अभवत् सा सप्तसहस्रजनैः परिपूर्णा आसीत्। सः कश्चन महाप्रभावपूर्णः कार्यक्रमः आसीत् यस्य वर्णनम् 'अभूतपूर्वं धार्मिकदृश्यम्' इति तथा च एतावत्पर्यन्तं जातं महत्त्वपूर्णतमं धार्मिकसम्मेलनम्' इति शब्दैः क्रियते। क्रैस्तमतप्रतिनिधिभिः सह येषाम् अन्यमतानां प्रतिनिधयः उपस्थिताः

आसन् तानि एवं सन्ति - हिन्दुधर्मः, जैनमतं, बौद्धमतं, कन्फ्यूशियसमतं, शिन्तोमतं, इस्लाममतं, माइदामतं, ब्राह्मसमाजः च। भारतात् अन्यैः कैश्चित् सह ब्राह्मसमाजस्य प्रतापचन्द्रमजुमदारः, मुम्बयीतः ब्राह्मसमाजस्य एव नगरकरः, जैनानां प्रतिनिधिः वीरचन्दगान्धीः, थिओसोफिक् सोसायटी इत्यस्य ॲनी बेझंट् तथा च श्रीमान् चक्रवर्ती, स्वामी विवेकानन्दः इत्येते उपस्थिताः आसन्। सिलोनस्य बौद्धानां विशिष्टप्रतिनिधिः एच्. धर्मपालः अपि उपस्थितः आसीत्। वेदिकायाः मध्यभागे पश्चिमखण्डस्य रोमन् कॅथॉलिक् चर्च् इत्यस्य उच्चतमः अधिकारी कार्डिनल् गिबन्सः उपविष्टवान् आसीत्। एकैकः प्रतिनिधिः क्रमशः उत्थाय पूर्वमेव सज्जीकृतं भाषणं पठति स्म। स्वामिना तु कदापि एतादृश्यां सभायां भाषणं कृतं नासीत्, अपि च तस्मिन् ऐतिहासिके दिने तेन भाषणमपि लिखित्वा न नीतम् आसीत्। स्वभावनाः स्मरता विवेकानन्देन लिखितम् - "मम हृदयं वेगेन स्पन्दते स्म। मम जिह्वा शुष्का जाता आसीत्। अहं तावान् क्षुब्धः आसं यत् प्रातःकाले भाषणं कर्तुं न शक्तवान् एव।" अन्ते यदा सः भाषणाय उदतिष्ठत् तदा डा.बरोझ् श्रोतॄणां कृते तस्य परिचयम् अकथयत्। स्वामी देवीं सरस्वतीं नत्वा विशालसभां दृष्ट्वा तस्य भाषणं श्रोतुं शान्त्या उपविष्टान् श्रोतॄन् सम्बोध्य भाषणम् आरभत - "अमेरिकीयाः भगिन्यः भ्रातरः च!" तस्य सम्बोधनस्य विद्युत्तुल्यः परिणामः श्रोतृषु जातः। एतावत्पर्यन्तं केनापि एतादृश्या पारदर्शिन्या स्नेहभावनया ऋजुतया च सम्बोधनं न कृतम् आसीत्। सम्पूर्णसभा तत्क्षणम् उत्थाय निमेषद्वयं यावत् करताडनेन प्रतिस्पन्दं प्राकटयत्, स्वामिनं प्राशंसत् च। इतिहासः घटितः। तस्मिन्नेव क्षणे जनैः अज्ञातः कश्चन हिन्दुसंन्यासी सुप्रसिद्धः जातः, अवधानस्य स्नेहस्य च भाजनं जातः। तेन लघुभाषणेन तथा च तदनन्तरं धर्मसंसदि अमेरिकायां च कृतैः भाषणैः विवेकानन्दः राष्ट्रनायकः अभवत्, वैश्विकव्यक्तित्वं च प्राप्नोत्।

प्रथमभाषणस्य ये अंशाः आसन् यः च भावः आसीत् सः विनूतनः, प्रत्यग्रः, आत्मावलोडकः च आसीत्। सर्वमतीयानां निमित्तं धर्मसंसद् यं सन्देशं प्रेषयितुम् इच्छति स्म तस्य सारमेव विवेकानन्दस्य भाषणेन शक्त्या उपस्थापितम्। एतत्समकाले स्वामी धैर्येण तदीयः हिन्दुधर्मः नाम किम् इत्यपि उपास्थापयत्। सः अवोचत् -

"येन मतेन विश्वस्य कृते सहना, वैश्विकाङ्गीकारभावः च पाठितः तस्य अंशः अहमस्मि इति मम अभिमानः अस्ति। वयं वैश्विकसहनामात्रे न विश्वसिमः अपि तु वयं सर्वाणि मतानि यथार्थानि इति अङ्गीकुर्मः।" सः सम्प्रदायवादं, पूर्वाग्रहवशात् अन्यमतविरोधं, मतान्धतां च "भयङ्कराक्षसाः" इत्युक्त्वा निन्दितवान् यतः एतैः जनानां सभ्यतानां च महान् अपायः, कष्टानि, नाशः च कारितः इति। भावपूर्णतया एताम् आशां प्रकटयन् सः भाषणं समापयत् यत् 'एषा धर्मसंसद् सर्वविधमतान्धतायाः, खड्गेन लेखन्या च क्रियमाणानाम् अत्याचाराणां च मृत्युकारकम् आघातं करिष्यति' इति। तस्य तदनन्तरेषु भाषणेषु अपि विश्वैक्यस्य भावनायाः, मतानां सामञ्जस्यस्य,



भ्रातृभावस्य च विचाराः प्रकटिताः आसन्। 19 सप्टेम्बर् इति दिनाङ्के प्रस्तुतं हिन्दुधर्मसम्बद्धं पत्रं तस्य प्रधाना प्रस्तुतिः आसीत्। वेदान्ततत्त्वानां गीतोपदेशानां च विषयकम् अत्यन्तवैदुष्यपूर्णं सरलं, तथ्यपूर्णं, शक्तिमत् च विवरणं सः अकरोत्। सः साग्रहं प्रत्यपादयत् - 'हिन्दुमतं नाम कस्मिंश्चित् विशिष्टतत्त्वे अथवा मते विश्वासाधानाय कृताः सङ्घर्षाः अथवा प्रयत्नाः न, अपि तु तदस्ति साक्षात्करणम् - तदपि विश्वासाधानेन न, अपि तु तथा भूत्वा तत्स्थितिप्राप्तेः द्वारा साक्षात्करणम्।' सः अकथयत् - 'अन्धतया विश्वसनम् इत्येषः मानवस्य महान् शत्रुः अस्ति, किन्तु अन्यमतविरोधः तु तदपेक्षया असमीचीनः अस्ति।' प्रत्येकं मानवे दिव्यता अस्ति। तस्याः दिव्यतायाः साक्षात्करणं, तस्याः प्रकटीकरणम् इत्येतद् धर्मस्य प्रयोजनम् अस्ति। तेन बलपूर्वकं कथितम् - 'मानवः दोषात् सत्यं प्रति गच्छन् नास्ति, अपि तु सत्यात् सत्यं प्रति; अर्थात् अधस्तनसत्यात् उन्नतसत्यं प्रति।' 27 सप्टेम्बर इति दिनाङ्के धर्मसंसदः अन्तिमसत्रे विवेकानन्देन कृतं भाषणं सभागृहे उपस्थितस्य प्रत्येकं जनस्य हृदयम् अस्पृशत्। ये विभिन्नमतानाम् ऐक्यं महत्त्वपूर्णं मन्यन्ते तथा च मतस्य व्याजेन क्रियमाणानां सङ्घर्षाणां, विभाजनानां, हिंसायाः च समाप्तिं काङ्क्षन्ति तेषां दृष्ट्या तद् भाषणं शाश्वतौचित्यस्य अस्ति। स्वामिना कथितम् - 'क्रैस्तवेन हिन्दुना बौद्धेन वा भवितव्यं नास्ति, न वा हिन्दुना बौद्धेन च क्रैस्तवेन भवितव्यम्। परन्तु प्रत्येकेन अन्यस्य भावग्रहणं करणीयं, स्वस्य व्यक्तित्वं रक्षणीयं, स्वस्य विकासनियमानुसारं विकसनीयं च। 'मम मतमात्रम् अवशिष्येत अन्येषां मतानि नष्टानि भवेयुः' इति स्वप्नमपि न कोऽपि पश्येत्।' तस्य उत्कटा आशा आसीत् यत् 'विरोधम् अविगणय्य अपि प्रत्येकं मतस्य फलके अचिरादेव लिखितं भविष्यति 'साहाय्यं क्रियतां कलहः न', 'एकीकरणं स्यात् नाशः न', 'ऐक्यं शान्तिः च स्यात्, विरोधः न'।

विवेकानन्दस्य साफल्यं प्रभावः च प्रचण्डः आसीत्। अमेरिकादेशीयासु पत्रिकासु 'झञ्झावातसमः हिन्दुः' इति तस्य वर्णनम् अभवत्। सः सभायाः बन्धनं कृतवान् इव स्थितिः उत्पन्ना। तदनन्तरं (समग्रे अमेरिकादेशे) ये सहस्रशः अमेरिकावासिनः पुरुषाः महिलाः च तं श्रोतुम् आगताः तेषाम् अवधानाकर्षणं तेन भाषणानां, प्रवचनानां, साक्षात्काराणां च मालिकया कृतम्। तद्देशीयान् जनान् दिनपत्रिकाः च सः झञ्झावातग्रस्तान् इव अकरोत्। तस्य अत्युत्तमया देहयष्ट्या, चारुवेशेन, प्रभावेण च स्वामी विवेकानन्दः शिकागोनगरीये संसदि सर्वेषां दृष्टेः केन्द्रीभूतः जातः। समकालीनेषु वृत्तान्तेषु तस्य वर्णनम् - 'पीतनारङ्गवर्णयोः वस्त्रधारिणी विशिष्टाकृतिः वा शिकागोनगरस्य धारमये वातावरणे भारतस्य सूर्यवत् प्रकाशते तथा च सिंहमुखः, वेधनक्षमे नेत्रे, गतिमयौ ओष्ठौ, वेगवती आकस्मिका च गमनशैली' इत्येवं कृतं दृश्यते। तस्य आङ्ग्लभाषाप्रभुत्वं, शब्दानां चयनं, प्रस्तुतीकरणशैली च विशिष्टा आसीत्। 'मानवीयम् अत्युत्तमं वाक्पाटवम्' आसीत् तद्। द बोस्टन् इव्हनिंग् ट्रान्स्क्रिप्ट्' अलिखत् यत् सः

संसदः आकर्षकतमः जनः आसीत्। श्रोतृभिः कृतस्य करताडनस्य निमित्तं युवसंन्यासिनः प्रतिस्पन्दः 'बालवत् समाधानस्य आसीत् यस्मिन् अहङ्कारस्य लेशोऽपि नासीत्' इति विषयः श्रोतृभ्यः आनन्ददायी आसीत्। द न्यूयॉर्क क्रिटिक् इति दिनपत्रिकया स्वामिनः वर्णनं 'तद् चित्ताकर्षकं व्यक्तित्वं येन हिन्दुसभ्यतायाः नवीनः भारतदेशः उपस्थापितः' इति कृतम्। अन्यस्य कस्यचित् वृत्ते वर्णनम् आसीत् - 'तस्य वैदुष्येण, विश्वासस्य आन्तरिकशक्त्या, व्यक्तिरूपेण सङ्कोचभावस्य लेशमात्रेण च तीव्राः संवेदनाः उत्पादिताः।' अद्य धर्मसंसदः अनन्तरं शतवर्षाणाम् अनन्तरम् आधुनिकपाश्चात्त्येतिहासलेखकाः प्रथमधर्मसंसदि विवेकानन्देन प्राप्तं साफल्यं, तस्य प्रभावञ्च सहजतया अङ्गीकुर्वन्ति। 'संसदः दृश्यस्य केन्द्रम्' इति तस्य उल्लेखः क्रियते। अन्यः कश्चन विद्वान् तं 'शिकागोनगरीयसंसदः सुप्रसिद्धः जनः' इति कथयति। 'एनसायक्लोपेडिया ऑफ अमेरिकन् रिलिजियस् एक्सपिरियन्सेस्' इति कोषे तस्य उल्लेखः 'संसदः विशिष्टप्रभावकारिषु नक्षत्रेषु अन्यतमम्' इति अस्ति।

स्वामिनः विवेकानन्दस्य यशसा सहजतया भारते सामान्यजनेषु तत्रापि विशेषतया युवकेषु आत्मविश्वासस्य स्वावलम्बनस्य, निर्भयत्वस्य च भावस्य विकासाय प्रचण्डं प्रदानं कृतम्। अग्रे चर्चितम् अस्ति यत् भारतस्य स्वातन्त्र्यान्दोलनाय स्वामिनः प्रदानम् अपरिमेयम् आसीत्। भारतदेशस्य स्वाभिज्ञानान्वेषणस्य प्रक्रियायाः, भूतकालीनमहत्तायाः पुनरुज्जीवनकार्यस्य च महत्साहाय्यं धर्मसंसदि स्वामिनः दर्शनेन, विदेशेषु तेन साधितैः कर्मभिः च कृतम्। परन्तु तत्कालीनपाश्चात्त्यचिन्तनदृष्ट्या अपि स्वामिनः प्रदानानि न्यूनमहत्त्वपूर्णानि नासन्। विश्वधर्मसंसद् अन्यैः कैश्चित् विशिष्टैः कारणैः अपि महत्त्वपूर्णा आसीत्। तया दृष्ट्या अपि स्वामिनः प्रदानानां महत्त्वस्य मापनं भवेत्।

इतिहासलेखकाः धर्मसंसद् नाम 'विभिन्नमतानां महत्त्वपूर्णतमं सम्मेलनम्' किञ्च येन एकं युगं समाप्तम् अभवत् अन्यस्य च आरम्भः अभवत् इति मन्यन्ते। इतिहासे प्रथमवारं क्रैस्तमतस्य तथा च अक्रैस्तमतानां प्रमुखाः सम्मिल्य समानस्तरे समानसम्मानेन चर्चाम् अकुर्वन्। इतिहासे इतः पूर्वं कदापि एवं न जातम् आसीत्। धर्मस्य विषये वैज्ञानिकतरायाः तर्कसङ्गततरायाः चिन्तनशैल्याः विकासाय एतया संसदा प्रेरणा दत्ता। एतस्याः प्रक्रियायाः 'वैज्ञानिकी आधुनिकता' इति नामकरणम् अभवत्। अन्योन्यस्य विषये आदरभावनया, प्रशंसाभावेन, ऐक्यभावेन च मेलनं चर्चनं च कियद् महत्त्वपूर्णम् अस्ति इति स्वामिना विवेकानन्देन प्रदर्शितम्। धर्मविज्ञानयोः सम्बन्धविषये संसदि कृते कस्मिंश्चित् भाषणे सः अवदत् - अद्य विज्ञानस्य कार्यं निर्माणं न, अपि तु अभिव्यञ्जनम् अस्ति। एतेन हिन्दुः आनन्दितः एव अस्ति यतः आ नैकेभ्यः युगेभ्यः सः यत् स्वोरसि पोषयन् आसीत् तदेव अधुना सशक्तभाषया, विज्ञानस्य अत्याधुनिकनिष्कर्षाणां प्रकाशे पाठितं भविष्यति' इति। शिकागोनगरीया संसद् तुलनात्मकधर्माध्ययनस्य संप्रेरिका आसीत्। संसदः अन्यत् किञ्चित् महत्त्वपूर्णं फलम्



एतदासीत् यत् व्यक्तीनां समाजस्य च इहलोके हितमपि धर्मेण चिन्तनीयम् इति भावनया प्राप्तं वर्धमानं साहाय्यम्। धर्मस्य 'सामाजिकदृष्टिः' एतया संसदा सुकरा कल्पिता। विवेकानन्देन तु धर्मसंसदि भागग्रहणात् सुपूर्वमेव एषः अंशः गभीरतया अनुभूतः अवगतः चासीत्। तस्य जीवनम् एतस्याः दृष्टेः प्रयोगस्य उदाहरणम् आसीत्। संसदः द्वारा विविधमतानां विविधसंस्कृतीनां च वैश्विकचिन्तनशैल्याः विकासकार्याय महत्प्रदानं जातम्। अग्रे वयं द्रक्ष्यामः यत् एतस्मै क्षेत्राय अपि विवेकानन्दस्य प्रदानम् अतीवमहत्त्वपूर्णम् आसीत्। एतस्मिन् सन्दर्भे साग्रहम् एतत्कथनम् उचितमेव भवेत् यत् स्वामिना विवेकानन्देन भारतस्य, भारतीयसंस्कृतेः, भारतस्य धार्मिकपरम्पराणां च यादृशं प्रस्तुतीकरणं धर्मसंसदः अन्तः बहिः च कृतं तेन पाश्चात्त्यानां मनस्सु अङ्कितानां भारतविषयकाणाम् अनेकेषां दृढमूलानां पूर्वाग्रहाणां, कुचिन्तनानां, निश्चिताभिप्रायाणां च अपसारणम् अभवत्। एतेन प्रकारेण भारतपाश्चात्त्यजगतोर्मध्ये विचाराणां मुक्तप्रवाहे अनुपयोगिविचाराणां यः अवरोधः आसीत् तस्य निष्कासनस्य अत्यावश्यकी प्रक्रिया आरब्धा। सुदीर्घकालादारभ्य भारतपाश्चात्त्यजगतोर्मध्ये यः अधिपतिप्रजाजनसम्बन्धः प्रचलति स्म तस्य स्पर्धाह्वानं विवेकानन्दः अकरोत् इत्येतद् तस्य मुख्यतमप्रदानम् अस्ति। पाश्चात्यजगत् स्वस्य राजकीयप्रभुतायाः बलेन सामाजिकधार्मिकसांस्कृतिकक्षेत्रेषु अपि स्वीयं प्रभुत्वं प्रस्थापयत् आसीत्। एतादृशस्य प्रभुत्वसम्पादनस्य विरोधाय विवेकानन्दः शक्तिमदान्दोलनमेकं प्रारभत। सुख्यातः कश्चन इतिहासलेखकः वदति यत् - सः पौरस्त्यजगतः द्वारा प्रत्याक्रमणम् आरभत'। धर्मसंसदः वेदिका एतस्य प्रत्याक्रमणस्य आरम्भस्थानम् आसीत्। एतदपि अवश्यम् अवधातव्यं यत् युगपदेव सः पूर्वपश्चिमयोर्मध्ये यदन्तरम् आसीत् तस्य पूरणस्य कार्यमपि आरभत येन कार्येण शान्तिमयस्य ऐक्यमयस्य च नवविश्वस्य आरम्भः स्यात्।

संसदः अनन्तरं स्वामी भारतं प्रतिगन्तुम् उत्सुकः आसीत्। अध्ययनध्यानादिभिः युक्तं तदीयम् भ्रमणशीलम् एकाकीजीवनं पुनरपि प्रवर्तयितुम् इच्छति स्म सः। परन्तु भवितव्यं तथा नासीत्। महत्कार्यं तत्सम्मुखे विद्यते स्म। भारतस्य उन्नतिः, पुनर्जागरणं, तस्य दारिद्र्यदुःखयोः निवारणम् इत्येते तस्य प्रधानविचाराः आसन् यदर्थं पश्चिमे बहु कार्यं करणीयम् आसीत्। एतत्कार्यं मम निमित्तं पूर्वनिश्चितम् अस्ति इति स्वामी जानाति स्म अतः संसदः समाप्तेः अनन्तरम् अचिरादेव प्रोफेसर् राईट् इत्यस्मै प्रेषिते पत्रे सः लिखति - 'अधुना अहं स्पष्टतया द्रष्टुं शक्नोमि यत् हिमालयस्य हिमाच्छन्नेषु शिखरेषु तथा च भारतस्य दहन्त्यां समतलभूमौ यः मां मार्गं दर्शयति स्म सः एव अत्र मम साहाय्यार्थं मार्गदर्शनार्थं च अस्ति ... मया तु आज्ञापालनमात्रं करणीयम् ... तस्य इच्छानुसारं भविष्यति।' स्वामी अमेरिकायाः भूमौ वेदान्तसत्यस्य प्रचारः करणीयः, भारतस्य संस्कृतेः अध्यात्मसम्पदः च वास्तविकचित्रं प्रदर्शनीयं चेति निरणयत्। अमेरिकायां भाषणानि कर्तुं कयाचित् भाषणसंस्थया कृतं प्रवासस्य निमन्त्रणं सः अङ्गीकृतवान्।

एवं समग्रे अमेरिकादेशे मासान् यावत् प्रचलतः श्रमकारकस्य अतिव्यग्रस्य भाषणप्रवासस्य आरम्भः अभवत्। एतस्मिन् प्रवासे सः आयोवा सिटी, मेम्फीस्, मिनिपोलिस्, मेडिसन्, डेट्रॉईट्, बफेलो, बोस्टन्, केम्ब्रिज (मॅसॅच्युसेट्स्), बाल्टीमोर्, वॉशिंग्टन डी.सी., ब्रूकलिन्, न्यूयॉर्क इत्येतानि अन्यानि च अनेकानि स्थानानि अगच्छत्। शिकागोनगरं तस्य मुख्यालयः आसीत्। अमेरिकायाः अनेकैः जनैः सह कुटुम्बैः सह च तस्य परिचयः अभवत्। एतेषु केचन तस्य महान्तः प्रशंसकाः उत्तमाः सुहृदः च अभवन्। यैः सह सः संसदः काले उषितवान् तौ जे.लियोनूदम्पती तथा च हेलूकुटुम्बम् एतेषु अन्यतरे आस्ताम्। हेलूकुटुम्बस्य कृते सः पुत्रतुल्यः भ्रातृतुल्यः चासीत्। स्वामी अमेरिकावासिनां भारतस्य विषये पाठनकाले एव पाश्चात्त्यसमाजः, तस्य संस्कृतिः, तस्य कल्पनाः, औद्योगिकार्थिकप्रणाल्यः इत्यादीनां विषये पठनमपि आसीत्। अनेकेषु विषयेषु सः रुचिमान् आसीत्। शिकागोनगरे विद्युत्संसदः निमित्तम् आगतेन विख्यातवैज्ञानिकानां गणेन सह सः अमिलत्। तेषु कतिचन श्रेष्ठाः भौतशास्त्रविदः आसन्। विद्युतः विषये स्वामिनः ज्ञानेन आश्चर्यान्विताः ते तेषां विज्ञानवृत्तेः सम्मान्यः सदस्यः इति तं प्राशंसन्। रॉबर्ट इन्ग्रेसोल इति तत्कालीनः प्रसिद्धः नास्तिकवक्ता धर्मदर्शनशास्त्रयोः विषये स्वामिनः सुस्पष्टैः विचारैः धैर्येण च प्रभावितः। सः अनन्तरं विवेकानन्दम् अकथयत् - 'यदि पञ्चाशद्भ्यः वर्षेभ्यः प्राक् उपदेशं कर्तुं भवान् एतं देशम् आगमिष्यत् तर्हि रज्ज्वा आलम्बनेन भवान् मारितः अभविष्यत् अथवा ज्वालितः अभविष्यत्। ततः चिरकालानन्तरमपि यदि भवान् आगमिष्यत् तर्हि पाषाणताडनेन ग्रामेभ्यः बहिः प्रेषितः अभविष्यत्'। यद्यपि स्वामिना एतादृशं किमपि न सोढं तथापि तस्य प्रचण्डप्रभावेण यशसा च ये खिन्नाः अभवन्, धर्मविषयकेषु प्राचीनाभिप्रायेषु दृढविश्वासवन्तः ये जनाः, मतानुयायिनः च आसन् तैः स्वामिनः अपायार्थं कृताः द्वेषपूर्णाः विरोधाः, तैः कृतं निन्दनं, तैः दिनपत्रिकासु प्रकाशिताः मिथ्या अपायपूर्णाः च वार्ताः च तेन अवश्यं सम्मुखीकृताः। परन्तु विवेकानन्दः अविचलतया प्रचण्डोत्साहेन स्वीयं कार्यम् अग्रे अनयत्।

अमेरिकादेशीयैः अनेकैः अतिविशिष्टैः जनैः सह स्वामिनः परिचयः अभवत्। ते तस्मात् अतीवप्रभाविताः अभवन्। एतादृशेषु अन्यतमा आसीत् प्रसिद्धा ऑपेरागायिका मॅडम एमा काल्वे। तस्याः जीवनस्य अत्यन्तमहत्त्वपूर्णघट्टे सा स्वामिना सह अमिलत्, तस्मात् सान्त्वनं प्राप्नोत् च। माय लाईफ (1922) इति तस्याः आत्मचरित्रे सा अग्रे अलिखत् - 'मम सौभाग्यं, मह्यम् आनन्दप्रदः च एषः विषयः अस्ति यत् अहं तादृशं जनं ज्ञातवती यः यथार्थतया देवेन सह अचलत्, यः, सदात्मा, सत्पुरुषः, दार्शनिकः, यथार्थः सुहृत् च आसीत्। मम अध्यात्मजीवने तस्य तीव्रप्रभावः अभवत्। सः मां नवदिशाः प्रादर्शयत्। मम धार्मिककल्पनाः आदर्शाः च वर्धयित्वा तेन एकीकृताः।' जॉन-डी. रॉकफेलर् इति विख्यातेन श्रीमता उद्योगपतिना सह अपि स्वामिनः मेलनम्



अभवत्। स्वामी तम् असूचयत् यत्-भवान् याम् अत्युत्तमां सम्पत्तिं सङ्गृहीतवान् अस्ति सा भवदीया न। भवान् माध्यममात्रम् अस्ति तथा च जगतः कृते साहाय्यकरणम् इति भवतः कर्तव्यम् अस्ति। भवता अन्येषां साहाय्यं कर्तुम् अवसराः प्राप्येरन् इत्येतदर्थं भगवान् भवते सम्पत्तिं दत्तवान् इति अपि स्वामी तम् अस्मारयत्। प्रथमं तु स्वामिनः सत्यम् उपदेशं श्रुत्वा रॉकफेलर् ईषद्क्रुद्धः। परन्तु सः पुनः स्वामिनः दर्शनाय आगत्य कस्यैचित् समाजसंस्थायै सः महद्दानं करिष्यति इति निर्णयं स्वामिनं श्रावितवान्। एतस्य दानस्य अनन्तरमपि रॉकफेलरः बहुधा धनदानम् अकरोत्।

स्वामी विवेकानन्दः यत्र यत्र गतवान् भाषणानि कृतवान् च तत्र तत्र सः जनानां दिनपत्रिकाणां च अवधानम् आकृष्टवान्। सः कश्चन सुप्रसिद्धः जनः, अन्येषां निरन्तरम् अवधानकेन्द्रं च आसीत्, किन्तु तस्य नम्रता कदापि न अलुप्यत्। तस्य कार्यस्य साफल्यस्य च कारणम् ईश्वरेच्छा तस्य गुरोः आशिषः च सन्ति इति सः हृदयेन अवगच्छति स्म। 1894 तमे वर्षे सः अलिखत् - 'तस्य कृपया आश्चर्यान्वितोऽस्मि अहम्। यत्किञ्चित् नगरं गच्छामि तत्र महान् कोलाहलः भवति। ते मां 'झञ्झावाततुल्यः हिन्दुः' इति निर्दिशन्ति। एषा तस्य (ईश्वरस्य) इच्छा अस्ति इति स्मरत। अहम् आकारहीनः ध्वनिः अस्मि।' जनाः तस्य भाषणात् परम् अथवा साक्षात्कारेषु तं बहुविधान् प्रश्नान् पृच्छन्ति स्म, येषु केचन मूर्खतापूर्णाः भवन्ति स्म, अन्ये च केचन भारतस्य परम्पराणां, सामाजिकप्रथानां, हिन्दुधर्मस्य च विषये द्वेषबुद्ध्या पूर्णाः भवन्ति स्म। परन्तु स्वामी एतद् अत्यन्तसहजतया सोढ्वा तस्य आन्तरिकविनोदबुद्ध्या उपहासेन च उत्तराणि वदति स्म।

सर्वेषाम् अधिकाराः समानाः सन्ति सर्वे च समानतया सम्माननीयाः सन्ति इत्यस्मिंन् स्वामिनः दृढविश्वासः आसीत्। सर्वविधविशिष्टाधिकाराणां विरोधकः आसीत् सः। वंशस्य, जन्मनः, धर्मस्य वा आधारेण अनन्यसाधारणश्रेष्ठतायाः प्रतिपादनेन सः कुप्यति स्म। अतः अमेरिकायां कृष्णवर्णीयानां (निग्रो) विषये या भेदभावना आसीत् तां सः अतिनिन्दति स्म। अमेरिकायां बहुधा तं निग्रोजनं मत्वा नापितापणात्, भोजनालयेभ्यः च बहिः गन्तुं सूचयन्ति स्म अथवा अपेक्षितसेवां न यच्छन्ति स्म। सुचिरात् परं तस्य एकः पाश्चात्त्यशिष्यः आश्चर्यचकिततया अपृच्छत् यत् भवान् किमर्थं तान् भवान् कृष्णवर्णीयः अमेरिकादेशीयः न इति न वदति स्म तथा च वस्तुतः भवान् कः अस्ति इति न वदति स्म इति। स्वामी उदतरत् - 'किम्! अन्यस्य मूल्येन स्वस्य उन्नतिसाधनम्! अहं तत्कर्तुं पृथिवीं न आगच्छम्।' एकदा एकः कृष्णवर्णीयः भारवाहकः स्वागतसमितेः द्वारा स्वामिनः स्वागतं क्रियमाणं दृष्ट्वा तस्य समीपम् आगत्य अकथयत् यत् मम स्वजनेषु कस्यचित् महापुरुषरूपेण क्रियमाणम् आदरं दृष्ट्वा अहम् अतीव प्रमुदितः इति। सः स्वामिना सह हस्तलाघवं कर्तुम् ऐच्छत्। अत्यन्तस्नेहेन तस्य हस्तं गृहीत्वा स्वामी अकथयत् 'धन्यवादः भ्रातः, धन्यवादः।'

स्वामी अतीव निष्कपटतया सहृदयतया च प्रतिस्पन्दं प्रकटयति स्म। सर्वमानवानां समानतायां विश्वबन्धुत्वे च स्वामी विश्वसिति स्म। यद्यपि सः तस्य भारतीयत्वे हिन्दुत्वे च अभिमानवान् आसीत् तथापि वांशिकाभिमानस्य लेशोऽपि तस्मिन् नासीत्। वंशाभिमानस्य औद्धत्यस्य किञ्चिदपि प्रदर्शनं दृष्टं चेत् सः तीक्ष्णं प्रत्युत्तरं वदति स्म। तस्य जीवने बह्व्यः तादृश्यः घटनाः आसन् यत्र सः श्वेतकायानां वंशाभिमानस्य सधैर्यं विरोधं कृतवान्। भारतीयानां विषये हिन्दुधर्मस्य विषये वा श्वेतकायैः यानि तुच्छताप्रदर्शकानि वचनानि उक्तानि तद्विषये तैः बलेन क्षमाप्रार्थनां कारितवान्। कपटपूर्णां वांशिकतुलनां सः किञ्चिदपि न इच्छति स्म। एकदा सः भगिनीनिवेदिताम् अवदत्- यदि अहं मम श्वेतकायस्य आर्यपूर्वजस्य कृतज्ञः अस्मि, तर्हि ततोऽधिकं कृतज्ञतरः मम पीतकायस्य मोंगोलपूर्वजस्य अस्मि अपि च ततोऽधिकं कृतज्ञतमः मम कृष्णकायस्य निग्रोपूर्वजस्य अस्मि।' तस्य सर्वेषु भाषणेषु, पत्रेषु, लेखनेषु च यः एकः विषयः अतिस्पष्टतया प्रकटितः भवति सः अस्ति भारते तस्य स्नेहः। एतद्विषये कस्याञ्चित् दिनपत्रिकायां टिप्पणीः आसीत् - 'यया शैल्या सः 'मम देशः' इति विषये वदति सा अतीवभावस्पर्शिनी भवति। एताभ्यां शब्दाभ्यां स्पष्टं भवति यत् सः संन्यासिमात्रं न अपि तु तद्देशवासिनां प्रतिनिधिः अस्ति इति।'

धर्मसंसदः परम् अमेरिकादेशे विवेकानन्दस्य जीवनं निरन्तरं साफल्यमयम् आसीत्, किन्तु सदैव सुखदं नासीत्। सः श्रान्तिं निःसारतां च अनुभवति स्म। भारते कार्यकरणस्य योजनायाः विषये तस्य मनसः निर्णयः जातः आसीत्। अमेरिकादेशीयानां प्राचीनमतानुसारिणां क्रैस्तमतप्रचारकाणां शक्तिमतां गणानां सः कोपभाजनं जातः आसीत्। स्वामिनः विषये जनानां मनस्सु अन्यथाभावम् उत्पादयितुं तैः क्रियमाणः मिथ्यावार्तानां प्रचारः तीव्रतरः जातः आसीत्। भारते तस्य विषये याः असत्यवार्ताः प्रकाश्यन्ते स्म ताभिः वार्ताभिः एते गणाः प्रोत्साहनं प्राप्नुवन्ति स्म। एतादृश्यः अपायकारिण्यः असत्यवार्ताः अमेरिकायां दिनपत्रिकासु प्रकाशिताः भवन्ति स्म तथा च अमेरिकायां तस्य सुहृत्सु प्रशंसकेषु च तासां वितरणं भवति स्म। सिंहवत् शूरहृदयः निर्भयः च स्वामी अपि कदाचित् तस्मात् कष्टम् अनुभवति स्म। परन्तु तस्य लोहतुल्या इच्छाशक्तिः आत्मशक्तिः च अदम्या आसीत्। यया भाषणसंस्थया तेन सह भाषणार्थं प्रवासस्य संविद् कृता आसीत् सा तं वञ्चयन्ती शोषयन्ती च आसीत् अतः सा संविद् समापनीया इति सः निरणयत्। सः स्वबलेन एव भाषणानि कुर्वन् अमेरिकादेशे वेदान्तदर्शनस्य वितरणाय अपेक्षिताम् आधारभूमिम् अरचयत्। नॉर्दम्पटन् सिटि हॉल इत्यत्र स्वामिना कृतस्य भाषणस्य विषये द नॉर्दम्पटन् डेली हेराल्ड् इति पत्रिकायाः सम्पादकीये लेखे उक्तम् आसीत् - स्वामिनः विवेकानन्दस्य दर्शनस्य श्रवणस्य च अवसरः नाम तादृशः कश्चन अवसरः अस्ति यं कोऽपि बुद्धिमान्, सम्यक् मनस्कः च अमेरिकावासी न त्यजेत् यदि सः तस्य वंशस्य मानसिकनैतिकाध्यात्मिकसंस्कृतेः



प्रथमोत्पादनस्य दीप्तिमन्तं प्रकाशं द्रष्टुम् इच्छति यः वंशः स्वस्य वयसः गणनां सहस्रकैः करोति अपि च यां वयं शतकैः कुर्मः। प्रत्येकं मनसः दृष्ट्या तस्य अध्ययनं समृद्धफलदायि अस्ति।

स्वामिना विवेकानन्देन कृतेषु भाषणेषु विख्याततरे भाषणे ते आस्तां ये तेन बोस्टन्नगरे, विश्वख्याते हार्वर्डविश्वविद्यालये च कृते। श्रोतृषु एतयोः भाषणयोः गभीरः परिणामः अभवत्। श्रोतृषु अधिकांशाः बुद्धिमन्तः युवविद्वांसः, विशिष्टाः प्राध्यापकाः, अन्ये बुद्धिमन्तः जनाः च आसन्। हार्वर्ड्विश्वविद्यालये प्राच्यदर्शनशास्त्रस्य प्राध्यापकरूपेण कार्यं करोतु इति प्रस्तावः अपि स्वामिने दत्तः आसीत्। तदनन्तरम् एतादृशः एव एकः प्रस्तावः कोलम्बियाविश्वविद्यालयात् अपि तेन प्राप्तः। अमेरिकायां तस्य कार्यं नैरन्तर्येण प्राचलत्। बहुभिः विद्वत्सभाभिः, गणैः, कुटुम्बैः च सः विभिन्नविषयेषु भाषणानि कर्तुं निमन्त्र्यते स्म। वेदान्तदर्शनं, योगशास्त्रं, हिन्दुधर्मः, भारतस्य रीतिपरम्पराः, भारतीयमतानि इत्येतादृशाः विषयाः भवन्ति स्म। 1894 तमे वर्षे सः न्यूयॉर्कनगरे महत्त्वपूर्णं भाषणद्वयम् अकरोत्। अनन्तरम् अत्रैव तेन वेदान्त सोसायटी ऑफ न्यूयॉर्क इत्यस्याः संस्थायाः आरम्भः कृतः। अत्रैव तस्य प्रसिद्धशिष्येषु अन्यतमया जोसेफाईन-मॅक्लिओड् इत्यनया सः प्रथमवारम् अमिलत्। तस्य केषाञ्चन भक्तानां नामानि अत्र दत्तानि सन्ति - डा. ॲलन डे, मिस्. एस्. एलेन वाल्डो, मिस् मेरी फिलिप्स, प्रोफेसर वायमन्, डा.स्ट्रीट (यः अनन्तरं स्वामिनः सकाशात् संन्यासदीक्षां स्वीकृतवान् स्वामी योगानन्दः इति नाम प्राप्तवान् च), फ्रान्सिस लेगेट्, मिसेस् स्टर्जेस् (अग्रे मिसेस् लेगेट्), डा. एगबर्ट् गर्न्से, तस्य पत्नी च। न्यूयॉर्कराज्ये हडसननदीतटे विद्यमाने रिज्ली मॅनॉर इति लेगेट्महोदयस्य गृहे स्वामी सप्ताहद्वयम् अवसत्।

शिकागोनगरे स्वामिना विवेकानन्देन प्राप्तस्य अभूतपूर्वस्य यशसः वार्ताः 1893 तमे वर्षे नोव्हेम्बरमासतः आरभ्य भारतं प्रति प्राप्ताः। सामान्यतया सर्वे आनन्देन एतस्याः वार्तायाः स्वागतम् अकुर्वन्। 'जगतः अध्यात्मगुरुः' इति तस्य प्रशंसा अभवत्। परन्तु ताभिः वार्ताभिः केचन जनाः खिन्नाः, असूयावन्तः च अभवन्। एतेषां समीपे महत् धनबलं प्रभावजनकं सामर्थ्यं चासीत्। यासु दिनपत्रिकासु तेषां नियन्त्रणम् आसीत् तासु स्वामिना धर्मसंसदि प्राप्तस्य साफल्यस्य निन्दनं तु ते कृतवन्तः एव परन्तु एतदतिरिच्य स्वामिनः जीवनस्य विषये कार्याणां विषये च अवमानकारकम् असत्यं दुष्प्रचारमपि कृतवन्तः। ततोऽधिकं तैः कृतं कुकृत्यं नाम ते अमेरिकायां जनमानसे तस्य प्रभावं न्यूनीकर्तुं तस्य प्रतिमां मलीनीकर्तुं च प्रयत्तवन्तः। स्वामी संन्यासी न अपि तु कापटिकः कश्चन अस्ति इति भावम् अमेरिकायाः दिनपत्रिकासु स्वामिनः प्रशंसकेषु च जनयितुम् अपि ते प्रयत्तवन्तः। सौभाग्येन तेषां निन्द्याः प्रयत्नाः सर्वे व्यर्थाः अभवन्। जनमतं स्वामिनः पक्षे वर्तितम्। तस्य साफल्यस्य निमित्तं समग्रे देशे उत्सवाचरणं प्राचलत्। तस्य अमेरिकादेशीयाः प्रशंसकाः अपि स्वामिनः विरुद्धं

क्रियमाणम् अपायकारकं दुष्प्रचारं स्थगयितुं शक्त्या प्रयत्नान् अकुर्वन्। उदाहरणार्थम्- मिशिगनराज्यस्य भूतपूर्वराज्यपालस्य पत्नी श्रीमती जॉन.जे.बैग्ली इति आसीत्। तस्याः गृहे स्वामी अतिथिरूपेण अवसत्। सा कस्मिंश्चित् पत्रे अलिखत् - 'स्वामिनः परिचयं प्राप्य तेन सह समानगृहे वासेन प्रत्येकं मनुष्यः समीचीनतरः भविष्यति। अमेरिकायाः एकैकोऽपि जनः विवेकानन्दं जानीयात् इति अहम् इच्छामि अपि च भारते यदि एतादृशाः इतोऽपि जनाः सन्ति तर्हि सः देशः तान् अस्मभ्यं प्रेषयतु।'

स्वामिनः विवेकानन्दस्य महत्ता आन्तरिकशक्तिः च सर्वप्रथमं दक्षिणभारतीयैः अभिज्ञाता प्रशस्ता च। तस्य केचन अतिनिष्ठावन्तः शिष्याः दक्षिणभारतीयाः आसन्। अलासिंग पेरुमलः इति तेषु अन्यतमः आसीत्। यदा स्वामिना शिकागोनगरे प्राप्तस्य यशसः वार्ता भारतं प्राप्नोत् तदा अपि सर्वप्रथमं दक्षिणभारते एव तस्य सार्वजनीनसम्माननम् अभवत्। '28-4-1894 इति दिनाङ्के मद्रासनगरे स्वामिनः सत्काराय महती सभा काचित् आयोजिता आसीत्। बहवः विशिष्टाः जनाः तस्याम् उपस्थिताः आसन्। सुब्रह्मण्य-अय्यरः तस्याः सभायाः अध्यक्षः आसीत्। सर रामस्वामी मुदलियारः इति तस्याः सभायाः मुख्यः आयोजकः आसीत्। तदनन्तरं जाता अन्या महत्त्वपूर्णा सभा सप्टेम्बरमासे कोलकातायाम् आसीत्। सर्वविधाभिप्रायवन्तः सामान्यतः चतुस्सहस्रं जनाः तस्यां भागं गृहीतवन्तः। कोलकातानगरस्य प्रसिद्धनागरिकाः अपि तत्र आसन्। राजा प्यारेमोहन मुखर्जी तस्याः अध्यक्षः आसीत्। स्वामिना हिन्दुधर्मस्य भारतीयदर्शनशास्त्रस्य परम्पराणां च निमित्तं यत् महत्कार्यं कृतं तन्निमित्तम् अनेके प्रभावशालिनः जनाः तं प्राशंसन्। 'इण्डियन् नेशन्' इत्यस्य सम्पादकः एन्.एन्. घोषः, सुरेन्द्रनाथ बानर्जी च तयोः भाषणयोः स्वामिनं भृशम् अभिनन्दितवन्तौ। धर्मसंसदि बौद्धमतस्य प्रतिनिधिः यः आसीत् तस्मात् धर्मपालात् अपि विवेकानन्देन अमेरिकायां प्राप्तस्य अनितरसाधारणसाफल्यस्य वार्ता भारतं प्राप्ता। अमेरिकादेशीयैः स्वामिनः यः सत्कारः कृतः तद्विषये सर्वैः हिन्दुभिः अभिमानः अनुभवनीयः इति सः अवोचत्। स्वामिनः भागग्रहणमेव संसदः साफल्याय अधिकतया कारणीभूतम् आसीत्। यद्यपि स्वदेशात् प्राप्ताभिः एतादृग्भिः वार्ताभिः स्वामी हर्षम् अनुभवति स्म तथापि सः कदापि गर्वोन्नतः नाभवत् न वा सन्तोषेण तूष्णीम् उपाविशत्। ये तस्य अपख्यातिं कर्तुम् सर्वाधिकप्रयत्नान् अकुर्वन् तैः सह अपि सः सदयमेव आचरति स्म। एतादृशेषु केनचित् लिखितस्य पुस्तकस्य विषये यदा पत्रिकायां प्रशंसापरः प्रतिस्पन्दः प्रकाशितः तदा स्वामी श्रीमत्यै हेलुवर्यायै प्रेषिते पत्रे अलिखत् - 'मम मित्रस्य पुस्तकस्य विषये उत्तमाभिप्रायस्य दर्शनेन प्रमोदः सञ्जातः। सः महाजनः उत्तमः च अस्ति तथा च अन्यमानवान् बहूपकृतवान् अस्ति।' एतेन पत्रेण स्वामिनः महत्ता करुणामयी उदारमानसिकता च प्रकटिता।

भाषणार्थं क्रियमाणेन निरन्तरप्रवासेन, तस्य समयस्य सतताभियाचनया च यद्यपि



स्वामी अत्यधिकश्रान्तिम् अनुभवन् आसीत् तथापि अमेरिकायां तस्य कार्यम् अन्ववर्तत। ख्रिस्टिन् ग्रीनस्टीडल् इति महिला डेट्रॉइट्नगरे प्रथमवारं तस्य भाषणम् अशृणोत्। अनन्तरकाले भगिनी ख्रिस्टीन् इति नाम्ना सा स्वामिनः प्रसिद्धेषु शिष्येषु अन्यतमा अभवत्। ग्रीनॅक्रे मॅसॅच्युसेट्स् इति स्थाने ह्यूमेन कॉन्फरन्स् इत्येतदर्थं स्वामिनं निमन्त्रितवन्तः। अत्र तेन कतिपयानि महत्त्वपूर्णानि भाषणानि कृतानि। तत्र डा. लेविस् जे. जेम्स इत्यनेन सह तस्य परिचयः अभवत् यः जेम्सवर्यः स्कूल ऑफ कम्पॅरिटिव्ह रिलिजन्स् इत्यस्याः संस्थायाः निदेशकः आसीत् तथा च ब्रूकलिन् एथिकल् असोसिएशन् इत्यस्याः संस्थायाः अध्यक्षः आसीत्। ब्रूकलिन् एथिकल् असोसिएशन् इत्यत्र भाषणमालिकार्थं डा.जेम्सः स्वामिनं निमन्त्रितवान्। स्वामिनः प्रथमभाषणस्य एव सुगभीरः प्रभावः विद्वत्सु वैशिष्ट्यवत्सु श्रोतृषु अभवत्। संन्यासिनः या ख्यातिः तैः श्रुता आसीत् तदपेक्षया सः महत्तरः अस्ति इति तैः सहजतया अङ्गीकृतम्। स्वामिना अत्र कृतानि भाषणानि अमेरिकायां तस्य स्थायिकार्यस्य आरम्भः आसीत्। परन्तु अधुना सः अत्यधिकश्रान्तिं विश्रामस्य अत्यावश्यकतां च अनुभवति स्म। न्यूयॉर्कनगरीया एलिझाबेथ् डचर् इति स्वामिनः शिष्या सेंट लॉरेन्सनदीतटे थाऊझंड आयलँड पार्क् इति तस्याः ग्रीष्मकालीने गृहे विश्रामं कर्तुं स्वामिनं प्रार्थितवती। स्वामी तत्र सप्तसप्ताहान् अतिष्ठत्। कतिपयाः अतिसमर्पणभाववन्तः शिष्याः स्वामिनम् अनुसृत्य तत्र अगच्छन्। अत्र तस्य लघुगणस्य निमित्तं स्वामिना यत्पाठनं कृतं तेन ते तस्मिन् भक्तिमन्तः शिष्याः अभवन्। मेरी लुईस्, लिओन् लॅन्ड्सबर्ग इति तेषु द्वौ संन्यासाश्रमं प्रविष्टवन्तौ। अभयानन्दा कृपानन्दः इति क्रमशः तयोः नामकरणम् अभवत्। थाऊझंड आयलॅंड पार्क् इत्यत्र यापिताः सप्त-सप्ताहाः विवेकानन्दस्य जीवनस्य स्मरणार्हः कालः आसीत्। 'मम सर्वोत्तमा क्षमता तत्र प्रकटिता' इति स्वामिना स्वयमेव कथितम्। खेत्रीस्थानस्य राज्ञे प्रेषिते पत्रे सः अलिखत् - 'एतस्मिन् देशे मया यद् बीजम् उप्तं तस्य सस्यं तु जातम् अस्ति अपि च अचिरादेव तद् वृक्षस्थितिं प्राप्स्यति इति अहम् अपेक्षे। जनानां कतिपयशतानि मम अनुयायिनः जाताः सन्ति। केभ्यश्चित् संन्यासदीक्षां दत्त्वा अत्रत्यं कार्यं तेभ्यः समर्प्य अहं भारतम् आगमिष्यामि।' स्वामिनः स्वप्नः यथार्थतां प्राप्नोत्। एतं विषयम् अङ्गीकुर्वन् जॉन. वाबू. फेन्टनः एनसायक्लोपिडिया ऑफ द अमेरिकन् रिलिजियस् एक्सपिरियन्स् इत्यस्मिन् अलिखत् - विवेकानन्देन आरब्धा वेदान्त सोसायटी इति संस्था 'भारतस्य अध्यात्मसमृद्धिं' प्रददाति स्म। अमेरिकावासिनां दृष्ट्या तस्मिन् विषये 'विशिष्टं किञ्चित् आकर्षणम् आसीत्'। फेन्टनः अग्रे अलिखत् यत् वेदान्त सोसायटी इत्यस्याः मूलधार्मिककल्पनाः एव अन्य हिन्दुधर्मप्रचारान्दोलकैः अनुस्रियन्ते। वेदान्तसंस्थायाः कार्यपद्धतिः एव अमेरिकादेशे हिन्दुमतसम्बद्धानाम् अन्यनिर्यातानाम् आदर्शा अभवत्।

थाउझंड आयलँड पार्कतः प्रत्यागमनात् परम् अचिरादेव विवेकानन्दः नौकायानेन

युरोपं प्रति गमनं निश्चितवान्। ये जनाः पूर्वं तेन सह मिलितवन्तः आसन् तं बहु इच्छन्ति स्म च तेभ्यः सः वैयक्तिकनिमन्त्रणानि बहूनि प्राप्तवान् आसीत्। स्वामिनः दृष्ट्या एतादृशं निमन्त्रणं नाम 'दिव्यम् आह्वानम्' आसीत् यतः स्वस्य कार्यस्य इङ्ग्लण्डं प्रति नयनस्य आन्तरिकीम् इच्छां सः अनुभवन् आसीत्। मम जीवनकार्यं कर्तुं मम समीपे बहुसमयः नावशिष्टः इति पूर्वाशङ्कां काञ्चित् अपि सः अनुभवन् आसीत्। 17-8-1895 इति दिनाङ्के सः युरोपं प्रति प्रातिष्ठत। एकं पक्षं यावत् सः पॅरिसनगरे अतिष्ठत्। तस्य नगरस्य अनेकानि ऐतिहासिकस्थानानि, रम्यां प्रकृतिं च पश्यतः अतिविशिष्टजनैः सह मिलतः च तस्य समयः अत्यन्तानन्देन अतीतः।

पॅरिसतः सः लण्डननगरम् अगच्छत्। मासद्वयात् अधिकं समयम् इङ्ग्लण्डदेशे यापयित्वा 1895 तमस्य वर्षस्य डिसेम्बरमासस्य पूर्वार्धे सः अमेरिकां प्रत्यागच्छत्। इङ्ग्लण्डदेशे तेन तादृशं प्रचण्डं साफल्यं प्राप्तं यस्य तेनापि कदापि कल्पना न कृता आसीत्। ब्रिटिशजनाः भारतीयं संन्यासिनं कञ्चन प्रेम्णा स्वागतीकर्तुं प्रायः न इच्छेयुः, यथार्थतया तं श्रोतुं न इच्छेयुः इति तस्य मनसि आशङ्का आसीत्। परन्तु यत्र यत्र सः अगच्छत् तत्र तत्र तस्य उत्साहेन स्वागतम् अभवत्, श्रोतारः अपि उत्सुकतया तम् अशृण्वन् इति दर्शनेन सः सुखदाश्चर्यान्वितः जातः। लण्डननगरे 'आत्मज्ञानम्' इति तस्य प्रथमभाषणम् अतिसफलम् आसीत्। जनाः मन्त्रमुग्धाः अभवन्। 'सः श्रोतॄन् विद्युत्प्रवाहान्वितान् अकरोत्' इति कश्चन अवदत्। द स्टॅन्डर्ड, द लन्डन डेली क्रॉनिकल, वेस्टमिनिस्टर गॅझेट इति मुख्यासु दिनपत्रिकासु विवेकानन्दस्य स्तुत्या पूर्णानि वृत्तानि प्रकाशितानि। कश्चन वृत्तपत्रप्रतिनिधिः विवेकानन्देन सह मेलनात् परम् अलिखत् - 'तदनन्तरम् अद्यावधि यैः सह मेलनेन अहं सम्मानितः अभवं तादृशेषु पुरुषेषु यः यथार्थतमः पुरुषः आसीत् तम् अहम् आपृष्टवान्।'

10-11-1895 इति दिनाङ्के सीसम् क्लब् इत्यत्र यन्मेलनम् आसीत् तद् सर्वाधिकस्मरणार्हम् आसीत्। सुश्रीः मार्गरेट् नोबल् इति काचित् तत्र उपस्थिता आसीत्। 1867 तमे वर्षे नॉर्दर्न-आयर्लंड इत्यत्र तस्याः जन्म अभवत्। तस्याः पितामहः पिता च प्रोटेस्टन्ट् मन्त्रिणौ आस्तां यौ आयर्लंडदेशस्य स्वातन्त्र्यान्दोलने सक्रियं भागं स्व्यकुरुताम्। यद्यपि स्वामिनः विवेकानन्दस्य दिव्यदर्शनेन कोमलाचरणेन, विद्वत्तया, गभीराध्यात्मिकतया, चुम्बकीयव्यक्तित्वेन च सा गभीरतया प्रभाविता आसीत् तथापि स्वामिनं गुरुरूपेण स्वीकर्तुं तस्याः महान् समयः आवश्यकः अभवत्। सा तं 'मास्टर्' इति निर्दिशति स्म। यथा सर्वे जानन्ति तथा अनन्तरकाले तस्यै भगिनी निवेदिता इति नाम दत्तम्। सा भारतम् आगतवती। सा तस्याः शिष्टं जीवनं गुरोः आदेशानुसारं भारतस्य सम्पूर्णजागरणाय निःस्वार्थतया सेवां कुर्वती अयापयत्। सा यथार्थतया भारतीयानां भगिनी आसीत् ये च तां स्नेहेन भगिनी निवेदिता इति वदन्ति स्म। सा यथार्थरूपेण भारतमातुः पुत्री अपि आसीत्। रवीन्द्रनाथठाकुरः तस्याः वर्णनं 'लोकमाता'



इति शब्देन अकरोत्। अद्य भगिनी निवेदिता इति नाम भारते सर्वज्ञातम् अस्ति।

स्वामी सन्तुष्टेन मनसा इङ्ग्लण्डम् अत्यजत्। भारते कस्मैचित् शिष्याय प्रेषिते पत्रे तेन स्वभावनाः एवं प्रकटिताः - 'इङ्ग्लण्डदेशे मम कार्यं वस्तुतः अतिशोभनम् अस्ति। अग्रिमे सप्ताहे मया इतः गन्तव्यम्। ते अतिदुःखिताः सन्ति।' स्वामिनः भाषणानां परिणामस्य विषये कश्चन वृत्तपत्रप्रतिनिधिः अलिखत् - 'आङ्ग्लभाषिणां वंशे भारतसम्बद्धे यां प्रीतिम् अनुकम्पां च स्वामी सृजन् अस्ति सा भारतस्य प्रगत्यर्थम् अवश्यमेव शक्तिस्तम्भतुल्या भविष्यति।'

6-12-1895 इति दिनाङ्के स्वामी अमेरिकां प्राप्नोत्। तस्य अनुपस्थितौ तस्य शिष्यैः तस्य कार्यम् अनुवर्तितम् आसीत्। स्वामी पुनः कार्यम् आरभत। स्वस्य आरोग्यस्य सौविध्यानां च चिन्ताम् अकृत्वा सः विभिन्नस्थानानि गत्वा भाषणानि अकरोत्। एतस्मिन् अवधौ तेन अनेकानि व्याख्यानानि भाषणानि च कृतानि येषां महत्त्वं वर्णयितुम् अशक्यम्। एतेषु भाषणेषु अनेकांशानाम् अत्युत्तमं स्पष्टीकरणं व्याख्या च कृता आसीत्। स्वामी सामान्यतया लिखितटिप्पणीं विना एव भाषते स्म। अनन्तरमपि टिप्पणीलेखनाय तस्य कदाचिदेव समयः भवति स्म। सौभाग्येन जे.जे. गुडविन् इति लघुलेखकः तस्य भाषणानां टिप्पणीलेखनाय नियुक्तः आसीत्। सः अतीव प्रभाविशैल्या भक्त्या च तत्कार्यम् अकरोत्। अनन्तरकाले सः विवेकानन्दस्य भक्तः अभवत्, तेन सह अमेरिकां, युरोपखण्डं भारतं च अगच्छत्। यदि गुडविन् नाभविष्यत् तर्हि विवेकानन्दस्य लेखनानि नष्टानि अभविष्यन्। एतेन भारतीयवाङ्मयस्य वैश्विकवाङ्मयस्य च विशेषतया दर्शनधर्मयोः क्षेत्रयोः महती हानिः अभविष्यत्।

अमेरिकायां स्वामिनः कार्यं स्थानिकपत्रिकाभिः सम्यगेव प्रशस्तम्। द न्यूयॉर्क् हेराल्डपत्रिकायां लिखितम् आसीत् यत् 'अमेरिकायां विवेकानन्दस्य प्रयत्नाः पर्याप्तप्रमाणेन सफलाः सन्ति' इति। शिक्षाक्षेत्रस्य अत्युन्नतवर्तुलेषु अपि अमेरिकादेशीयेषु विद्वत्सु तस्य प्रभावस्य उल्लेखः अभवत्। हार्वर्ड डिव्हिनिटि स्कूल् इत्यस्य रेव्हरण्ड सी.सी. एव्हरेट् अलिखत् - विवेकानन्देन स्वविषये स्वस्य कार्यस्य विषये च महती रुचिः उत्पादिता अस्ति। हिन्दुविचारः इति विभागापेक्षया आकर्षकतराः अध्ययनविभागाः प्रायः एव केचन स्युः वेदान्तव्यवस्थां याम् अधिकाः जनाः सुदूराम् अवास्तविकीं च मन्यन्ते तस्याः केनचित सजीवेन अत्यधिकबुद्धिमता जनेन क्रियमाणं प्रातिनिध्यं दृष्ट्वा मनः महान्तं प्रमोदम् अनुभवति... एकत्वस्य सत्यस्य वास्तविकता या अस्ति तां पौरस्त्याः अस्मान् बोधयितुं शक्नुवन्ति तथा च तत्कार्यं विवेकानन्दः अतीवपरिणामकारकशैल्या अकरोत् इति वयं तस्य सकार्तज्ञ्यम् ऋणिनः स्मः।' पूर्वपश्चिमयोर्मध्ये कल्पनानाम् आदानप्रदानं स्यादिति विवेकानन्दः सस्नेहम् इच्छति स्म। सः साफल्यं प्राप्नुवन् आसीदिति प्रमाणितं जातमेव।

स्वामी इङ्ग्लण्डतः भारतात् च बहूनि पत्राणि प्राप्नुवन् आसीत् येषु सः प्रत्यागत्य

तस्य कार्यम् अग्रे अनुवर्तयेत् इति उत्कटा प्रार्थना भवति स्म। सः स्वयमपि भारतं प्रतिगन्तुं भृशं वाञ्छति स्म। इङ्ग्लण्डदेशे तेन आरब्धं कार्यम् अवरोधं विना विकसेत् इति व्यवस्थाम् अपि सः कर्तुम् इच्छति स्म। तेन आरब्धस्य कार्यस्य दायित्वं स्वीकर्तुं लण्डनम् आगन्तुं सः पूर्वमेव कञ्चन गुरुबन्धुं प्रार्थितवान् आसीत्।

15-4-1896 इति दिनाङ्के स्वामी नौकया इङ्ग्लण्डं प्रति प्रातिष्ठत। अत्र तस्य जीवनस्य दीप्तिमान् अध्यायः कश्चन समाप्तः अभवत्।

1896 तमे वर्षे सामान्यतया मासत्रयं यावत् स्वामी लण्डननगरे अवसत्। एषः अवधिः अतीवकार्यव्यापृत्या श्रान्त्या च अतीतः। भाषणानि, चर्चाः, साक्षात्काराः, लघुगणमेलनानि च क्रमशः प्रावर्तन्त। यत्र सः अगच्छत् येन सह अमिलत् च तत्र तस्मिन् च तस्य महान् प्रभावः भवति स्म। महान् जर्मनसंस्कृतज्ञः प्राच्यशास्त्रविद् मॅक्समूलरः तस्मिन् समये इङ्ग्लण्डदेशे ऑक्सफोर्डविश्वविद्यालये प्राध्यापकः आसीत्। तेन सह स्वामिविवेकानन्दस्य मेलनं स्मृत्यर्हं भावपूर्णं चासीत्। मॅक्समूलरेण रामकृष्णस्य विषये 'अ रियल् महात्मन्' इति लेखः ततः पूर्वमेव प्रकाशितः आसीत्। विवेकानन्दः तं लेखम् अत्यन्तम् इष्टवान्। रामकृष्णस्य साक्षात् शिष्येण केनचित् मेलनाय मॅक्समूलरः अत्याकुलः आसीत्। 28-5-1896 इति दिनाङ्के मॅक्समूलरस्य ऑक्सफोर्डस्थे वासस्थाने द्वौ अमिलताम्। ब्राह्मसमाजस्य नायकस्य केशवचन्द्रसेनस्य जीवने यानि महापरिवर्तनानि जातानि तेषां पृष्ठतः का शक्तिः आसीत् इति मॅक्समूलरः अपृच्छत्। रामकृष्णं सहस्रशः जनाः भजन्ते इति उत्तरं विवेकानन्दः अवदत्। 'सः नो चेत् कः भजनीयः? इति मॅक्समूलरः प्रत्युत्तरम् अवदत्। सः ऑक्सफोर्डस्य अनेकान् महाविद्यालयान् सुख्यातं बोडलेन्ग्रन्थालयं च स्वामिनं प्रादर्शयत्। तौ एकत्र भोजनं कृतवन्तौ। तदनन्तरं मॅक्समूलरः स्वामिनं रेलस्थानकं प्रति प्रापयत्। एतत्सर्वं सः किमर्थं कृतवान् इति विषयं वर्णयन् सः अकथयत् - परमहंसरामकृष्णस्य शिष्येण सह मेलनं प्रतिदिनं तु न भवति खलु!' यः न केवलः विद्वान् अस्ति अपि तु तादृशः आत्मा अस्ति यः प्रतिदिनं ब्रह्मणा सह ऐक्यस्य अनुभवं प्राप्नोति इति तादृशेन केनचित् मिलित्वा विवेकानन्दः अत्यन्तभावुकः जातः। मॅक्समूलरस्य भारतप्रेम्णा अपि स्वामी प्रभावितः। अतिविशिष्टेन अतिक्रियाशीलेन च मनसा युक्तः मॅक्समूलरः पञ्चाशत्तः अधिकवर्षाणि भारतीयविचारजगति जीवितवान् विचरितवान् च ...। विवेकानन्दः मॅक्समूलरम् अपृच्छत् - भवान् भारतं कदा आगमिष्यति? विवेकानन्दः लिखति - वृद्धस्य ऋषेः मुखं प्रकाशमयम् अभवत्, नेत्रे अश्रुबिन्दुः उत्पन्नः इव आसीत्। शनैः शिरः कम्पयन् तस्य मुखात् मन्दं शब्दाः निःसृताः - 'तदा अहं न प्रत्यागच्छेयम्। भवता भारते एव मम अन्तिमक्रियाः करणीयाः भवेयुः।' सः महान् पण्डितः कदापि भारतं नागच्छत्। तयोः द्वयोः पत्रव्यवहारः आसीत्। दार्शनिकविषयेषु मतभेदेषु सत्सु अपि तयोः उत्तमं सख्यम् आसीत्।

इङ्ग्लण्डदेशे कॅप्टन् जेम्स हेन्री सेवियर् इत्यस्य तस्य पत्न्याः च स्वामिना सह



परिचयः अभवत्। तम् इष्टवन्तौ तौ अचिरादेव तं गुरुरूपेण पुत्ररूपेण च स्वीकृतवन्तौ। स्वामिनः आमन्त्रणम् अङ्गीकृत्य अनन्तरं तौ भारतम् आगत्य स्वामिनः कार्यस्य पूर्त्यर्थं जीवनार्पणं कृतवन्तौ। अवकाशार्थं स्विट्झर्लण्डं प्रति आगमनाय निमन्त्रणानि स्वामिना प्राप्तानि आसन्। तस्य क्षीयमाणस्य आरोग्यस्य दृष्ट्या विश्रान्तिः आवश्यकी एव आसीत्। जगतः सुन्दरतमेषु देशेषु अन्यतमः इति यस्य गणना भवति तं स्विट्झर्लण्डदेशं द्रष्टुं स्वामी अपि अत्युत्सुकः आसीत्। सेवियर्दम्पती हेन्रीएटा म्यूलर च तेन सह गतवन्तः। हिमाच्छन्नशिखरैः जलाशयैः च युक्तस्य तस्य देशस्य अतिरमणीयप्रकृतेः दर्शनेन स्वामी अतिप्रमुदितः। आल्प्सपर्वतैः अभिमुग्धः स्वामी महता उत्साहेन पर्वतारोहणम् अकरोत्। हिमालयस्य हृत्स्थाने मठनिर्माणस्य विचारः प्रथमवारं स्वामिनः मनसि अत्रैव उत्पन्नः। अग्रे यदा अल्मोराजनपदे 1899 तमे वर्षे सेवियर्सदम्पत्योः साहाय्येन मायावत्याम् अद्वैताश्रमस्य स्थापना अभवत् तदा सः स्वप्नः याथार्थ्यं प्रति गतः। स्विट्झर्लण्डमध्ये अनेकानि स्थानानि स्वामिना दृष्टानि किन्तु अप्पर होनव्हॅलीस्थितस्य सासफे इति ग्रामस्य प्राकृतिकसौन्दर्यं स्वामिनः मनः अहरत्। जीवनस्य सर्वाधिकप्रकाशमयानाम् अध्यात्मिकक्षणानाम् अनुभवः स्वामिनः अत्रैव सञ्जातः। स्वामिनः मनोभावः गभीराध्ययनस्य, आन्तरिकविश्लेषणस्य च आसीत्।

स्विट्झर्लण्डतः विवेकानन्दः जर्मनीम् अगच्छत्। हाईडल्बर्ग इति प्राचीननगरं तत्रत्यम् ऐतिहासिकं विश्वविद्यालयं च दृष्ट्वा सः प्रभावितः। जर्मनीदेशे सः कीलविश्वविद्यालयस्य दार्शनिकेन सुख्यातेन जर्मनीदेशीयेन प्राच्यशास्त्रविदुषा प्राध्यापकेन पॉल डॉयसन् इत्यनेन अमिलत्। द्वौ अपि अन्योन्यम् इष्टवन्तौ। तयोः मेलनम् अतिसद्भावपूर्णम् आसीत् यस्मिन् प्रेरणास्पदानां कल्पनानाम् आदानप्रदानम् अभवत्। डॉयसन् स्वामिनम् अकथयत् यत् अध्यात्मस्य उत्सेकं प्रतिगन्तुम् आन्दोलनमेकम् आरब्धम् अस्ति। एतेन आन्दोलनेन प्रायः भविष्यत्काले भारतदेशः जगतः अनेकदेशानाम् अध्यात्मिकनायकः भविष्यति यस्य च पृथिव्याम् उन्नततमः महत्तमः च प्रभावः भविष्यति।' स्वामिना डॉयसनेन सह सुदीर्घः समयः यापितः। तेन समीपस्थानि बहूनि आकर्षकाणि स्थानानि स्वामिने प्रदर्शितानि। तयोर्मध्ये उत्तमः सख्यभावः उत्पन्नः। अन्यानि कानिचन जर्मनदेशीयानि नगराणि दृष्ट्वा 1896 तमे वर्षे सप्टेम्बरमासे स्वामी इङ्ग्लण्डं प्रत्यागच्छत्।

लण्डननगरे स्वामी पुनः कार्यम् आरब्धवान्। सः व्याख्यानानि करोति स्म, गणशः कक्ष्याः चालयति स्म, बहुभिः महत्त्वपूर्णजनैः सह चर्चात्मकमेलनानि करोति स्म च। तस्य भाषणानां कक्ष्याणां च निमित्तम् आगन्तॄणां संख्या वर्धमाना एव आसीत्। सन्तुष्टः स्वामी पत्रे अलिखत् - 'अत्र इङ्ग्लण्डदेशे कार्याणि समीचीनतया प्रचलन्ति इत्येषः लाभदायिविषयः अस्ति। कार्यं केवलं लोकप्रियं न अपि तु आदरणीयम् अस्ति।' एवं सत्यपि सम्पूर्णावधौ तस्य मनः भारते एव आसीत्। तस्य गुरुबन्धूनां कार्याणि

कथं प्रचलन्ति, श्रीरामकृष्णस्य सन्देशः जनान् प्रति कथं नीयमानः अस्ति, तस्य वास्तविकजीवने क्रियान्वयनाय कीदृशः प्रयत्नः क्रियमाणः अस्ति इत्यादीन् विषयान् आधारीकृत्य आकुलाः पृच्छाः सः अकरोत्। सः तेभ्यः उपदेशान् सूचनाः च प्रेषयन् आसीत्। क्रेम्ब्रिजमध्ये द्वाभ्यां विख्यातभारतीयाभ्यां सह मेलनेन सः अतीव सन्तुष्टः। तौ द्वौ आस्ताम् - राजपुत्रः रणजितसिंहः यः विख्यातक्रिकेटक्रीडालुः आसीत् तथा च अतुलचन्द्र चटर्जी यः तीक्ष्णबुद्धिमान् विद्वान् आसीत्। कस्मिन् अपि क्षेत्रे भारतीयानां साफल्यं दृष्टवान् स्वामी तद्विषये महतीं रुचिं गर्वं च अनुभवति स्म। कस्मिंश्चित् रात्रिभोजने पानात् पूर्वं भारताय धन्यवादसमर्पणाय क्रियमाणे कथने सः अत्यन्ताशया अवदत् - 'वस्तूनि उत्तिष्ठन्ति नष्टानि भवन्ति च। उन्नत्यवनती समग्रजगति व्याप्ते स्तः। यद्यपि अद्य भारतस्य अधः पतनं जातमस्ति तथापि तस्य उन्नतिः निश्चिता एव।' प्रोत्साहनपरस्य कोलाहलस्य मध्ये एव स्वामी स्वीयं विश्वासं पुनः प्राकटयत् - अवसादस्य अधः पतनस्य अवधिः इतः पूर्वम् अपि आसीत्, परन्तु दीर्घावधौ भारतदेशः सदैव जयं प्राप्नोत्, भविष्यत्काले अपि पुनरेकवारं तथैव भविष्यति।' विवेकानन्दस्य एतद् धैर्यपूर्णं चिन्तनमेव भारतीययुवजनानाम् इष्टम् अभवत्, देशभक्तेः प्रखरभावनां तेषु अपूरयत् च।

भारतं प्रति गमनस्य निश्चयः विवेकान्देन कृतः एव आसीत्। सेवियर्दम्पती गुडविनः च भारतं प्रति नेतव्याः इति तस्य योजना आसीत्। नेपल्सतः सिलोनं प्रति नौकायानेन गमनं निश्चितम्। डिसेम्बरमासस्य चतुर्दशदिनाङ्के सः अन्तिमभाषणम् अकरोत्। तस्य मेलनस्य विषये 'इण्डियन् मिरर' इत्यस्य प्रतिनिधिः अलिखत् यत् इङ्ग्लण्डदेशे विवेकानन्दस्य कार्यं जनमनसि कामपि दुष्टभावनां विशिष्टमतवादं वा न अजनयत्। सः विवरणम् अकरोत् - एतस्य कारणं सरलमस्ति, तस्य शक्तिः च महती अस्ति। स्वामी विशिष्टमतवादी न। सः धर्मस्य संवर्धकः अस्ति, एकस्य कस्यचित् मतस्य न। धर्मस्य विशालक्षेत्रे एकैकस्य बिन्दोः प्रतिपादकाः तेन सह कलहार्थं किमपि न प्राप्नुवन्ति...'

लण्डनतः प्रस्थानतः पूर्वदिने तस्मिन् नगरे तस्य अतीवभावपूर्णः आप्रच्छनकार्यक्रमः अभवत्। सुदूरतः जनाः तत्कार्यक्रमार्थम् आगताः। एरिक् हॅमन्डः यः तद्दिनस्य कार्यक्रमं स्वयम् अपश्यत् सः अलिखत् - 'अनेके जिह्वाबन्धनम् इव अनुभवन्तः मौनम् आसन्। तेषां हृदयानि खिन्नानि आसन्। केषाञ्चन नेत्रयोः अश्रुबिन्दवः उत्पन्नप्रायाः आसन्। बहिः यः खेदः अन्धकारः च व्याप्तः आसीत् सः अन्तर्भागस्य खेदान्धकाराभ्यां तीव्रतरः जातः आसीत्। एकः एव आकारः, एका एव व्यक्तिः प्रकाशमानस्य पीतवर्णस्य वस्त्राणि धृत्वा दुःखेन सह युद्ध्वा तद् पराजित्य अटति स्म। सूर्यप्रकाशस्य सजीवकिरणः इव स्वामी जनेषु सञ्चरन् आसीत्।'

विवेकानन्दः तस्य सहप्रवासिनः च रेलयानेन नेपल्सतः गमनसमये मार्गे मिलन,



पिसा, फ्लोरेन्स, रोम इत्यादीनि इटलीदेशीयानि स्थानानि अपश्यन्। विवेकानन्दः य उत्कटः इतिहासपाठकः आसीत्, मानवीयसभ्यतानां विकासस्य, ज्ञानस्य नवसृष्टेः च क्षेत्रे मानवेन कृतसाधनानां च विषये अतीवरुचिमान् च आसीत् सः इटलीदेशस्य मनोहारिणः ऐतिहासिकनिधीन्, चित्राणि, शिल्पानि, भवनानि च सश्लाघम् अपश्यत्।

30-12-1896 इति दिनाङ्के नेपल्सतः स्वामी विवेकानन्दः नौकायानेन प्रस्थितः। प्रिन्झ रिजेन्ट ल्युईट्पोल्ड इत्याख्या सा नौका 1897 तमे वर्षे जनवरीमासस्य पञ्चदशदिनाङ्के कोलम्बोनगरं प्राप्नोत्।

# गृहागमनम्

विवेकानन्दः आगमिष्यति इति वार्तया कोलम्बोनगरे अत्यन्तानन्दस्य उत्साहस्य च वातावरणं प्रसृतम्। यदा सः यानात् अवतीर्णः तदा शतशः जनाः आनन्दादरयोः अभूतपूर्वं प्रकटनं कुर्वन्तः तस्मै स्वागतम् अकथयन्। कोलम्बोस्वागतसमित्या कृते सम्बोधने सः हिन्दुधर्मस्य अध्यात्मस्य च पश्चिमजगति सुष्ठु प्रतिपादिका दैवी शक्तिः इति प्रशस्तः। कोलम्बोनगरे यत्र सः उषितवान् तत्स्थानं तीर्थस्थानम् इव सञ्जातम्। तदनन्तरं तस्य स्थानस्य 'विवेकानन्द लॉज' इति नाम अभवत्। कॅन्डी तथा च जाफना इति नगरयोः अपि कोलम्बोनगरवदेव स्वागतं तेन प्राप्तम्। जाफनानगरे जाते कार्यक्रमे जनानां संख्याधिक्यत्वात् शतशः जनैः सभागृहात बहिः स्थातव्यम् अभवत्। तत्र हिन्दवः, बौद्धाः, क्रैस्तवाः, मुस्लिमाः, अन्यमतीयाः च जनाः उपस्थिताः। पश्चिमे स्वामिना प्राप्तेन यशसा प्रजानां सर्वविभागीयाः जनाः प्रेरणां प्राप्नुवन् इति स्पष्टमेव। जनाः स्वामिनि आदरस्नेहयोः तादृशीं वृष्टिम् अकुर्वन् यत् तस्य सहचरः कश्चन अवदत् - 'यदि सः सिलोने ततोऽधिकम् अस्थास्यत् तर्हि जनानां दयया एव सः मारितः अभविष्यत्।'

अन्ते 26-1-1897 इति दिनाङ्के स्वामी भारतस्य समुद्रतटं प्राप्नोत्। पाम्बन् रोड्स् इत्यत्र तस्य आगमनानन्तरं रामनाडस्य राजा तस्मै प्रथमं स्वागतं व्याहरत्। तस्य आगमनेन स्वामिना विशिष्टानन्दः अनुभूतः यतः सः राजा एव स्वामी पश्चिमं गच्छेत् इति प्रथमवारं सूचितवान् आसीत्। पाम्बने जनाः स्वेच्छया यादृशेन असीमोत्साहेन हर्षोन्मादेन च स्वामिनं स्वागतीकृतवन्तः सा घटना तु कल्पनालोकस्य कथा काचित् इव एव आसीत्। पश्चिमे प्राप्तसाफल्यः विवेकानन्दः भारतभूमौ यत्र प्रथमवारं पदं निहितवान् तस्मिन् स्थाने रामनाडस्य राजा विजयस्मारकमेकं निर्मापितवान्। समग्रदक्षिणभारते स्नेहमयः निरन्तरः अधिकारभावः कश्चन आसीत्। प्रत्येकं भागः अस्माकं प्रदेशे तस्य आगमनस्य आग्रता अस्ति इति वदति स्म। जनाः तस्य विषये यथार्थस्य आदरभावस्य प्रशंसाभावस्य च यत् अमर्यादितं प्रदर्शनं कुर्वन्ति स्म तस्य



प्रतिस्पन्दनाय तेन बहूनि नगराणि कार्यक्रमान् च गत्वा भाषणानि करणीयानि अभवन्। एवं कुर्वन् सः फेब्रवरीमासस्य षष्ठे दिनाङ्के मद्रासं प्राप्नोत्।

मद्रासनगरे स्वामिनः यादृशम् अत्युत्तमं स्वागतम् अभवत् तादृशं तेन नगरेण अदृष्टपूर्वम् आसीत्। यः 'राष्ट्रनायकः' पाश्चात्त्यजगत् जित्वा चतुर्णां वर्षाणाम् अनन्तरं प्रत्यागतः आसीत् तद्विषये आदरं प्रकटयितुं सम्पूर्णनगरं निरन्तरोत्सवभावेन उद्दीप्तम् आसीत्। यद्यपि एतद् स्वागतम् अद्भुतम् आसीत् तथापि स्वामिनः शारीरकस्थितिः अतिश्रान्तावस्थायाः आसीत्। सः कोलकातां तन्नगरं प्रतिगन्तुं कामयते स्म यत्र तस्य वर्धनम् अभवत् यत्र च तस्य गुरुबन्धवः तेषां नायकस्य प्रतिस्वीकरणाय प्रतीक्षारताः आसन्। वस्तुतः पश्यामः चेत् स्वामी उपसप्तवर्षाणाम् अनन्तरं गृहम् आगच्छन् आसीत्। सः 1890 तमे वर्षे भ्रमणाय मठम् अत्यजत्। तथापि असंख्यानां भक्तानां प्रशंसकानां जनानां च इच्छापूर्त्यर्थं तेन मद्रासनगरे बहूनि दिनानि यापनीयानि अभवन्। यः स्वामिनं तस्य कार्यं च बहु श्लाघते स्म तस्य बाल-गङ्गाधर-तिलकस्य पुणेनगरं प्रति आगमनस्य निमन्त्रणं स्वामी स्वीकर्तुं न अशक्नोत्। परन्तु मद्रास्नगरे यापितानि एतानि दिनानि स्वामिनः जीवनस्य सुफलदायिदिनानि अभवन्। एतस्मिन् तस्य जीवनस्य महत्त्वपूर्णतमानि भाषणानि तेन कृतानि। मम प्रचारयोजना, भारतस्य ऋषयः, भारतीयजीवने वेदान्ततत्त्वानां प्रयोगः, भारतस्य भविष्यत्कालः, अस्माकं सम्मुखे विद्यमानं कार्यम् इत्येतेषु विषयेषु भाषमाणस्य तस्य सर्वोत्तमक्षमता प्रकटिता।

नौकायानेन कोलकातां प्रति प्रस्थितः स्वामी (कोलकातासमीपस्थं) बजबज इति स्थानं फेब्रवरीमासस्य अष्टादशदिनाङ्के प्राप्नोत्। अग्रिमदिने सः कोलकातां गन्तुं रेलयाने उपाविशत्। सियालदाहरेलस्थानके तस्य जातं स्वागतं तथा च तदनन्तरं यज्जातं तस्य कल्पनां कर्तुं काठिन्यं न स्यात् कस्यचिदपि राजकुटुम्बस्य शोभाबजारस्थे राजभवने तस्य प्रचण्डस्वागतम् अभवत्। तस्मिन् कार्यक्रमे शतशः जनाः उपस्थिताः आसन्। यः जगति मातृभूमेः औन्नत्यम् अवर्धयत्, भारतस्य नष्टां प्रतिष्ठां प्रत्यानयत् सः 'भारतस्य दूतः' इति तस्य प्रशंसा अभवत्। प्रत्युत्तररूपेण स्वामी अकथयत् - हे भ्रातरः अहं भवतां सम्मुखे संन्यासिरूपेण न, बोधकरूपेण न अपि तु तस्य कोलकाताबालस्य रूपेण आगतः अस्मि यं भवन्तः जानन्ति स्म। धर्मसंसद् इति महत्प्रकरणम् आसीत् इति तु निःसंशयं कथयितुं शक्यते, किन्तु तत्तु द्वारमात्रम् आसीत्। सः भावनाभिः परिपूर्णतया रामकृष्णस्य उल्लेखं - 'यस्मात् अहं सर्वमपि अधीतवान् सः मम गुरुः, मम स्वामी, मम नायकः, मम आदर्शः, मम जीवनदेवः इत्यकरोत्। अन्ते भारतीयानां साक्षात् आह्वानम् अकरोत् सः - 'विस्तारः जीवनस्य चिह्नम् अस्ति। वयम् अवश्यं बहिः गच्छेम, विस्तरेम, सजीवत्वं प्रदर्शयेम नो चेत् अधोगतिं दुरवस्थां च प्राप्य म्रियेमहि।' सः साग्रहम् अकथयत् - भारतेन पश्चिमतः बहवः विषयाः पठनीयाः सन्ति किन्तु समकाले भारतस्य समीपे दातुमपि बहवः विषयाः सन्ति। तेषु महत्त्वपूर्णतमः

विषयः अस्ति भारतस्य अध्यात्मशास्त्रम्।' भारतस्य युवकान् सः अकथयत् - 'उत्तिष्ठत, जाग्रत यतः समयः सुफलदायी अस्ति।' कोलकातानगरं स्वामिनः विवेकानन्दस्य निमित्तम् उत्साहस्य ज्वरेण ग्रस्तम् इव आसीत्।

पञ्चवर्षाणाम् अनन्तरं विवेकानन्दः भारतं प्रत्यागच्छत्। यदा सः अमेरिकाम् अगच्छत् तदा सः अख्यातः युवसंन्यासिमात्रम् आसीत्। केवलाः केचन जनाः ये तस्य परिचयं प्राप्तवन्तः आसन् ते एव तस्मिन् विद्यमानं शक्तिस्रोतः, तस्य सुप्तक्षमताः च स्वल्पं जानन्ति स्म। सः भारतस्य राष्ट्रनायकरूपेण, मार्गदर्शकरूपेण च प्रत्यागतः। 1892 तमस्य वर्षस्य विवेकानन्दः 1897 तमस्य वर्षस्य विवेकानन्दात् कथं भिन्नः आसीत् इति प्रश्नः मद्रासस्य के.एस्.रामस्वामिशास्त्रिणः मनसि उत्पन्नः। तस्य स्मरणेषु सः अलिखत् - 1892 तमे वर्षे एवं भासते स्म यत् दैवेन सह तस्य मेलनं निश्चितम् अस्ति किन्तु तद् कदा, कुत्र, कथं च भविष्यति इति सः न जानाति स्म। किन्तु 1897 तमे वर्षे तस्य दैवमेलनम् अभवत् तथा च तस्य जीवनकार्यं किमस्ति, तत्पूर्णं भविष्यति च इति तस्य ज्ञानम् अस्ति इव सः दृश्यते स्म। तेन पूर्वनिश्चिते पथि सः अस्खलिततया चलन् आज्ञाः यच्छन् च अगच्छत्। तस्य आज्ञापालनं भविष्यति इति निश्चितज्ञानं तस्य आसीत्।' स्वामिनः व्यक्तित्वस्य, तस्य मनसि तस्मिन् समये किं प्रचलति स्म इत्यस्य च अत्यन्तं मर्मग्राहि निरीक्षणम् अस्ति एतद्। कोलकातागन्त्र्यां नौकायाम् उपवेशनात् प्राक् स्वामिनं जनाः अपृच्छन् - 'किं वयं भवन्तं पुनः द्रक्ष्यामः? किं भवान् दक्षिणभारते भवतः कार्यम् अग्रे नेष्यति?' स्वामिना उक्तम् - निःसंशयम् आगमिष्यामि। हिमालयप्रदेशे स्वल्पं कालं विश्रम्य अहं गिरिशिखरात् स्खलन् हिमराशिरिव समग्रदेशे स्फोटितः भविष्यामि।' स्वामी एतत्सर्वं वस्तुतः कर्तुं वाञ्छति स्म तथा च जनजागरणाय योजनारचने व्यग्रः आसीदिति तस्य मद्रासभाषणेभ्यः स्पष्टं भवति।

अमेरिकावास्तव्ये अपि विवेकानन्दः रामकृष्णस्य शिष्यान् सङ्घटय्य भारते संन्यासिनां तादृशीं काञ्चित् व्यवस्थां रचयितुं चिन्तयति स्म ये च संन्यासिनः अन्येषां निमित्तं स्वजीवनम् अर्पयेयुः। दुःखितानां निःस्वार्थसेवायाः श्रीरामकृष्णस्य सन्देशः जीवने कथम् आचरणीयः इति ते जनान् प्रदर्शयेयुः। सामान्यजनानाम् उन्नतिं साधयन्तः ते रामकृष्णस्य उपदेशानां प्रचारेण जनानां धार्मिकं पुनर्नवीकरणं घटयेरन्। सः गुरुबन्धुभिः सह स्वकल्पनानां कार्ययोजनायाः च चर्चाम् अकरोत्। आरम्भे स्वामिनः नवकल्पनाः याः तेषां वैयक्तिकमोक्षप्राप्तेः इच्छातः भिन्नाः आसन् तद्विषये गुरुबन्धूनां मनसि संशयाः आसन्, किन्तु अनन्तरं द्वयोर्मध्ये विरोधः कोऽपि नास्ति इति ते अवागच्छन्। स्वामिनः सूचनानाम् उपदेशस्य च पालनं ते अङ्ग्यकुर्वन्। तदनन्तरं तेषु केचन वेदान्तशिक्षणस्य नवीनकेन्द्राणाम् आरम्भार्थं तथा च यत्र साहाय्यम् आवश्यकम् आसीत् तत्र सहायताकार्याय प्रेषिताः। एतन्मध्ये स्वामिनः आरोग्यं चिन्ताजनकम् अभवत्। वैद्याः तं पूर्णविश्रान्तिम् आदिशन्। सः कतिपयदिनानां निमित्तं दार्जिलिङ्गम् अगच्छत्।



तत्र सः पर्वतेषु अटनम् अकरोत्। मित्रैः सह सम्भाषणम् अकरोत्, घण्टाः यावत् ध्यानम् अकरोत् च। वैद्याः तं 'मस्तिष्कविश्रान्तिम्' अपि आदिष्टवन्तः आसन्, किन्तु तद् तत्कृते अशक्यम् आसीत्। तस्य बहुमुखयोजनानां क्रियान्वयनविषये सः सततं चिन्तयति स्म। मम महत्त्वपूर्णकल्पनानां क्रियान्वयनाय मत्सविधे अधिकसमयः अवशिष्टः नास्ति इति ज्ञानवान् सः त्वरायाम् आसीत्। तस्य गुरुबन्धुं स्वामिनं तुरीयानन्दं सः दार्जिलिङ्गे अकथयत् - 'अहं संन्यासव्यवस्थां समग्रतया परिवर्तयिष्यामि।' दार्जिलिङ्गतः कोलकातां प्रत्यागत्य अचिरादेव स्वामी एतत् पदं न्यक्षिपत्।

तदनन्तरं 'मे' मासस्य तद्दिनम् आगतम्। श्रमिकाणां सम्मानार्थं यस्मिन् दिने अन्ताराष्ट्रियः विरामः भवति मेमासस्य तस्मात् दिनात् भारते सङ्घटितान्दोलनस्य आरम्भः च जातः तद्दिनम् अतिविशिष्टं महत्त्वपूर्णं चासीत्। 1-5-1897 इति दिनाङ्के रामकृष्णशिष्यस्य बलरामबसोः कोलकातागृहे स्वामी विवेकानन्दः रामकृष्णस्य संन्यासिशिष्याणाम् अन्यशिष्याणां च एकं मेलनम् आयोजयत्। रामकृष्णस्य नाम्ना एकस्य सङ्घटनस्य आरम्भः करणीयः इति सः आगतान् जनान् अकथयत्। उपस्थिताः सर्वे सानन्दम् एतं प्रस्तावम् अङ्ग्यकुर्वन्। एवं 'रामकृष्ण मिशन् संस्था' आरब्धा। तस्याः उद्देशाः कार्यक्रमाः च एवम्प्रकारकाः आसन् -

(अ) रामकृष्णेन यानि सत्यानि उपदिष्टानि स्वजीवने आचरितानि च तानि मानवानां हिताय प्रचारणीयानि। मानवानां व्यावहारिकमानसिकाध्यात्मिकप्रगत्यर्थम् एतेषां सत्यानां व्यवहारे आचरणम् आवश्यकम्।

(आ) सर्वाणि धर्ममतानि एकस्य एव अमरस्य शाश्वतधर्मस्य विविधरूपाणि सन्ति इति ज्ञात्वा विभिन्नमतानाम् अनुयायिषु भ्रातृत्वभावस्य निर्माणाय कार्यकरणम्।

(इ) सामान्यजनानां भौतिकहितम् अध्यात्मिकहितं च येन सुकरं भवेत् तादृशयोः ज्ञानविज्ञानयोः तान् पाठयितुं समर्थानां पुरुषाणां प्रशिक्षणम्।

(ई) कलावाणिज्ययोः प्रोत्साहनम् उपलब्धता च।

(उ) श्रीरामकृष्णस्य जीवने याः वेदान्तसम्बद्धाः अन्यमतसम्बद्धाः च कल्पनाः स्पष्टीकृताः अभवन् तासां सामान्यजनानां परिचयकारणं तासां प्रचारश्च।

एतस्याः संस्थायाः एकः विदेशविभागः अपि भविष्यति यः भारतस्य विदेशानां च अन्योन्यावगमनं साधयितुं तान् अन्योन्यस्य निकटम् आनेतुं प्रयतेत।

रामकृष्णव्यवस्थायाः वर्तमानं मुख्यकेन्द्रं यदस्ति तस्य बेलूरमठस्य स्थापना स्वामिना विवेकानन्देन 1899 तमे वर्षे कृता। संन्यासिनाम् अध्यात्मप्रशिक्षणं तथा च याभिः विधाभिः मानवानां सेवां कर्तुं शक्यते तासु विधासु संन्यासिनां प्रशिक्षणम् इत्येते मठस्य मुख्यप्रयोजने आस्ताम्। अचिरादेव रामकृष्ण मिशन् असोसिएशन् इति संस्थायाः पृथक्संस्थारूपेण कार्यं स्थगितम्। रामकृष्ण मिशन् इत्याख्या पृथक् एका संस्था आरब्धा

या निर्धनेभ्यः धनदानस्य, कष्टे विद्यमानानां साहाय्यस्य, शिक्षणस्य, मतप्रचारस्य च कार्यं करोति। स्वामिनः मृत्योः सप्तवर्षाणाम् अनन्तरं तन्नाम 1909 तमे वर्षे तस्याः पञ्जीकरणम् अभवत्। यद्यपि रामकृष्ण मठः, मिशन् इति विधिदृष्ट्या रामकृष्णव्यवस्थायाः आन्दोलनस्य च द्वे पृथक् शाखे स्तः तथापि वस्तुतः तयोः ऐक्यम् अस्ति। द्वे अपि दरिद्राणां कष्टे विद्यमानानां च साहाय्यस्य कार्यं कुरुतः। मठः जनानाम् अध्यात्मिकविकासे अधिकावधानं करोति। मिशन् तु जनहितकार्येषु अवधानं करोति। द्वयोः अपि लक्ष्यम् एकमेव अस्ति तच्च अस्ति पूजायाः भावनया जगतः हिताय कार्यकरणं येन प्रत्येकमपि जनः मुक्ते मार्गे अपि अग्रे गच्छेत्। मठस्य मिशन् इत्यस्य च मुख्यालयः बेलूरमठे एव अस्ति।

भगिनी निवेदिता अलिखत् - रामकृष्ण मिशन् (मठः मिशन् च एतेन एव नाम्ना सुख्यातम् अस्ति) इति संस्था नाम भारतस्य राष्ट्रियजीवने अनेकान्दोलनानां स्वरबद्धा रचना काचित् अस्ति। पुनरुत्थितस्य भारतस्य यत् चित्रं विवेकानन्दस्य मनसि आसीत् तस्मिन् कार्ये मिशन्संस्थायाः भूमिका अतिप्रधाना आसीत्। रामकृष्णमिशन् इति संस्थायाः आरम्भात् परं शीघ्रमेव तस्य कार्याणां विषये प्रशंसापराणि लेखनानि भारतीयपत्रिकासु आगतानि। सर्वकारीयवृत्तेषु अपि मिशन्संस्थायाः सेवाकार्याणि साहाय्यकार्याणि च 'समीचीनः उद्देशपाठः' इति वर्णितानि। मिशन्संस्थायाः कार्येण अन्ये अपि प्रभाविताः प्रेरिताः च। तस्याः आदर्शाधारिताः अनेकाः सेवासंस्थाः आरब्धाः।

यद्यपि स्वामिनः मूलः उद्देशः अल्मोरायां विश्रान्तेः आरोग्यसम्पादनस्य च आसीत् तथापि अग्रिमेषु अनेकेषु मासेषु सः समग्रे उत्तरभारते महासङ्ख्यया भाषणानि कुर्वन् अटितवान्। आल्मोरायां स्वल्पं कालं स्थित्वा पञ्जाबकाश्मीरयोः प्रवासं कृतवान्। तत्र सः मुस्लिमब्राह्मसमाजार्यसमाजादीनाम् अनुयायिभिः सह अन्यमतानुयायिभिः सह च चर्चाः अकरोत्। अम्बालायां सः हिन्दुमुस्लिमविद्यालयं बुद्ध्या अगच्छत् यतः द्वयोः भारतीयसमुदाययोः ऐक्यभावं प्रदर्शयति स्म सः विद्यालयः। पञ्जाबे तस्य लक्ष्यं मुख्यतया परस्परं शत्रुत्वभाववत्सु समुदायेषु शान्तेः ऐक्यस्य च प्रस्थापनम् इत्येवं आसीत्। लाहोरे सः तीर्थरामगोस्वामी इति स्थानिकमहाविद्यालयस्य गणितशिक्षकेण अमिलत्। सः स्वामिनम् ऐच्छत् अतः संन्यासं स्व्यकरोत् तथा च स्वामी रामतीर्थः इति नाम प्राप्नोत्। रामतीर्थः अनन्तरकाले भारते अमेरिकायां च वेदान्तम् अपाठयत् सुख्यातः च अभवत्। विवेकानन्दः राजस्थानमपि अगच्छत्। सर्वत्र तस्य उत्साहेन स्वागतम् अभवत्। बहुभिः जनैः सह तस्य धर्मविषये भारतस्य पुनरुत्थानविषये च ज्ञानप्रदाः चर्चाः अभवन्।

1898 तमे वर्षे जनवरीमासे सः कोलकातां प्रत्यागच्छत्। नूतनमठस्य निमित्तं बेलूरे (हावरा) भूमिः क्रीता। अग्रे तस्मिन् वर्षे डिसेम्बरमासे नवमदिनाङ्के मठस्य स्थापना अभवत्। अन्या काचित् महत्त्वपूर्णा घटना आसीत् - हावरायां रामकृष्णपुरे 6-2-1898



इति दिनाङ्के नवगोपालघोषस्य गृहे रामकृष्णस्य प्रतिमायाः स्थापना इति। नवगोपालः, तस्य पत्नी निस्तरिणी च रामकृष्णस्य गृहस्थभक्तौ आस्ताम्। तौ प्रतिमास्थापनं कर्तुं स्वामिनं प्रार्थितवन्तौ। एतस्मिन् सन्दर्भे एव स्वामी रामकृष्णप्रणामः इति संस्कृतस्तोत्रम् अरचयत् यस्य अधुना रामकृष्णमठस्य संन्यासिनः अन्ये भक्ताः च पठनं कुर्वन्ति।

स्वामिनः कार्यार्थं स्वं समर्पयितुं मागरिट् नोबल् भारतागमनस्य इच्छां प्रकटितवती आसीत्। तस्यै अङ्गीकारं सूचयन् स्वामी पत्रम् अलिखत् - भारतस्य कार्ये भवत्याः भविष्यत्कालः अत्युज्ज्वलः अस्ति इति मम पूर्णविश्वासः अस्ति। अत्र पुरुषस्य न, अपि तु महिलायाः कस्याश्चित् तत्रापि वास्तविकसिंह्याः आवश्यकता आसीत्। विशेषतया भारतीयमहिलानां कार्यार्थम्।' श्रीमती ओले बुल तथा च जोसेफाइन मॅक्लिओड् अपि एतादृशस्य कार्यस्य निमित्तं भारतम् आगन्तुम् इच्छां प्रकटितवत्यौ आस्ताम्। 1898 तमस्य वर्षस्य आरम्भभागे तिस्रः अपि कोलकातां प्राप्नुवन्। कोलकातानगरीयाणां कृते मागरिट् नोबल् इत्यस्याः परिचयः स्वामिना 'इङ्ग्लण्डदेशस्य भारताय उपायनम्' इति कारितः। संन्यासदीक्षां प्राप्तवत्याः तस्याः नाम निवेदिता इति जातम्। परन्तु तस्मिन् समये वैदेशिकभक्तानां तत्रापि विशेषतया महिलानां कोलकातायाः वातावरणस्य अभ्यासे कतिपयव्यावहारिकसमस्याः आसन्। यस्य तासाम् अभ्यासः आसीत् तस्य पश्चिमजगतः आवासव्यवस्थातः सामाजिकार्थिकपर्यावरणतः च भारतस्य व्यवस्थाः भिन्नाः आसन्। भारतीयव्यवस्थायाः स्वीकारः तासां कृते सरलः नासीत्। परम्परानिष्ठा चिन्तनरीतिः यस्य आसीत् तस्य समाजस्य द्वारा तासां विशेषतया वैदेशिकीनां स्वीकारः इति अन्या काचित् समस्या आसीत्। परन्तु स्वामिनः प्रशिक्षणं, सुचिन्तितं स्नेहमयम् अवधानं, शिष्याणां पूर्णसमर्पणभावः, गुरौ तस्य प्रशिक्षणे च पूर्णविश्वासः इत्यादीनां द्वारा अचिरादेव समस्यानां निवारणम् अभवत्। 'स्वामिन्', अहं कया पद्धत्या भवतः सर्वोत्तमां सेवां कर्तुं शक्नोमि?' इति प्रश्नस्य उत्तरं स्वामिना कथितम् - 'भारते स्निह्यतु।' स्वामिना यथा उपदिष्टं तथैव ताभिः सर्वाभिः पूर्णमनसा कृतम्। एतद्विषये शारदादेव्याः प्रदानमपि न न्यूनम्। महिलाभक्तानां पुत्रीरूपेण स्वीकारं कृत्वा स्नेहेन ताः स्वगृहे स्थापयित्वा च सा परम्परावादिनां निन्दनं स्थगितवती।

स्वामिनः सामान्यजनेषु गभीरस्नेहः, तेषां विषये चिन्ता तेषां सेवार्थं यत्कर्तुं शक्यते तत्सर्वं कर्तुं तस्य दृढनिर्णयः च तदा प्रकटिताः अभवन् यदा कोलकातायां सर्वत्र प्लेगरोगः प्रसृतः। जनाः भयेन पलायन्ते स्म। रोगग्रस्ताः दुरवस्थायाम् आसन्। 'सपदि सहायताकार्यम् आरभ्यताम्' इति स्वामी रामकृष्णमिशन्संस्थाम् असूचयत्। यदा कश्चन गुरुबन्धुः तन्निमित्तं धनं कुतः आगमिष्यति इति अपृच्छत् तदा कुपितः स्वामी उदतरत् - 'यदि आवश्यकता भविष्यति तर्हि वयं मठस्य निमित्तं क्रीतां नूतनां भूमिं विक्रेष्यामहे। वयं संन्यासिनः स्मः। अस्माभिः वृक्षस्य छायायां शेतुं, दैनिकभिक्षया जीवितुं च सदा सज्जैः स्थातव्यं यथा अस्माभिः पूर्वं क्रियते स्म तथा। मठस्य विषये,

अस्मदीयानां वस्तूनां विषये च अस्माभिः किमर्थं चिन्ता करणीया यदि तेषां विक्रयणेन अस्माकं नेत्रयोः पुरतः कष्टानि सहमानानां सहस्रशः जनानां कष्टनिवारणं कर्तुं शक्येत!' भाग्येन रोगतरङ्गः शीघ्रमेव उपशान्तः। परन्तु निःस्वार्थसेवा नाम किं, व्यावहारिक-वेदान्तशास्त्रं नाम किम् इति विवेकानन्दः तदा अपाठयत्।

स्वामी पुनः कतिपयसप्ताहानां निमित्तम् उत्तरभारतम् अगच्छत्। सः अल्मोरातः उत्तरप्रदेशस्थानि कानिचन स्थानानि अगच्छत्। सः पुनरपि काश्मीरम् अगच्छत्। सः अमरनाथं तीर्थयात्रार्थं गत्वा क्षीरभवान्याः मन्दिरमपि अगच्छत्। एषः समयः ध्यानस्य, अध्यात्मिकानुभवानां, स्वदेशस्य जगतः च विषये आन्तरिकदर्शनानां च आसीत्। एषः समयः नवसर्जनस्य, पुनरवलोकनस्य, अन्तः अवलोकनस्य च आसीत्। तेन लिखिताः कतिपयाः श्रेष्ठाः आङ्ग्लकविताः अस्मिन्नेव अवधौ लिखिताः। परं तस्य आरोग्यं क्षीयमाणम् आसीत्। सः आत्मानम् इहलोकस्य वातावरणात् पृथक् कुर्वन् आसीत् इति भासते स्म। एवं सत्यपि यानि कार्याणि तस्य हस्तसमीपस्थानि आसन् तेषां स्थगनं तु नैव सम्भाव्यते स्म। विवेकानन्दे यः प्रखराग्निः ज्वलति स्म तस्य उपशमनं नासीदेव। सः अवदत् - 'मम निमित्तं विश्रान्तिः नास्त्येव! अहं कार्यं कुर्वन् एव मरिष्यामि! अहं कार्यम् इच्छामि। जीवनं नाम युद्धम् एव अतः सर्वेण अपि सदैव कार्यरतेन भाव्यम् ... अहं कार्यरतः सन् एव जीवानि म्रियै च' इति। तथा एव अकरोत् सः।



# पश्चिमं प्रति पुनः गमनम्

कस्मिंश्चित् समये विवेकानन्दः अन्वभवत् यत् पश्चिमे सः यद् कार्यम् आरभत तत्कथं विकसदस्ति इति सः स्वयमेव तत्र गत्वा पश्येत् इति। समुद्रयात्रा तस्य स्वास्थ्यार्थं समीचीना स्यादिति तस्य वैद्यः अपि तम् उपादिशत्। अतः तत्र गमनस्य निर्णयं कृत्वा सः 1899 तमे वर्षे जूनमासे लण्डननिमित्तं नौकायानेन प्रयाणम् अकरोत्। तेन सह भगिनी निवेदिता स्वामी तुरीयानन्दः इति तस्य गुरुबन्धुः च अगच्छताम्। वस्तुतः स्वामी तुरीयानन्दः यः रामकृष्णमिशन्संस्थायाः कार्ये काठियावारे अतीव व्यग्रः आसीत् सः आरम्भे अमेरिकां गन्तुं न इच्छति स्म। परं स्वामी प्रार्थितवान् - हे भ्रातः, अस्माकं गुरोः लक्ष्यपूर्त्यर्थम् आमृत्यु प्रतिक्षणम् अहं मम जीवनं यापयन् अस्मि इति किं त्वं न पश्यसि? मम महतः भारस्य कस्यचित् भागस्य वहनं कृत्वा किं त्वं मम साहाय्यं न करिष्यसि? किम् इतस्ततः पश्यन् भविष्यसि? भावनाप्लावितः तुरीयानन्दः अङ्ग्यकरोत्। कॅलिफोर्नियायां वेदान्तस्य प्रचारकार्ये तुरीयानन्दः प्रमुखभूमिकां निरवहत्। अन्यदपि किञ्चित् रुचिकरं संस्मरणम् अस्ति - तुरीयानन्दः स्वेन सह कतिपयान् वेदान्तसम्बद्धान् संस्कृतग्रन्थान् नेतुम् इच्छति स्म। स्वामी अकथयत् - 'अलं पठनपुस्तकैः। तद् पर्याप्तमभवत् तेषाम्। गतवारं ते क्षत्रियम् (क्षात्रशक्तिः) अपश्यन्। अधुना ध्यानकर्तुः, ब्राह्मणत्वस्य अत्युन्नतपरम्परासु अनुशासने च प्रवृद्धस्य जनस्य उदाहरणप्रदर्शनस्य समयः अस्ति इति।

लण्डनगमनस्य प्रवासः निवेदितातुरीयानन्दयोः निमित्तम् अद्भुतानुभवः कश्चन आसीत्। अन्यजनानां, संस्कृतीनां, सभ्यतानां, महापुरुषाणां च विषये तेषाम् इतिहासं योजयित्वा टिप्पणीः स्वनिरीक्षणानि च कथयन् स्वामी तेजसा अधिकतमं प्रकाशमानः आसीत्। परिव्राजक इति शीर्षकेण सः एतस्य प्रवासस्य वर्णनं कुर्वन् लेखान् अलिखत्। मिशन् इत्यस्य उद्बोधन इत्याख्यायां पत्रिकायां ते लेखाः प्रकाशिताः। 'मेमोयर्स ऑफ युरोपियन् ट्रॅव्हल्' इति तेषाम् आङ्ग्लानुवादः अनन्तरं प्रकाशितः। तद् प्रवासवर्णनं नाम साहित्यिकं कृतिरत्नमेकम् अस्ति। निवेदिता अपि तस्य प्रवासस्य तस्याः अनुभवान्

'द मास्टर ॲज आय सॉ हिम्' इति सुप्रसिद्धे पुस्तके प्राकटयत्। तद् पुस्तकमपि श्रेष्ठा साहित्यकृतिः अस्ति।

विवेकानन्दस्य चारित्र्यस्य व्यक्तित्वस्य च पृथक् पृथक् मुखद्वयम् आसीत् इति भासते। एकं मुखम् आसीत् निर्भययोद्धुः लक्ष्यसाधनाय अविरतम् अविश्रामं समञ्जनं विना च प्रयत्नकर्तुः जनस्य। एतस्य व्यक्तित्वस्य प्रधानचिह्नम् आसीत् - पौरुषम्। अपरं मुखं यदासीत् तदासीत् कस्यचित् अतीव स्नेहमयस्य, अनुकम्पपूर्णस्य, वात्सल्यकरुणाभ्यां परिपूर्णस्य कोमलहृदयवतः च जनस्य। यथा पूर्वं बहुषु प्रसङ्गेषु तेन उक्तम् आसीत् तथा कस्मिंश्चित् दिने तेन निवेदिता उक्ता - 'यथा यथा मम वयः वर्धते तथा तथा अहम् अनुभवामि यत् सर्वमपि पौरुषे विद्यते। एषः एव मम नूतनविश्वासः अस्ति। कुकृत्यम् अपि पुरुषः इव करोतु। यदि भवता दुष्टेन एव भवितव्यं तर्हि तथा अपि महता प्रमाणेन भवतु।' तस्य सर्वाधिकम् उल्लिखितं वाक्यम् अस्ति - 'गीतायाः अपेक्षया पादकन्दुकक्रीडायाः द्वारा स्वर्गः समीपतरः अस्ति।' परन्तु एषः एव विवेकानन्दः जनानां दुःखानि दृष्ट्वा सहजतया अश्रूणि स्रावयति स्म। गिरीशचन्द्रघोषः इति रामकृष्णस्य प्रसिद्धः बङ्गभाषी नाटककारशिष्यः अश्रूणि स्रावयन्तं स्वामिनं दृष्ट्वा उपस्थितान् जनान् अकथयत् - अहो कीदृशं स्नेहमयं हृदयम्! अहं भवतां स्वामिनः (केवलम् एतदर्थम्) आदरं न करोमि यत् सः वेदमन्त्राणां ज्ञाता पण्डितः अस्ति अपि तु एतदर्थं यतः स्वबान्धवानां दुःखानि दृष्ट्वा यत् रोदिति तादृशं श्रेष्ठं हृदयं तस्य अस्ति इति। द्वितीयवारम् अमेरिकागमनात् पूर्वतनसायङ्काले ये उपस्थिताः आसन् तान् सः अस्मारयत् यत् रामकृष्णमिशन्संस्थायाः लक्ष्यं 'मनुष्यनिर्माणम्' इत्यासीत्। सः स्मारयन् अकथयत् - यथार्थः पुरुषः सः अस्ति यः शक्तेः दृष्ट्या मूर्तिमच्छक्तिस्वरूपः अस्ति परन्तु यस्य हृदयं नारीवत् अस्ति।' एतादृशस्य मिश्रणस्य सजीवस्वरूपं स्वामी स्वयमेव आसीत्।

अन्यस्मिन् सन्दर्भे स्वदेशस्य क्षुधार्तानां दरिद्राणां च विषये चिन्तयन् अश्रुपूर्णनेत्रवन्तं स्वामिनं दृष्ट्वा कश्चन भक्तः अकथयत् - 'स्वामिन्! भवान् संन्यासी अस्ति। जगत् परित्यक्तवान् अस्ति चेत् किमर्थं भवान् खिन्नः भवति, अश्रूणि स्रावयति च?' स्वामी उदतरत् - 'किम्? कश्चन संन्यासी अभवत् चेत् तस्य हृदयं न भवति इति चिन्तयति किम्? यस्य संन्यासिनः हृदयम् अन्यस्य भावम् अवगन्तुं न शक्नोति सः संन्यासी नास्ति एव।' कुटुम्बस्थानां मृत्युम् अतिरिच्य केषाञ्चन प्रियभक्तानामपि क्रमशः जातः मृत्युः स्वामिना सोढव्यः अभवत्। गुडविन्, कॅप्टन् सेवियर्, श्रीमती हेल्, गुरुबन्धुः स्वामी नीरजानन्दः इत्येते तेषु केचन आसन्। एतेषु प्रत्येकं जनस्य मृत्युना तस्य महद्दुःखम् अभवत्। सः तीव्रभावनावान् पुरुषः आसीत्। मिथ्या अपायपूर्णः दुष्प्रचारः, चारित्र्याघातः, कृतघ्नता इत्यादीनां नित्यानुभवः आसीत् तस्य। कदाचित् सः उद्विग्नः भवति स्म, किन्तु शीघ्रमेव एतादृशानां क्षुद्रकथनानाम् अतिक्रमणं सः अभ्यस्तवान्।



क्षमादानम् औदार्यं च तस्मिन् उट्टङ्कितमिव आसीत्। येषु सः अत्यधिकं विश्वसितवान्, ये च तस्य अतिनिकटस्थाः आसन् तेषु द्वौ इ.टी. स्टर्डिः हेन्रिएटा म्यूलर् च तस्य विश्वासघातं कृतवन्तौ तस्य अपख्यातिं कृतवन्तौ च। एवं चेदपि सः तौ प्रीणाति स्म, तयोः हितं काङ्क्षति स्म च। स्टर्डेः निमित्तं लिखिते पत्रे सः वदति - 'सः भारतदेशः अधुना अपि जीवति। स्टर्डे ... अमरप्रेम्णः भारतदेशः ... शाश्वतनिष्ठायाः भारतदेशः ... अपरिवर्तनशीलः च भारतदेशः केवलासु रीतिषु परम्परासु न अपि तु प्रेम्णि, श्रद्धायां, सख्ये च। अपि च तस्य भारतदेशस्य क्षुद्रबालः कश्चन अहं भारतीयप्रेमभावेन त्वां प्रीणामि हे स्टर्डे! तव एतं भ्रमं निवारयितुम् अहं कस्मिन्नपि दिने सहस्रशः शरीराणि अपि त्यजेयम्।'

विवेकानन्दस्य व्यक्तित्वस्य अन्यदपि एकं मुखम् आसीत् येन सः जनानाम् इष्टः, दयालुः च अभवत्। तन्मुखम् आसीत् तस्मिन् विद्यमानः निरन्तरं क्रीडाशीलः बालभावः। अन्ताराष्ट्रियस्तरे ख्यातिप्राप्तेः अनन्तरं तथा च देशभक्तोपदेशकस्य महारूपप्राप्तेः अनन्तरमपि सः भावः तस्मिन् विद्यते स्म। स्वामिनः द्वितीये अमेरिकाप्रवासे सः श्रीमती एस.के. ब्लॉजेट् इत्यस्याः गृहे लॉस एन्जिल्स इत्यत्र अवसत्। तस्याः सखी जोसेफाइन मॅक्लिओड् अपि तत्र आसीत्। स्वामिनः मृत्योः अनन्तरं स्वगृहे तस्य वासं स्मरन्ती श्रीमती ब्लॉजेट अलिखत् - 'विस्मर्तुम् अशक्यस्य तस्य शीततोः तानि प्रकाशमयानि वेगवन्ति दिनानि मया सदैव स्मर्यन्ते ... यद्यपि व्यक्तिगतरूपेण अहं स्वामिनं स्वल्पकालार्थम् एव अजानाम् तथापि तावति काले अपि शतेन प्रकारैः अहं स्वामिनः चरित्रस्य बालभावं द्रष्टुं शक्नोमि स्म यश्च बालभावः सर्वासु श्रेष्ठमहिलासु विद्यमानं मातृत्वगुणं निरन्तरम् आकर्षति स्म ... सः भाषणात् परं गृहम् आगच्छति स्म ... सद्यः विद्यालयात् मुक्तः बालः इव धावन् पाकशालां प्रविशति स्म 'अधुना वयं पचामः' इति वदन्। तदा जो (जोसेफाइन मॅक्लिओड्) तत्र प्रविश्य उत्तमानि वस्त्राणि धृत्वा पाकपात्रादिषु उपविष्टवन्तं तं पश्यति स्म। कृपणा दक्षा च 'जो' तं तानि वस्त्राणि परिवर्त्य गृहस्य वस्त्राणि धर्तुं बोधयति स्म। ... धर्मदूतः महर्षिः सः तस्य स्वभावस्य ऋजुतां बालभावं च प्रदर्शयन् लुप्तः भवति स्म।'

स्वल्पं कालं यावत् लण्डननगरे स्थितेः पश्चात् स्वामी नौकया न्यूयॉर्कं प्रति प्रस्थाय 28-8-1899 इति दिनाङ्के तत्र प्राप्नोत्। एतद्वारं सः वर्षस्य अपेक्षया अपि न्यूनं कालं तत्र अतिष्ठत्। तत्र प्राप्य सः लेगेट्स इत्यस्य ग्रामगृहं रिजली मॅनॉर इत्यत्र विश्रान्त्यर्थम् अगच्छत्। सः प्राचीनैः मित्रैः प्रशंसकैः च सह अमिलत् नूतनैः सह परिचयं प्राप्नोत् च। गुरुबन्धुं स्वामिनम् अभेदानन्दं दृष्ट्वा सः सन्तुष्टः। अभेदानन्दः वर्षद्वयात् पूर्वम् अमेरिकां गत्वा न्यूयॉर्कस्य वेदान्तसोसायटी इति संस्थां महता साफल्येन सञ्चालयन् आसीत्। पठनलेखनजनमेलनादिभिः विवेकानन्दः आत्मानं व्यग्रम् अस्थापयत्। कदाचित् सः गोल्फक्रीडां करोति स्म, ग्रामप्रदेशेषु भ्रमति स्म, चित्रलेखनं पठति स्म

च। तस्य स्वभावम् अनु सः तत्कार्यमपि तावत्या गम्भीरतया स्व्यकरोत् यत् तस्य शिक्षिकया लिखितं यत् मम छात्रः लेखन्यादिभिः हृदयस्य मनसः च तादृश्या एकाग्रतया परिश्रमं कुर्वन् अस्ति यथा एषा एव तस्य आजीविका स्यात् तथा।' यत् सः कुर्वन् अस्ति तस्मिन् कर्मणि एकाग्रता इति तस्य चरित्रस्य वैशिष्ट्यम् आसीत्। एकाग्रतायाः प्रचण्डशक्त्या सः तादृशानि कार्याणि कर्तुं शक्नोति स्म यानि अन्यैः आश्चर्यकारकाणि मन्यन्ते स्म। तस्य जीवनसम्बद्धाः एतादृश्यः अनेककथाः सन्ति। रिजली इत्यत्र किञ्चित् विश्रम्य स्वामी न्यूयॉर्कम् अगच्छत्। वेदान्तसेन्टर् इत्यत्र यानि मेलनानि कक्ष्याः च भवन्ति स्म तत्र सः संक्षिप्तभाषणानि करोति स्म, प्रश्नानाम् उत्तराणि कथयति स्म च। परन्तु सः सार्वजनीनभाषणानि न अकरोत्। प्रश्नोत्तरसत्रैः तस्य अध्यात्मिकं, दार्शनिकं च ज्ञानं प्रकटितं भवति स्म तथा च अनेकविधविषयाणां सम्बन्धे तस्य चिन्तनं प्रकाशितं भवति स्म। एतादृशे कस्मिंश्चित् सत्रे सः साग्रहं प्रत्यपादयत् - प्रत्येकस्मिन् मानवे दैवत्वं विराजते। आत्मा परिपूर्णः नित्यः अमरः च अस्ति। स्वस्मिन् विद्यमानं देवत्वं साक्षात्कृत्य प्रत्येकं मनुष्यः दिव्यत्वं प्राप्तुं शक्नोति। 'धर्मः नाम प्रत्येकस्मिन् मनुष्ये पूर्वमेव यद् दिव्यत्वं विद्यते तस्य अभिव्यञ्जनम् अस्ति' इति विवेकानन्दस्य उपदेशानां सारः आसीत्।

न्यूयॉर्कतः कॅलिफोर्नियागमनमार्गे स्वामी शिकागोनगरे कतिपयदिनानि अतिष्ठत्। लॉसएन्जिल्समध्ये तस्य मनसि आगतं यत् तस्य उपदेशानां विस्तृतप्रचाराय तेन पुनरेकवारं कार्यारम्भः करणीयः इति। तदनन्तरं विविधस्थानेषु भाषणमालाः अभवन् यत्र महासङ्ख्यया जनाः उपस्थिताः आसन्। एतैः भाषणैः श्रोतॄणां मनस्सु गभीरः महत्त्वपूर्णः च प्रभावः जनितः। सदर्न कॅलिफोर्निया ॲकॅडमी ऑफ सायन्सेस् इति संस्थया आयोजितैः एतैः भाषणैः जनाः अभिमन्त्रिताः अभवन्। एतेषु जनेषु साऊथ पासाडेना इत्यत्रत्याः मेडभगिन्यः (कॅरी, ॲलिस, हेलेन्) आसन्। पश्चिमतटे विवेकानन्दस्य साफल्याय एतासां प्रदानं सुमहत् आसीत्। लॉस एन्जिल्स् इत्यत्र होम ऑफ ट्रुथ् इति संस्थायाः निदेशकेन जे.रॅन्सम ब्रॅन्सीमहोदयेन आहूतः सः तत्रापि भाषणम् अकरोत्। भाषणानां विषयसमृद्ध्या स्वामिनः भाषणानां बौद्धिकाध्यात्मिकशक्तिभ्यां च महासङ्ख्यया आगताः श्रोतारः भावाभिभूताः। होम ऑफ ट्रुथ् इत्यस्य नायकः युनिटी इति पत्रिकायां स्वाभिप्रायं प्राकटयत् - अस्माकं भवने स्वामिनः विवेकानन्दस्य अष्टव्याख्यानानि अभवन्। तानि सर्वाणि अपि अत्याकर्षकाणि आसन् ... स्वामिनि विवेकानन्दे विश्वविद्यालयाध्यक्षस्य पाण्डित्यस्य, आर्चबिशप् इत्यस्य सम्मानस्य, मुक्तस्य सहजस्य बालस्य सुखदाचरणस्य च सम्मिश्रणम् अस्ति।' किन्तु एतादृशीनां प्रशंसानां स्तुतीनां च विवेकानन्दे न कश्चन परिणामः अभवत्।

स्वामी विविधविषयाधारितानि यानि व्याख्यानानि अकरोत् तेषु केषाञ्चन विषयाः आसन् - 'भारतं भारतीयाः च', 'भारतस्य इतिहासः' 'प्रायोगिकं मानसशास्त्रम्',



'भारतीय महिलाः', 'पर्शियादेशीयाः कलाः', 'विश्वधर्मस्य आदर्शः', 'जगतः महान्तः शिक्षकाः' इत्यादयः। तस्य ज्ञानस्य वैशाल्यं, गाम्भीर्यं च, तस्य अवगमनशक्तिः बुद्धिः च अविश्वसनीये आस्ताम्। सः लिखितटिप्पणीं विना एव भाषणानि करोति स्म। ये तस्य भाषणानि शृण्वन्ति स्म, कक्ष्यासु भागं गृह्णन्ति स्म, तेन सह भाषन्ते स्म च ते सर्वे एतदर्थम् आश्चर्यम् अनुभवन्ति स्म यत् कथं कश्चन जनः एतादृशं स्तरं प्राप्तुं शक्नोति इति। दौर्भाग्येण तेषां भाषणानाम् अधिकांशः नष्टः अभवत् यतः तानि लेखितुं गुडविनः नासीत् (यतः सः पूर्वमेव दिवङ्गतः)। स्वामिनः प्रयत्नेन लॉसएन्जिल्स् पासाडेना इति स्थानयोः वेदान्तसोसायटीसंस्था आरब्धा।

कॅलिफोर्नियायां तस्य जीवनस्य समकालीनवृत्तान्तैः विवेकानन्दस्य व्यक्तित्वस्य तस्य मनसः च अनेकानि मुखानि प्रकाश्यन्ते। बहिः अटने रुचिमन्तः दक्षिणकॅलिफोर्नियावासिनः विविधस्थानानि दर्शयितुं तं नेतुम् इष्टवन्तः। स्वामी अकथयत् - किञ्चन स्थानं द्रष्टुम् अहं दश पदानि अपि न गच्छेयं, किन्तु कमपि महात्मानं द्रष्टुम् अहं सहस्रं मीलपरिमितमपि गच्छेयम्।' वस्तुतः स्वामी प्रकृतिसौन्दर्यं विशेषतया पर्वतानां सौन्दर्यम् आस्वदते स्म। सः केवलम् एतावदेव ज्ञापयितुम् इच्छति स्म यत् तस्मिन् समये तस्य दृष्ट्या स्थानेभ्यः जनाः महत्त्वपूर्णतराः आसन्। मेडकुटुम्बस्य बालानां साहचर्यमपि तस्य इष्टम् आसीत्। सः तैः सह भाषते स्म, तेषां क्रियाकलापानां विषये प्रश्नान् पृच्छति स्म, तैः सह क्रीडति स्म च। बालशिक्षणस्य समस्यायां तस्य विशिष्टा रुचिः आसीत्। सः दण्डनविरोधकः आसीत्। तेन बालस्य कोऽपि लाभः न भवति इति सः चिन्तयति स्म। सः अवदत् - 'येन बालः भयम् अनुभवेत् तादृशं किमपि अहं कदापि न कुर्याम्।' सः बहुधा पृष्ठतः उद्याने बालैः सह उपविश्य तेषां चित्रपुस्तकानि पश्यति स्म, तैः सह पुस्तकानि पठति स्म च। ॲलिस इन वन्डरलॅन्ड, थ्रू द लुकिंग ग्लास् इति तस्य इष्टतरे पुस्तके आस्ताम्। तेषु बालेषु अन्यतमः आसीत् राल्फः इति कुमारः। स्वामिनः लघूनि कार्याणि यथा तस्य पादत्राणयोः परिष्कारः, तस्य धूमपानाय तमाखोः उपरिष्टात् आनयनम्, अन्यानि लघुकार्याणि च राल्फः इष्ट्वा करोति स्म। परस्परं वार्तालापः द्वयोः अपि इष्टः आसीत्। एकदा स्वामी राल्फम् अपृच्छत् - किं त्वं तव नेत्रे द्रष्टुं शक्नोषि?' राल्फः उदतरत् - 'न, किन्तु दर्पणे द्रष्टुं शक्नोमि'। स्वामी राल्फम् अकथयत् - 'देवः तथैव अस्ति। यावत् तव नेत्रे तव समीपे स्तः तावानेव समीपे देवः अस्ति। यद्यपि त्वं तं द्रष्टुं न शक्ष्यसि तथापि सः त्वदीयः एव भवति।'

कॅलिफोर्नियायाम् ओकलॅन्डस्य प्रथम युनिटेरियन् चर्च् इत्यस्य अर्चकः रेव्हरण्ड् बेन्जामिन फे मिल्सः विवेकानन्दम् एकां सभां सम्बोधयितुम् आह्वयत्। शिकागोनगरस्य धर्मसंसदि सः स्वयमपि भाषणम् अकरोत् स्वामिनः भाषणम् अशृणोत् च। स्वामिनः भाषणेन सः प्रभावितः। अनन्तरं सः अकथयत् - 'एषः जनः मम जीवनं पर्यवर्तयत्।'

च। तस्य स्वभावम् अनु सः तत्कार्यमपि तावत्या गम्भीरतया स्व्यकरोत् यत् तस्य शिक्षिकया लिखितं यत् मम छात्रः लेखन्यादिभिः हृदयस्य मनसः च तादृश्या एकाग्रतया परिश्रमं कुर्वन् अस्ति यथा एषा एव तस्य आजीविका स्यात् तथा।' यत् सः कुर्वन् अस्ति तस्मिन् कर्मणि एकाग्रता इति तस्य चरित्रस्य वैशिष्ट्यम् आसीत्। एकाग्रतायाः प्रचण्डशक्त्या सः तादृशानि कार्याणि कर्तुं शक्नोति स्म यानि अन्यैः आश्चर्यकारकाणि मन्यन्ते स्म। तस्य जीवनसम्बद्धाः एतादृश्यः अनेककथाः सन्ति। रिजली इत्यत्र किञ्चित् विश्रम्य स्वामी न्यूयॉर्कम् अगच्छत्। वेदान्तसेन्टर् इत्यत्र यानि मेलनानि कक्ष्याः च भवन्ति स्म तत्र सः संक्षिप्तभाषणानि करोति स्म, प्रश्नानाम् उत्तराणि कथयति स्म च। परन्तु सः सार्वजनीनभाषणानि न अकरोत्। प्रश्नोत्तरसत्रैः तस्य अध्यात्मिकं, दार्शनिकं च ज्ञानं प्रकटितं भवति स्म तथा च अनेकविधविषयाणां सम्बन्धे तस्य चिन्तनं प्रकाशितं भवति स्म। एतादृशे कस्मिंश्चित् सत्रे सः साग्रहं प्रत्यपादयत् - प्रत्येकस्मिन् मानवे दैवत्वं विराजते। आत्मा परिपूर्णः नित्यः अमरः च अस्ति। स्वस्मिन् विद्यमानं देवत्वं साक्षात्कृत्य प्रत्येकं मनुष्यः दिव्यत्वं प्राप्तुं शक्नोति। 'धर्मः नाम प्रत्येकस्मिन् मनुष्ये पूर्वमेव यद् दिव्यत्वं विद्यते तस्य अभिव्यञ्जनम् अस्ति' इति विवेकानन्दस्य उपदेशानां सारः आसीत्।

न्यूयॉर्कतः कॅलिफोर्नियागमनमार्गे स्वामी शिकागोनगरे कतिपयदिनानि अतिष्ठत्। लॉसएन्जिल्समध्ये तस्य मनसि आगतं यत् तस्य उपदेशानां विस्तृतप्रचाराय तेन पुनरेकवारं कार्यारम्भः करणीयः इति। तदनन्तरं विविधस्थानेषु भाषणमालाः अभवन् यत्र महासङ्ख्यया जनाः उपस्थिताः आसन्। एतैः भाषणैः श्रोतृणां मनस्सु गभीरः महत्त्वपूर्णः च प्रभावः जनितः। सदर्न कॅलिफोर्निया ॲकॅडमी ऑफ सायन्सेस् इति संस्थया आयोजितैः एतैः भाषणैः जनाः अभिमन्त्रिताः अभवन्। एतेषु जनेषु साऊथ पासाडेना इत्यत्रत्याः मेडभगिन्यः (कॅरी, ॲलिस, हेलेन्) आसन्। पश्चिमतटे विवेकानन्दस्य साफल्याय एतासां प्रदानं सुमहत् आसीत्। लॉस एन्जिल्स् इत्यत्र होम ऑफ ट्रुथ् इति संस्थायाः निदेशकेन जे.रॅन्सम ब्रॅन्सीमहोदयेन आहूतः सः तत्रापि भाषणम् अकरोत्। भाषणानां विषयसमृद्ध्या स्वामिनः भाषणानां बौद्धिकाध्यात्मिकशक्तिभ्यां च महासङ्ख्यया आगताः श्रोतारः भावाभिभूताः। होम ऑफ ट्रुथ् इत्यस्य नायकः युनिटी इति पत्रिकायां स्वाभिप्रायं प्राकटयत् - अस्माकं भवने स्वामिनः विवेकानन्दस्य अष्टव्याख्यानानि अभवन्। तानि सर्वाणि अपि अत्याकर्षकाणि आसन् ... स्वामिनि विवेकानन्दे विश्वविद्यालयाध्यक्षस्य पाण्डित्यस्य, आर्चबिशप् इत्यस्य सम्मानस्य, मुक्तस्य सहजस्य बालस्य सुखदाचरणस्य च सम्मिश्रणम् अस्ति।' किन्तु एतादृशीनां प्रशंसानां स्तुतीनां च विवेकानन्दे न कश्चन परिणामः अभवत्।

स्वामी विविधविषयाधारितानि यानि व्याख्यानानि अकरोत् तेषु केषाञ्चन विषयाः आसन् - 'भारतं भारतीयाः च', 'भारतस्य इतिहासः' 'प्रायोगिकं मानसशास्त्रम्',



'भारतीय महिलाः', 'पर्शियादेशीयाः कलाः', 'विश्वधर्मस्य आदर्शः', 'जगतः महान्तः शिक्षकाः' इत्यादयः। तस्य ज्ञानस्य वैशाल्यं, गाम्भीर्यं च, तस्य अवगमनशक्तिः बुद्धिः च अविश्वसनीये आस्ताम्। सः लिखितटिप्पणीं विना एव भाषणानि करोति स्म। ये तस्य भाषणानि शृण्वन्ति स्म, कक्ष्यासु भागं गृह्णन्ति स्म, तेन सह भाषन्ते स्म च ते सर्वे एतदर्थम् आश्चर्यम् अनुभवन्ति स्म यत् कथं कश्चन जनः एतादृशं स्तरं प्राप्तुं शक्नोति इति। दौर्भाग्येण तेषां भाषणानाम् अधिकांशः नष्टः अभवत् यतः तानि लेखितुं गुडविनः नासीत् (यतः सः पूर्वमेव दिवङ्गतः)। स्वामिनः प्रयत्नेन लॉसएन्जिल्स् पासाडेना इति स्थानयोः वेदान्तसोसायटीसंस्था आरब्धा।

कॅलिफोर्नियायां तस्य जीवनस्य समकालीनवृत्तान्तैः विवेकानन्दस्य व्यक्तित्वस्य तस्य मनसः च अनेकानि मुखानि प्रकाश्यन्ते। बहिः अटने रुचिमन्तः दक्षिणकॅलिफोर्नियावासिनः विविधस्थानानि दर्शयितुं तं नेतुम् इष्टवन्तः। स्वामी अकथयत् - किञ्चन स्थानं द्रष्टुम् अहं दश पदानि अपि न गच्छेयं, किन्तु कमपि महात्मानं द्रष्टुम् अहं सहस्रं मीलपरिमितमपि गच्छेयम्।' वस्तुतः स्वामी प्रकृतिसौन्दर्यं विशेषतया पर्वतानां सौन्दर्यम् आस्वदते स्म। सः केवलम् एतावदेव ज्ञापयितुम् इच्छति स्म यत् तस्मिन् समये तस्य दृष्ट्या स्थानेभ्यः जनाः महत्त्वपूर्णतराः आसन्। मेडकुटुम्बस्य बालानां साहचर्यमपि तस्य इष्टम् आसीत्। सः तैः सह भाषते स्म, तेषां क्रियाकलापानां विषये प्रश्नान् पृच्छति स्म, तैः सह क्रीडति स्म च। बालशिक्षणस्य समस्यायां तस्य विशिष्टा रुचिः आसीत्। सः दण्डनविरोधकः आसीत्। तेन बालस्य कोऽपि लाभः न भवति इति सः चिन्तयति स्म। सः अवदत् - 'येन बालः भयम् अनुभवेत् तादृशं किमपि अहं कदापि न कुर्याम्।' सः बहुधा पृष्ठतः उद्याने बालैः सह उपविश्य तेषां चित्रपुस्तकानि पश्यति स्म, तैः सह पुस्तकानि पठति स्म च। ॲलिस इन वन्डरलॅन्ड, थ्रू द लुकिंग ग्लास् इति तस्य इष्टतरे पुस्तके आस्ताम्। तेषु बालेषु अन्यतमः आसीत् राल्फः इति कुमारः। स्वामिनः लघूनि कार्याणि यथा तस्य पादत्राणयोः परिष्कारः, तस्य धूमपानाय तमाखोः उपरिष्टात् आनयनम्, अन्यानि लघुकार्याणि च राल्फः इष्ट्वा करोति स्म। परस्परं वार्तालापः द्वयोः अपि इष्टः आसीत्। एकदा स्वामी राल्फम् अपृच्छत् - किं त्वं तव नेत्रे द्रष्टुं शक्नोषि?' राल्फः उदतरत् - 'न, किन्तु दर्पणे द्रष्टुं शक्नोमि'। स्वामी राल्फम् अकथयत् - 'देवः तथैव अस्ति। यावत् तव नेत्रे तव समीपे स्तः तावानेव समीपे देवः अस्ति। यद्यपि त्वं तं द्रष्टुं न शक्ष्यसि तथापि सः त्वदीयः एव भवति।'

कॅलिफोर्नियायाम् ओकलॅन्डस्य प्रथम युनिटेरियन् चर्च् इत्यस्य अर्चकः रेव्हरण्ड् बेन्जामिन फे मिल्सः विवेकानन्दम् एकां सभां सम्बोधयितुम् आह्वयत्। शिकागोनगरस्य धर्मसंसदि सः स्वयमपि भाषणम् अकरोत् स्वामिनः भाषणम् अशृणोत् च। स्वामिनः भाषणेन सः प्रभावितः। अनन्तरं सः अकथयत् - 'एषः जनः मम जीवनं पर्यवर्तयत्।'

ओकलॅन्डे धर्मसभायां स्वामिना कतिपयानि भाषणानि कृतानि (जनवरी, फेब्रवरी - 1900) तस्य भाषणसमये सभागृहं जनैः परिपूर्णं भवति स्म। वर्षद्वयानन्तरं सॅन फ्रॅनसिस्कोमध्ये कस्मिंश्चित् भाषणे मिल्सः अकथयत् - स्वामी विवेकानन्दः प्रचण्डधीमान् आसीत्। तेन सह तुलना कृता चेत् अस्माकं महत्तमविश्वविद्यालयस्य प्राध्यापकाः अपि बालतुल्याः भवेयुः।' अष्टभ्यः वर्षेभ्यः पूर्वं हार्वर्डस्य प्राध्यापकः जे.एच्. राईट्महोदयः विवेकानन्दस्य विषये यद् अकथयत् तस्यैव पुनरावृत्तिं मिल्सः अकरोत्।

अग्रिमेषु सप्ताहेषु जनानाम् आग्रहवशात् स्वामिना ओकलॅन्डे, सॅनफ्रॅन्सिस्कोनगरे च बहूनि भाषणानि करणीयानि अभवन्। तेषां भाषणानां वैशिष्ट्यम् आसीत् प्रश्नान् प्रष्टुं श्रोतृणां स्वामिना कृतं प्रोत्साहनम्। यः स्वामिना सह मेलनस्य तस्य भाषणानां च स्मरणानि अलिखत् सः फ्रॅन्क होडहॅमेलः अन्वभवत् यत् - 'स्वामी कस्माच्चित् अमानवीयानुभवात् वदति स्म ... सः भाषणकर्ता केवलः नासीत् अपि तु श्रेष्ठतमः शिक्षकः आसीत्।' विवेकानन्दः श्रोतॄन् वदति स्म - 'यद् यद् प्रष्टुम् इच्छन्ति तद् पृच्छन्तु ... यावदधिकं तावद् वरम्।' स्वामिनः अन्तिमभाषणस्य अनुभवं स्मरन् होडहॅमेलः अलिखत् - पूर्वसायङ्काले स्वामी श्रोतॄन् अकथयत् - 'श्वः रात्रौ अहं मनः तस्य शक्तयः शक्यताः च इति विषये भाषणं करिष्यामि। भवन्तः श्रोतुम् आगच्छन्तु। अहं भवतः किञ्चित् वक्तुकामः अस्मि, किञ्चित् विस्फोटकक्षेपणं करिष्यामि च।' होडहॅमेलः लिखति - अग्रिमरात्रौ जनानां कृते स्थातुमपि स्थलं कष्टेन एव आसीत्। सः स्वशब्दम् अपालयत्। विस्फोटकानि क्षिप्तानि अपि च यया प्रभावः जायेत तादृश्या शैल्या तेषां क्षेपणं सः सम्यगेव जानाति स्म।'

स्वामिना यद् अत्यधिकं कार्यं क्रियमाणम् आसीत् तेन तस्य या शारीरकी मानसिकी च श्रान्तिः उत्पद्यमाना आसीत् सा तस्य आरोग्ये प्रकटिता जायमाना आसीत्। ततोऽधिकम् अहं मम कार्यम् अकरवम् अधुना जगतः त्यागस्य समयः आसन्नः इत्यपि सः अनुभवन् आसीत्। मिस् मॅक्लिओड् कृते अल्मेडातः प्रेषिते भावपूर्णे आत्मप्रकटनात्मके (18-4-1900) सः अलिखत् - 'कार्यं सदैव कठिनम् एव भवति। मम कार्यं शाश्वताय स्थगितं भवतु तथा च मम समग्रात्मा मातरि लीनः भवतु इति मन्निमित्तं प्रार्थ्यताम्। तस्याः कार्यं सा जानाति ...' आत्मान्वेषणस्य भावेन सः स्वजीवनस्य कार्यस्य च अवलोकनम् अकरोत्। प्रायः सः तस्य प्रयाणस्य अन्तं द्रष्टुं शक्नोति स्म। सः अलिखत् - 'आम्, अहम् आगच्छामि। निर्वाणं मम सम्मुखे अस्ति। केषुचित् समयेषु अहं तम् असीमशान्तिमयं तरङ्गरहितं श्वासरहितं समुद्रम् अनुभवामि। तस्य व्यक्तिगतवार्तालापेषु अपि 'परमतत्त्वस्य प्राप्तेः तस्य तीव्रेच्छा' सुस्पष्टतया ज्ञायते स्म। स्वामिनः मनोभावस्य सुन्दरं चित्रणं स्वामिना निखिलानन्देन स्वामिनः जीवनचरिते कृतमस्ति - विवेकानन्दस्य नेत्रे अन्यस्मिन् जगति विद्यमानं स्वस्य वास्तविकवासस्थानस्य प्रकाशं पश्यतः स्म।' परन्तु अन्तिमविश्रामात् पूर्वं तेन क्रान्तव्यं महदनन्तरम् अवशिष्टम् आसीत्।



लेगेट्दम्पती यौ तदा लण्डनमध्ये आस्तां तौ स्वामिनं पॅरिसनगरे ताभ्यां सह मेलनाय निमन्त्रितवन्तौ। सप्टेम्बरमासे 'धर्माणाम् इतिहास' विषयिण्यां सभायाम् उपस्थातुं निमन्त्रणं स्वामिना अपि प्राप्तम् आसीत्। सः तानि निमन्त्रणानि अङ्ग्यकरोत्। सः न्यूयॉर्कं प्रत्यगच्छत्। मार्गे शिकागोनगरे सः स्वल्पकालम् अतिष्ठत्। 7-6-1900 इति दिनाङ्के सः न्यूयॉर्कं प्राप्नोत्। स्वामिना अभेदानन्दस्य नेतृत्वे न्यूयॉर्कस्य वेदान्तसंस्थया कृतया प्रगत्या स्वामी प्रमुदितः। संस्थायां सः कतिपयकक्ष्याः स्व्यकरोत्। अमेरिकायां वेदान्तज्ञानस्य प्रसाराय स्वामिना तुरीयानन्देन कृतेन कार्येण अपि सः प्रसन्नः। स्वामी एकदा डेट्रॉईट्नगरम् अपि अगच्छत्। रामकृष्णव्यवस्थायाः मुद्रा स्वामिना अत्रैव सज्जीकृता। सः स्वयं सौन्दर्यप्रेमी कलासमीक्षकः च चासीत्। हेन्री व्हॅन हागेन इत्यस्य साहाय्येन सा मुद्रा सज्जीकृता। हागेनः उत्तमः चित्रलेखकः मुद्रकः च आसीत्। मुद्रायाः चिह्नानि वर्णयन् स्वामी अवदत् - सूर्यः = योगः, हंसः = आत्मा, घोषवाक्यम् = तन्नो हंसः प्रचोदयात् = हंसः (आत्मा) अस्मभ्यं तद् प्रेषयेत्। मनसः तडागः अस्ति सः। जुलैमासस्य २६ तमे दिनाङ्के सः फ्रान्सदेशं प्रति प्रातिष्ठत।

पॅरिसे स्वामी आरम्भे लेगेट्महोदयस्य मित्रस्य एम्.जी. नोबलस्य अतिथिः आसीत् ततः लेगेट्गृहम् अगच्छत् सः। स्वल्पकालात् परम् एम्. जूल्स बॉईस इति प्रसिद्धः फ्रेन्चलेखकः धर्मस्य तुलनात्मकाध्ययनस्य गम्भीरछात्रः तं स्वगृहम् प्रति आह्वयत्। फ्रान्सदेशे वासस्य अवधेः अधिकतमभागे स्वामी बोईसस्य गृहे एव अतिष्ठत्। वेदान्तशास्त्रे तन्त्रशास्त्रे च गभीररुचिमता फ्रेन्चयुवकेन बोइसेन सह वार्तालापेन स्वामी आनन्दम् अनुभवति स्म। 1893 तमे वर्षे यदा बोईसः शिकागोनगरे संसदि विवेकानन्दस्य भाषणम् अशृणोत् तदा आरभ्य सः तेन मेलितुम् इच्छति स्म। पॅरिसनगरे स्वामी विविध-आजीविकावद्भिः प्रभावशालिभिः जनैः सह अमिलत्। तेषु गण्यानां केषाञ्चन नामानि एवं सन्ति - एडिम्बरो विश्वविद्यालयस्य विख्यातः समाजशास्त्रविद् प्राध्यापकः पॅट्रिक गेड्डेसः, अमेरिकादेशीया प्रसिद्धा समाजसेविका जेन ॲडम्स, पियरे हायासिन्थः, ख्यातः मशीनगनाख्यायाः भुशुण्डेः निर्माता सर् हिरॅम मॅक्झिमः, डयूक ऑफ रियेल्यु, राजपुत्री डेमीडॉफ, डयूक ऑफ न्यूकॅसल इत्यादयः। मॅडम एमा कॅल्व्हे, सारा बेर्नहार्ड इति याभ्यां सह पूर्वं सः अमेरिकायाम् अमिलत् ताभ्यां सह अत्रापि तस्य मेलनम् अभवत्। प्रसिद्धः वनस्पतिशास्त्रज्ञः डा.जगदीशचन्द्र बोसः यः वनस्पतीनां संवेदनायाः विषये लक्षणीयम् अन्वेषणम् अकरोत् तेन सह मिलित्वा स्वामी विशिष्टम् आनन्दम् अन्वभवत्। पॅरिससम्मेलने वैज्ञानिकानां सभार्थं बोसः आहूतः आसीत्। स्वामी बहुधा बोसस्य परिचयः 'बङ्गालस्य गर्वः शोभा च' इति कारयति स्म। अग्रिमकाले भगिनी निवेदिता बोसस्य महती प्रशंसिका अभवत्। जे.सी.बोसस्य वैज्ञानिककार्यस्य भारतीयानां वैदेशिकानां च ज्ञापनं तस्याः प्रयत्नैः एव अभवत्।

धर्माणाम् इतिहाससम्बद्धा सभा तु निराशताकारिणी एव आसीत्। स्वामी स्वयमपि तद्विषये 'महत्प्रकरणं न' इति अलिखत्। रोमन - कॅथॉलिकजनाः ये शिकागोनगरस्य धर्मसंसदः पुनरावृत्तिं न वाञ्छन्ति स्म ते एतस्याः सभायाः तीव्रं विरोधम् अकुर्वन्। अन्यत् कारणम् एतदपि आसीत् यत् पॅरिससभायाः मुख्योद्देशः विभिन्नमतानां पूजापद्धतीनां विकासस्य इतिहासस्य च अन्वेषणसम्बद्धः आसीत् इति। तत्र याः प्रस्तुतयः चर्चाः च अभवन् ताः शैक्षिकस्वरूपिण्यः आसन्। धर्मस्य आरम्भस्य इतिहासस्य च विषये स्वेन चिते क्षेत्रे येषां विशिष्टाध्ययनम् आसीत् तादृशः विद्वांसः तत्र भागग्रहीतृषु अधिकाः आसन्। स्वामिनः आरोग्यं सम्यक् नासीत् अतः सः द्विवारमेव सभां सम्बोधितवान्। स्वामी फ्रेन्चभाषया अभाषत। शालिग्रामशिलाशिवलिङ्गयोः उत्पत्तिविषये जर्मनप्राच्यशास्त्रविद् गुस्टाव ओप्पर्टः एकं पत्रम् अपठत्। जर्मनविदुषः विप्रतिपत्तेः स्वामी शक्तिमद्विरोधम् अकरोत्। स्वामिनः ज्ञानप्रदं व्यवधानं पूर्वसज्जतारहितम् आसीत्। यथार्थतया युरोपखण्डे स्वामिनः महत्त्वपूर्णं कार्यं नाम पाश्चात्त्यप्राच्यशास्त्रविदां कासाञ्चन कल्पनानां केषञ्चन सिद्धान्तानां च खण्डनम् इत्येव आसीत्। भारतीयेतिहासस्य संस्कृत्याः च विषये आधारहीनानि निरीक्षणानि तैः उपस्थाप्यन्ते इति सः तान् निन्दति स्म। भारतीयसाहित्यकलाज्योति- ष्यगणितादिषु सर्वत्र ग्रीकाणां प्रभावः दृश्यते इति तेषां सिद्धान्तं सः तदर्थम् उदाहरति स्म। केषुचित् क्षेत्रेषु स्वल्पप्रमाणेन तथा दृश्यते चेदपि पाश्चात्त्याः बहुधा प्राचीनभारतीयवाङ्मये गुप्तानां सत्यानां प्रमाणानां च उपेक्षाम् अकुर्वन् इति स्वामिनः वादः आसीत्। पाश्चात्त्यप्राच्यशास्त्रविदः ये एकस्याः ग्रीककृतेः निमित्तं महान्तं समयं व्ययीकुर्वन्ति ते संस्कृतकृतीनां विषये अपि तथैव कुर्युः इति सः तान् उपादिशत्। तथा कृतं चेत् इतिहासस्य विविधेषु कालखण्डेषु पूर्वपश्चिमयोर्मध्ये जातस्य कल्पनानाम् आदानप्रदानयोः विश्वासार्हतरं चित्रं स्पष्टं भवेत् इति सः अचिन्तयत्।

पियरे हायसिन्थः इति प्रसिद्धः भूतपूर्व-कार्मेलाइट्-संन्यासी यः कॅथॉलिक-अर्चकः च आसीत् तेन सह स्वामिनः सख्यं सम्यक् अवर्धत। पोपः सर्वदा दोषरहितः एव भवति इति क्रैस्तमतविश्वासस्य सः विरोधम् अकरोत् इत्यतः तेन संन्यासत्यागः करणीयः अभवत्। सः समुदायबाह्यः कृतः तैः। तदनन्तरं तस्य नाम चार्ल्स लॉयसन् इति जातम्। परिष्कृतस्य कॅथॉलिक् चर्च् इत्यस्य स्थापनार्थं सः उपदेशं करोति स्म। तेन सह स्वामिनः विविधविषयाधारिताः दीर्घाः, आह्लादकराः च चर्चाः भवन्ति स्म। धार्मिकविषयाः, अध्यात्मजीवनं, विविधमतानि, पन्थानः इत्यादयः ते विषयाः भवन्ति स्म। भारतचीनादेशयोः विषये हिराममॅक्सिमस्य गभीरस्नेहः आसीत्। विश्वधर्मसंसदि सः स्वामिनः भाषणम् अशृणोत्। सः तावदधिकं प्रभावितः आसीत् यत् स्वामिनः अधिकारमयोपस्थित्यां, विस्तीर्णविदुष्ये च हठशीला स्वमतवादिता जीवितुमेव न शक्नुयादिति सः अनुभवति स्म। जोसेफाइन मॅक्लिओड् यां स्वामी स्नेहेन 'जो' इति निर्दिशति स्म सा अपि तस्मिन् समये पॅरिसनगरे आसीत्। स्वामी विश्रान्तिं प्राप्नुयात्, आकर्षकाणि



स्थानानि द्रष्टुं शक्नुयात्, मनसः महदुपयोगेन आत्मानं न श्रम्यात् इत्येतेषु विषयेषु सा जागरूकतया अवदधाति स्म। मॅक्लिओड् इत्यस्याः दृष्ट्या स्वामी तस्याः गुरुः, सुहृत्, प्रेरणास्रोतः च आसीत्।

फ्रान्समध्ये मासत्रयं यावत् वासात् परं स्वामी दक्षिणपश्चिमयुरोपमार्गेण कॉन्स्टटिनोपलं (अधुना इस्तम्बूल) प्राप्नोत्। मध्येमार्गं सः व्हिएन्नां स्कुटरीं (बोस्पेरस् पार्श्वे) च अगच्छत्। तत्र सः पुनः पेरे हायसिन्थेन सह अमिलत्। कॉन्स्टन्टिनोपले दश दिनानि यावत् उषित्वा स्वामी सहयात्रिभिः सह ऐतिहासिकं ग्रीकनगरम् अथेन्सम् अगच्छत्। ग्रीसदेशे अनेकान् द्वीपान् दृष्ट्वा सः नौकया कैरोनगरम् अगच्छत्। एतादृशानां प्राचीनदेशानां नगराणां च दर्शनेन स्वामी अत्यानन्दम् अनुभवति स्म। महतीनां सभ्यतानाम् उत्थानपतनयोः तस्य गभीराः रुचिः आसीत्। युरोपखण्डस्य देशानां जनानां च विषये तेषां भूतवर्तमानभविष्यत्कालानां विषये सः विच्छिन्नकारीणि निरीक्षणानि कथयति स्म। एतैः तस्य विश्वकोषतुल्यं ज्ञानम्, अवगमनैकीकरणयोः सामर्थ्यं, विश्लेषणक्षमतावत् मनः च आविष्कृतं भवति स्म। युरोपखण्डे वासस्य संक्षिप्तावधौ सः सन्निहितान् भविष्यतः विनाशकारिणः युद्धस्य कृष्णमेघान् द्रष्टुम् अशक्नोत्। सः अपायसूचनाम् अकथयत् - युरोपखण्डः नाम किञ्चन विशालं सेनाशिबिरम् अस्ति यत् ज्वालामुखितटे एव विद्यते। यदि सः अग्निः अध्यात्मप्रवाहेण न निर्वाप्यते तर्हि सः उत्क्षिप्तः भविष्यति' इति भविष्यत्कथनं सः युद्धात् केभ्यश्चित् वर्षेभ्यः प्राक् अकरोत्। प्रथमविश्वयुद्धस्य आरम्भेण सह तद् उत्क्षेपणं 1914 तमे वर्षे प्रारभत। स्वामिना अन्यानि अपि एतादृशानि भविष्यत्कथनानि कृतानि आसन्। 1896 तमे वर्षे ख्रिस्टिन् इत्यस्यै प्रेषिते पत्रे सः अलिखत् - अग्रिमं समस्याजनकं महत्परिवर्तनं रशियातः चीनातः च आरभेत। यद्यपि अहं स्पष्टं द्रष्टुं न शक्नोमि तथापि द्वयोर्मध्ये अन्यतरः स्यात्। बोल्शेविकक्रान्तिः 1917 तमे वर्षे अभवत्। 1911 तमे वर्षे चीनामध्ये जातया क्रान्त्या मान्चूजनाः उत्पाटिताः। अन्ते 1949 तमे वर्षे जातया कम्यूनिस्टक्रान्त्या चीनादेशः प्रचण्डशक्तिरूपेण उदितः। 1897 तमे वर्षे स्वामिना उक्तम् आसीत् यत् भारतस्य स्वातन्त्र्याय इतोऽपि पञ्चाशत्वर्षाणि आवश्यकानि इति। भारतदेशः 1947 तमे वर्षे स्वतन्त्रः अभवत्। एतादृशानां भविष्यत्कथनानां यथार्थस्थितिप्राप्तिः स्वामिनः यथार्थतया भविष्यत्कथनसामर्थ्यस्य प्रमाणमस्ति इति सहजतया चिन्तनं भवितुम् अर्हति। परन्तु एतस्य तर्कसङ्गतं स्पष्टीकरणं प्रायः एतद् भवेत् यत् तस्य इतिहासस्य विलक्षणज्ञानं तथा च विकासस्य दिशायाः प्रवृत्तीनां योग्यतया निदानस्य तस्य क्षमता एव तदर्थं कारणीभूते आस्ताम् इति।

यद्यपि विवेकानन्दः तस्य युरोपप्रवासे आनन्दम् अनुभवन् अस्ति, सर्वमपि रुच्या पश्यन् अस्ति इति बहिर्भागतः भासते स्म तथापि वस्तुतः तस्य अन्तर्भागे कस्यापि प्रभावः न भवति स्म। तस्य सहयात्री एकः अवदत् - 'सः कियान् श्रान्तः, विश्वात्

निर्विण्णः च भासते स्म।' भारतं प्रतिगन्तुम् अतिव्याकुलः आसीत् सः। बेलूरमठे तस्य गुरुबन्धुभिः सह भवितुम् अतीच्छुकः आसीत् सः।

'नोवेम्बरमासस्य षड्विंशतितमे दिनाङ्के सः कैरोतः प्रस्थाय एकादशदिनानाम् अनन्तरं मुम्बयीं प्राप्नोत्। ततः सः रेलयानेन बेलूरं 9-12-1900 इति दिनाङ्के प्राप्नोत्। तस्य गुरुबन्धुभ्यः अन्यमठवासिभ्यः च अतीवसुखदम् आश्चर्यम् आसीत् तद्। तस्य प्रत्यागमनं साकल्येन प्रच्छन्नम् आसीत्। कोऽपि तस्य योजनाः न जानाति स्म। रात्रिभोजनस्य समयः आसीत् सः। स्वामी अपि भोजनाय उपाविशत्। तम् अधिकं भोजनं परिविष्टवन्तः। सः तद् आस्वदितवान्। तं परितः उपविश्य, पश्चिमस्य तस्य अद्भुतान् अनुभवान् शृण्वन्तः ते केऽपि रात्रौ न निद्राणवन्तः। कोऽपि श्रोता घण्टाः यावत् मन्त्रमुग्धः भवेत् तादृशीं कथाकथनशैलीं सः सम्यगेव जानाति स्म।



# प्रवासस्य समाप्तिः

बेलूरमठं प्रत्यागतेन स्वामिना मायावत्याम् आश्रमे श्रीमतः सेवियरस्य दिवङ्गमनस्य वार्ता प्राप्ता। तया वार्तया तस्य महान् आघातः अभवत्। गुडविनसेवियरयोः मृत्योः विषये सुश्रीः मॅक्लिओड् इत्यस्यै प्रेषिते पत्रे तेन लिखितम् - 'एवं द्वौ आङ्ग्लेयौ अस्माकं निमित्तम् अस्माकं हिन्दूनां निमित्तं प्राणार्पणं कृतवन्तौ। आहुत्यर्पणमेव अस्ति तद्।' श्रीमती सेवियर् इत्यनया सह मेलनाय असहनशीलः जातः सः यः अत्यन्तकष्टकारकः प्रवासः अग्रे आसीत् तद्विषये अविचिन्त्य मायावतीं प्रति प्रस्थितवान्। तदा अत्यधिकं शैत्यम् आसीत्। सूचनाप्रेषणव्यवस्था, यातायातव्यवस्था च अतिदुर्बले आस्ताम्। बहवः मार्गाः हिमाच्छन्नाः आसन्। कथमपि एकसप्ताहं यावत् अत्यधिकश्रमदायकं प्रवासं कृत्वा स्वामी तस्य गणः च मायावतीं प्राप्नुवन्। सः श्रीमती सेवियर् इत्यस्याः सान्त्वनम् अकरोत्। चिरकालानन्तरं जातेन मेलनेन ते आनन्दिताः अभवन्। मायावतीगमनमार्गे स्वामिना अन्या अपि दुःखदायिनी वार्ता प्राप्ता यत् खेत्री इति स्थानस्य महाराजः आग्रासमीपे मार्गे जाते अपघाते दिवङ्गतः इति। स्वामी अतीव दुःखितः अभवत्। केभ्यश्चित् दिनेभ्यः परं सः बेलूरमठं प्रत्यागच्छत्।

पूर्वबङ्गालम् आगन्तुम् अत्याग्रहयुक्ताः प्रार्थनाः स्वामी प्राप्नुवन् आसीत्। अन्यदपि महत्त्वपूर्णं कारणमेकम् आसीत्। तस्य माता अपि तत्रत्यानि पवित्रस्थानानि द्रष्टुम् इच्छां प्रकटितवती आसीत्। स्वामी बङ्गालस्य तद्भागं पूर्वं कदापि न अगच्छत् अतः सः ढाकार्थं प्रातिष्ठत। तत्र सः व्याख्यानद्वयम् अकरोत् तथा च नागमहाशयः इति रामकृष्णस्य तच्छिष्यस्य गृहं गत्वा तस्य विधवापत्न्या सह सादरम् अमिलत्। ढाकातः सः चित्तगाँगसमीपस्थं चन्द्रनाथः इति पवित्रस्थानम् अगच्छत् ततः च असमप्रदेशे विद्यमानं पवित्रं कामाख्यामन्दिरम् अगच्छत्। पूर्वबङ्गालस्य सौन्दर्यं चित्ताकर्षकम् अस्ति इति अनुभूय सः अलिखत् - 'अन्ततो गत्वा अहं पूर्वबङ्गाले अस्मि। प्रथमवारमेव अहम् अत्र आगतः। बङ्गालः एतादृशः सुन्दरप्रदेशः अस्ति इति अहम् इतः पूर्वं न अजानाम् एव। त्वया अत्रत्याः नद्यः अवश्यं द्रष्टव्याः एव - प्रत्यग्रजलस्य नियतं

प्रवहन्तः समुद्राः एव ताः ... सर्वमपि हरिद्वर्णमयं ... निरन्तरोत्पादनम्" स्वामिनः कविमनः नैसर्गिकसौन्दर्येण सदैव अभिभूतं भवति स्म। असमप्रदेशे सः तस्य प्रदेशस्य प्रमुखनिदेशकेन सर् हेन्रीकॉटनः इत्यनेन सह मिलित्वा दीर्घचर्चाः अकरोत्। कॉटनः भारतस्य राष्ट्रियाकाङ्क्षाणां विषये अनुकम्पावान् आसीत्।

स्वामी रुग्णः सन् एव बेलूरमठं प्रत्यागच्छत्। तस्य अधिकांशं समयं सः ध्यानपठनलेखनभ्रमणादिषु संन्यासिभिः शिष्यैः च सहः गीतगानादिषु च वापयति स्म। विनोदमयेन सम्भाषणेन तेषा पीडनं, तैः सह आमोदानुभवं च सः इच्छति स्म। सः सामान्यतया शिथिलितप्रबलः दृश्यते स्म चेदपि तेन कतिपयमासान् यावत् पूर्णविश्रान्तिः स्वीकरणीया इति सः वारं वारं सूच्यते स्म। परं सः उत्तरति स्म - 'मम निमित्तं विश्रान्तिः नास्त्येव। श्रीरामकृष्णः यां 'काली' इति वदति स्म तया तस्य मृत्योः त्रिचतुरदिनेभ्यः प्राक् मम शरीरं मनः च स्वाधीनीकृतम्। सा मद्द्वारा अविरतं कार्यं कारयति अपि च कदापि मम शान्तस्थितिं वैयक्तिकसुखेषु अवधानं वा न अनुमन्यते। बेलूरमठे जायमानेषु सर्वेषु धार्मिकोत्सवेषु सः भागं स्वीकरोति स्म। मठस्य विधिविषयकीनाम् अन्यासां कासाञ्चन समस्यानां च समाधानम् अपि सः अकरोत्।

1901 तमे वर्षे डिसेम्बरमासे इण्डियन् नैशनल् काँग्रेस इत्यस्य वार्षिकमेलनं कोलकातायाम् अभवत्। समग्रदेशतः तन्निमित्तम् आगताः प्रतिनिधयः स्वामिना सह मेलनाय बेलूरं प्रति आगच्छन् यतः स्वामिनं जनाः 'भारतस्य देशभक्तः सत्पुरुषः' इति मन्यन्ते स्म। भारतस्य पुनरुज्जीवनस्य तस्य योजनायाः विषये सः तैः सह बहुधा धाराप्रवाहहिन्दीभाषया वदति स्म। तेन सह मिलितवान् कश्चन प्रतिनिधिः अलिखत् - 'वस्तुतः एतैः मेलनैः किञ्चित् सम्मेलनं तत्रैव सम्पन्नं यच्च सम्मेलनं मूलसम्मेलनापेक्षया श्रेष्ठतरम् उपस्थितेभ्यः लाभदायितरं च आसीत्।' सम्मेलनसमये ये बेलूरमठम् आगताः तेषु मुख्यौ महत्त्वपूर्णौ च आस्ताम् महामना गान्धीः, बाल- गङ्गाधर-तिलकः च। गान्धीः आत्मकथायाम् अलिखत् - ब्राह्मसमाजस्य पर्याप्तदर्शनात् परं स्वामिनः विवेकानन्दस्य दर्शनं विना समाधानानुभवः अशक्यः एव आसीत्। अतः महता उत्साहेन अहं मठपर्यन्तं सामान्यतया प्रायः पादाभ्यामेव अगच्छम्। मठस्य सुदूरं विविक्तं च स्थानम् अहम् ऐच्छम्। परन्तु स्वामी तस्य कोलकातागृहे रुग्णावस्थायाम् अस्ति अतः मेलितुं न शक्यः इति ज्ञात्वा मया निराशता अनुभूता। बाल-गङ्गाधर-तिलकः भाग्यशाली आसीत्। स्वामी बेलूरमठे तस्मै सौहार्दमयं स्वागतम् अकथयत्। बेलूरमठगमनविषये तिलकः अलिखत् - 'सः चायम् अपिबत्। वार्तालापावधौ ईषद्विनोदमय्या शैल्या स्वामी अवदत् यत् अहं संन्यासं स्वीकृत्य बङ्गाले तस्य कार्यं कुर्यां तथा च सः स्वयं महाराष्ट्रं गत्वा तदेव कार्यं कुर्यात् चेत् वरं स्यात्। सः अवदत्, 'अन्यप्रदेशे कस्यचित् यादृशः प्रभावः भवति तादृशः स्वप्रदेशे न भवति।'



कतिपयसन्थालश्रमिकाः मठस्य भूमौ कार्यं कुर्वन्ति स्म। तैः सह सम्भाषणं, जीवने तैः अनुभूयमानानां कष्टानां निराशतानां च विषये श्रवणं च स्वामी इच्छति स्म। कस्मिंश्चित् दिने ते भोजनीयाः इति स्वामिनः इच्छा अभवत्। सः स्वयं पाकव्यवस्थां भोजनपरिवेषणव्यवस्थां च निरूढवान्। ते अतीव सन्तुष्टाः स्वामी चापि सन्तुष्टः। सः अवदत् - यूयं नारायणाः स्थ। अद्य युष्मान् भोजयित्वा अहं भगवन्तमेव अरञ्जयम्। अन्यः यः विचारः तस्य मनसि निरन्तरं भवति स्म, तं तुदति स्म च सः आसीत् अस्पृश्यतायाः शापस्य विषये अर्थहीननिषेधानां विषये च। सः सकोपं पृच्छति स्म - देशे भ्रातृत्वभावः अथवा धर्मभावः कश्चन अवशिष्टः अस्ति उत न? अधुना 'अस्पृश्यभावः' केवलः विद्यते। एतादृशाः अपकर्षकाः प्रयोगाः सर्वे उत्क्षेप्तव्याः। अहम् एतान् अस्पृश्यताजनकान् अवरोधान् नाशयित्वा सर्वान् एकत्र आनेतुं कियत्काङ्क्षामि! देशस्य समग्रशरीरे राष्ट्रियरक्तस्य मुक्ताभिसरणं विना कोऽपि देशः उत्थानं साधितवान् इति किं भवन्तः कदापि जगतः समग्रेतिहासे अपश्यन्?"

1902 तमस्य वर्षस्य आरम्भभागे जोसेफाइन मॅक्लिओड् ओकाकुरा काकुझो, श्री.होरी इति जपानदेशीयाभ्यां सह बेलूरम् आगच्छत्। ओकाकुरा प्रसिद्धः कलाविद् कलासमीक्षकः च आसीत्। होरी इत्येषः ऊर्जावान् बौद्धः अर्चकः आसीत्। अनन्तरं जपानदेशस्य कस्यचित् बौद्धमठस्य निर्वाहकः श्रीमान् ओडा अपि तत्र आगच्छत्। स्वामिना सह मेलनं सम्भाषणं च अतिरिच्य ते जपानदेशे भविष्यति धर्मसम्मेलनं प्रति स्वामिनम् आह्वातुं तीव्रतया इच्छन्ति स्म। 'भवता अवश्यम् आगन्तव्यम् अस्माकं साहाय्यं च कर्तव्यम्। अद्य जपानदेशे धर्मजागरणस्य महती आवश्यकता अस्ति अपि च एताम् अत्यावश्यकीं पूर्णतां भवन्तं विना अन्यः कः साधयितुं शक्ष्यति इति वयं न जानीमः।' स्वामी तेषां निमन्त्रणम् अङ्गीकर्तुं सज्जः आसीत् किन्तु तद् यथार्थस्थितिं न प्राप्नोत्। एतादृशं दूरं प्रयाणं कर्तुं स्वामिनः आरोग्यं किञ्चिदपि क्षमं नासीत्। ओकाकुरा स्वामिनः विषये महान्तम् आदरम् अनुभवति स्म। स्वामी अपि तस्य विषये तथैव अनुभवति स्म। ओकाकुरा इत्यस्य अत्याग्रहवशात् स्वामी यत्र बुद्धः ज्ञानं प्राप्तवान् तत्स्थानं बोधगयां प्रति तैः सह गमनम् अङ्ग्यकरोत्। तत्र एकं सप्ताहं यावत् उषित्वा स्वामी तस्य गणः च काशीम् अगच्छन्। स्वामिनः उपदेशैः प्रेरणां प्राप्य बङ्गीयानां कश्चन गणः वाराणस्यां निर्धनानां साहाय्याय 'पुअर मेन्स रिलिफ असोसिएशन्' इति काञ्चित् समाजसेवासंस्थाम् आरब्धवान् इति दर्शनेन स्वामी सन्तुष्टः। तेषां प्रोत्साहनं कुर्वन् सः तान् अवदत् - मम वत्साः, सुयोग्यः भावः अस्ति युष्माकम्। मम स्नेहः आशिषः च सदैव युष्माभिः सह सन्ति। सधैर्यम् अग्रे गच्छत। युष्माकं दारिद्र्यस्य चिन्तां न कुरुत। धनम् आगच्छेत्। युष्माकं प्रियाः आशाः अतिक्रम्य महत् किञ्चित् इतः वर्धिष्यते।' तस्याः संस्थायाः नाम 'रामकृष्ण सेवागृहम्' इति परिवर्तितम्। तस्याः

संस्थायाः प्रथमवृत्तेन सह प्रकाशनाय स्वामी स्वयमेकम् अभियाचनापत्रम् अलिखत्। एषा संस्था रामकृष्णमिशनसंस्थायाः अत्युत्तमासु संस्थासु एका अभवत्। पुणेनगरीयायाः 'मराठा' इति पत्रिकायाः सम्पादकः एन्.सी.केलकरः काश्यां स्वामिना सह अमिलत्। भारतीयानां कष्टानां विषये गभीरं परितापं प्रकटयन् स्वामी अकथयत् यत् पाश्चात्त्यानां राजकीयपद्धतीनाम् अनुकरणमात्रेण अस्माकं देशस्य कोऽपि लाभः न भविष्यति। भारतस्य विकासाय तस्य पारम्परिकसंस्कृतेः अध्यात्मस्य च आवश्यकता अस्ति। स्वामिना सह जातस्य तस्य मेलनस्य अमार्ज्यः परिणामः केलकरस्य मनसि जातः। बहूनां वर्षाणाम् अनन्तरं सः अवदत् - यदि श्रीरामकृष्णस्य तुलनाम् अहं विशिष्टेन अतिदीप्तिमता उल्मुकेन कुर्यां तर्हि तस्य उल्मुकस्य साहाय्येन यः सम्पूर्णसमुदायम् अग्निमयम् अकरोत् सः जनः विवेकानन्दः इति अहं वदेयम्।'

विवेकानन्दः एकं वेदमहाविद्यालयमपि आरब्धुम् इच्छति स्म। सः महाविद्यालयः अग्रे विश्वविद्यालयरूपेण विकासं प्राप्नुयादिति सः आशास्ते स्म। 1901 तमे वर्षे डिसेम्बरमासे काँग्रेसनिमित्तम् आगताः ये प्रतिनिधयः तेन सह मेलनाय आगताः तैः सह सः एतस्याः योजनायाः चर्चाम् अकरोत्। तस्य जीवनस्य अन्तिमे दिने अपि गुरुबन्धुना प्रेमानन्देन सह सः प्रस्तावितस्य महाविद्यालयस्य विषये चर्चाम् अकरोत्। वेदाध्ययनेन कः लाभः स्यादिति प्रेमानन्दस्य प्रश्नस्य उत्तरं तेन कथितम् - तेन मूढविश्वासानां मारणं भविष्यति।' केवलानां महिलानां निमित्तम् एकः मठः स्यादिति स्वामिनः अन्या काचित् तीव्रा मनीषा आसीत्। महिलानां समस्याः महिलाः एव अत्युत्तमरीत्या समाधातुं शक्नुवन्ति इति तस्य दृढनिश्चयः आसीत्। अध्यात्मिकसाक्षात्कारं, सेवाभावं त्यागं च अतिरिच्य महिलानां यदावश्यकम् अस्ति तदस्ति शिक्षणम्। सुष्ठु अधीतवत्यः महिलाः याः भारतस्य धार्मिकसांस्कृतिकपरम्परासु दृढमूलाः आसन् ताः एव नवभारतस्य निर्माणे महाशक्तेः रूपं प्राप्स्यन्ति इति स्वामिनः निश्चिताभिप्रायः आसीत्। आनन्दस्य विषयः नाम 1953 तमे वर्षे यदा दक्षिणेश्वरस्य समीपे रामकृष्णशारदामठः शारदामिशन्संस्था च संस्थापिते तदा स्वामिनः इच्छा साकारा अभवत्।

स्वामिनः आरोग्यं क्षीयमाणम् अस्ति इति स्पष्टं दृश्यते स्म। सर्वेऽपि चिन्ताग्रस्ताः अभवन्। स्वामिना सह मेलनाय अधिकाः जनाः न आगच्छेयुः इति एतदर्थं तस्य गुरुबन्धवः संन्यासिनः व्याकुलाः भवन्ति स्म। परं स्वामी स्वयं चिन्तारहितः आसीत्। ये तं द्रष्टुम् अत्युत्सुकाः आसन् तैः जनैः सह मेलनं वार्तालापं च सः बहु इच्छति स्म। सः वदति स्म - 'अत्र पश्यत! एतस्य शरीरस्य किं प्रयोजनम् अस्ति? अन्येषां साहाय्यार्थम् एतस्य उपयोगः भवतु। स्वामी अन्तिमक्षणपर्यन्तम् उपादिशत् उत न? अहमपि तथैव न कुर्यां किम्? यदि एतच्छरीरं गच्छति तर्हि मम कणमात्रस्यापि चिन्ता



नास्ति। यदा सत्यस्य उत्कटान्वेषकैः सह वार्तालापस्य अवसरम् अहं प्राप्नोमि तदा मम कियान् आनन्दः भवति इत्यस्य कल्पना नास्ति युष्माकम्। मम सहमानवेषु आत्मजागरणकार्यस्य निमित्तम् अहं ससन्तोषं पुनः पुनः म्रियै।'

मठस्य मिशन्संस्थायाः समाजदायित्वस्य च सक्रियव्यवस्थापनकार्यात् विवेकानन्दः आत्मानम् अधिकतया पृथक् कृतवान् आसीत्। परं युवसंन्यासिनां ब्रह्मचारिणां च अध्यात्मिकविकासकार्ये तेषां प्रशिक्षणकार्ये च तस्य रुचिः अनुवर्तते स्म। भारतात् विदेशेभ्यः च तस्य शिष्याः तेन सह मेलनाय बेलूरम् आगच्छन्ति स्म तदा सः प्रसन्नः भवति स्म। गुरुणा उपदेशकेन च सह तद् तेषां पुनर्मेलनं किञ्चन आसीत्। परम् एतन्मेलनम् अन्तिमंम् अस्ति इति काऽपि कल्पना तेषां नासीत्। जूनमासस्य आरम्भभागे स्वामी तस्य भक्तायाः मृणालिनीबोस् इत्यस्याः गृहम् एकं सप्ताहं यापयितुम् अगच्छत्। सा कोलकातातः कतिपयमील् यावद्दूरे कस्मिंश्चित् गृहे वसति स्म। जूनमासस्य नवविंशतितमे दिनाङ्के स्वामी अकस्मात् भगिन्याः निवेदितायाः गृहम् अगच्छत्। निवेदितां सः तस्याः योजनाः अपृच्छत्। तस्याः चित्रग्राहिण्याम् ऐन्द्रजालाकाशदीपे, सूक्ष्मदर्शकयन्त्रे च अत्यन्तरुचिं प्रादर्शयत्। अग्रिमदिने सूक्ष्मदर्शकयन्त्रं स्वीकृत्य बेलूरमठम् आगच्छ इति तां प्रार्थयत्। निवेदिता यथासूचितं तथा अकरोत्। सायं तस्याः गमनात् पूर्वं स्वामी तस्यै आशिषः अयच्छत्। जुलैमासस्य द्वितीयदिनाङ्के सा पुनरपि बेलूरमठम् अगच्छत्। तद्दिने स्वामिनः उपवासः आसीत्, किन्तु मध्याह्नभोजनस्य परिवेषणम् अहमेव करोमि इति सः साग्रहम् अकथयत्। भोजनान्ते सः तस्याः हस्तयोः जलं स्थापितवान् प्रोञ्छेन तस्याः हस्तौ शुष्कौ मार्जितवान् च। निवेदिता विस्मिता भूत्वा विरोधम् अकरोत् - हे स्वामिन्! एतत्सर्वं मया भवन्निमित्तं कर्तव्यं न तु भवता मन्निमित्तम्! 'जीझसः तस्य शिष्याणां पादौ अक्षालयत्' इति स्वामिनः उत्तरेण सा आश्चर्यान्विता। 'परन्तु तद् अन्तिमवारम्' इति झटिति तस्याः मनसि यदागतं तद् वक्तुम् उद्युक्ता आसीत् सा। परन्तु शब्दाः मुखात् न निःसृताः।

दिनद्वयात् परं जुलैमासस्य चतुर्थदिनाङ्के स्वामी घण्टात्रयं यावत् एकाकी एव ध्यानम् अकरोत्। यद्यपि सः सामान्यतया सर्वैः सह भोजनशालायां भोजनं न करोति स्म तथापि तद्दिने सः गुरुबन्धुभिः शिष्यैः च सह भोजनम् अकरोत्। स्वल्पकालात् परं घण्टात्रयं यावत् ब्रह्मचारिणः संस्कृतव्याकरणम् अबोधयत्। तदनन्तरं स्वामिना प्रेमानन्देन सह दीर्घान्तरम् अटनाय अगच्छत्। मठं प्रत्यागत्य किञ्चित् कालं यावत् संन्यासिभिः सह वार्तालापम् अकरोत्। सायङ्काले आसन्ने सः स्वप्रकोष्ठं गत्वा गङ्गाभिमुखः सन् ध्यानमग्नः उपाविशत्। तदनन्तरम् एकं शिष्यम् आहूय प्रकोष्ठस्य सर्वाणि वातायनानि उद्घाटयितुं शिरः वीजयितुं च असूचयत्। ततः घण्टायाम् अतीतायां शिष्यस्य ज्ञानं विनैव स्वामी विवेकानन्दः महासमाधिं प्राविशत्। स्वस्य दिवङ्गमनात्

पूर्वदिने स्वामी बेलूरमठे जोसेफाइन-मॅक्लिओड् इत्येनाम् अवदत् - अहं चत्वारिंशत्तमं वर्षं न द्रक्ष्यामि।' सा अपृच्छत् - किमर्थं गमनम्?" स्वामी उदतरत् - महतः वृक्षस्य छायायाः कारणेन लघुतरूणां वर्धनं न भविष्यति। अन्येभ्यः स्थानकल्पनाय मया गन्तव्यमेव।' समाधेः आकाङ्क्षार्थं तस्य गुरुः तम् अतर्जयत्। यः महान् वटवृक्षः सहस्रशः जनेभ्यः आश्रयं छायां च ददाति तादृशः त्वं भव इति रामकृष्णेन यत् विवेकानन्दः निर्दिष्टः आसीत् तस्याः आज्ञायाः पालनं जातम् आसीत्। अधुना अन्ततो गत्वा गमनसमयः आगतः आसीत्।



# विवेकानन्दः तस्य साहित्यकृतयः च

वाङ्मयक्षेत्रे विवेकानन्दस्य श्रेष्ठसाहित्यसर्जनक्षमता तस्य वाङ्मयज्ञानं च महत्त्वपूर्णैः साहित्यसमीक्षकैः लेखकैः च अङ्गीकृतम्। 1896 तमे वर्षे सप्टेम्बरमासे लिओ टॉल्स्टॉयः दैनन्दिन्याम् अलिखत् यत् केनचित् प्रेषितं भारतीयविद्वत्ता- सम्बद्धम् आकर्षकं पुस्तकम् अहम् अपठम् इति। 1895-96 इति वर्षयोः स्वामी विवेकानन्दः न्यूयॉर्कनगरे शीतकाले प्राचीनभारतीयदर्शनशास्त्रस्य विषये यानि भाषणानि अकरोत् तानि तस्मिन् पुस्तके आसन्। 1911 तमे वर्षे 'द फिलॉसॉफी ऑफ योग' (राजयोग) इति पुस्तकस्य रशियन्भाषया अनुवादः अभवत्। ततः दशकस्य कालानन्तरं विवेकानन्दस्य भाषणानां लेखानां च सङ्ग्रहस्य पुस्तकं किञ्चन टॉल्स्टॉयः अपठत्। एतादृशानां पुस्तकानां पठनम् अतिसुखापेक्षया अपि अधिकम् अस्ति इति सः अलिखत्। तेषां पठनेन आत्मनः वैशाल्यं सिध्यति इति सः अभिमतवान्। विवेकानन्दस्य श्रेष्ठं खण्डनमण्डनसामर्थ्यम् आङ्ग्लभाषाप्रभुत्वं च टॉल्सटॉयः प्राशंसत्। सः अग्रे अयोजयत् - अहो विवेकानन्दस्य आङ्ग्लभाषाज्ञानम्! सः तस्याः सर्वसूक्ष्मताः अजानात्।' 1931 तमे वर्षे प्रसिद्धः फ्रेन्चलेखकः नोबेलपारितोषिकविजेता रोमाँ रोलाँ स्वामिनः विवेकानन्दस्य जीवनचरितम् अलिखत्। स्वामिनः लेखपत्रभाषणादिभिः अतिप्रभावितः रोलाँ अलिखत् - 'तस्य शब्दाः नाम श्रेष्ठं सङ्गीतम् अस्ति। बीथोव्हनस्य शैल्या लिखितानि वाक्यानि हण्डेलस्य गणसङ्गीततुल्यान् भावान् सञ्जागरयन्ति। त्रिंशतः वर्षाणाम् अन्तरे पुस्तकानां पृष्ठेषु विकीर्णानि विवेकानन्दस्य तानि वाक्यानि मम शरीरे विद्युत्तरङ्गप्रवाहस्य अनुभवं विना अहं स्प्रष्टुं न शक्नोमि।' आधुनिकभारतस्य निर्मातृषु अपि विवेकानन्दस्य कृतीनाम् एतादृशः एव प्रभावः आसीत्।

महामना गान्धीः स्वामिनः विवेकानन्दस्य कृतीः आमूलाग्रम् अपठत्। विवेकानन्दस्य कृतीनां पठनात् परं मम भारतप्रेम सहस्रगुणितं जातमिति सः सकार्तज्ञ्यम् अङ्गयकरोत्। स्वामिनः कृतीः यः न अपठत् ततः प्रेरणां च न प्राप्नोत् तादृशः एकोऽपि भारताभिमानी स्वातन्त्र्ययोद्धा च नासीत्। जवाहरलालनेहरुः स्वस्य अनुभवम्

एवम् अस्मरत्-अधुनातनाः कति युवकाः स्वामिनः विवेकानन्दस्य भाषणानि लेखान् च पठितवन्तः इति अहं न जानामि। परम् अहम् एतद् वक्तुं शक्नोमि यत् मम समकालीनेषु तस्य शक्तिशालिप्रभावः आसीत्। इदानीन्तनाः जनाः यदि विवेकानन्दस्य भाषणानि लेखान् च पठेयुः तर्हि तस्मात् ते बहु किमपि पठितुं प्राप्नुयुः। तस्मात् स्वामिनः विवेकानन्दस्य मनसि हृदये च कीदृशः अग्निः ज्वलति स्म इत्यस्य काञ्चित् कल्पनाम् अस्मासु कैश्चित् यथा प्राप्नुवन् तथा ते अपि प्राप्नुयुः। कौतुकस्य विषयः एवमस्ति यत् ते विचाराः पुरातनाः न सन्ति ... अद्यापि ते प्रत्यग्राः एव सन्ति यतः 'येषु विषयेषु सः लिखितवान् अथवा भाषितवान् ते अस्मत्सम्बद्धाः अथवा जागतिकसमस्यासम्बद्धाः मूलभूतविषयाः तेषां विविधमुखानि च आसन्। अतः ते पुरातनाः न भवन्ति। यद्यपि भवन्तः तान् अधुना पठन्ति तथापि ते प्रत्यग्राः एव सन्ति।' इतः सुचिरं प्राक् एतादृशान् एव विचारान् सुभाषचन्द्रबोसः अलिखत् - 'मम समकालीनेषु छात्रेषु स्वामी विवेकानन्दः तस्य लेखनैः भाषणैः च यं प्रभावम् अजनयत् सः देशस्य अन्येन केनापि नायकेन जनितस्य प्रभावस्य अपेक्षया कतिपयगुणितमहत्तरः आसीत्।' गान्धीः, नेहरूः, बोसः च विवेकानन्दस्य लेखानां गुणवत्तायाः प्रभावस्य च विषये यद् अनुभूतवन्तः लिखितवन्तः च तत्तुल्याः एव विचाराः अन्यैः बहुभिः प्रकटिताः। विवेकानन्दस्य विविधलेखानां कवितानां निबन्धानां च मूल्याङ्कनं कुर्वन्तः आधुनिकसाहित्यसमीक्षकाः दुःखं प्राकटयन् यत् सः ततोऽधिकं लेखितुं न अशक्नोत् इति। यदि सः अलेखिष्यत् तर्हि भारतीयसाहित्याय तत्रापि विशेषतया बङ्गसाहित्याय तस्य प्रदानम् इतोऽप्यधिकम् अभविष्यत्।'

स्वामिनः विवेकानन्दस्य अधिकांशकृतयः आङ्ग्लभाषया सन्ति यासां च अनुवादः बङ्गभाषया कृतः अस्ति। मूलतया बङ्गभाषया तेन लिखितानि पुस्तकानि सन्ति प्राच्यः पाश्चात्त्यः च, वर्तमान भारत, भावबर कथा, परिव्राजकः च। एतानि पुस्तकानि अतिरिच्य सः सुन्दरकविताः तथा च साहित्यिकश्रेष्ठतायुक्तानि पत्राणि भाषणानि च अलिखत्। स्वामी विवेकानन्दः इति ख्यातिप्राप्तितः पूर्वं सः नरेन्द्रनाथदत्तः इति नाम्ना साहित्यप्रयासान् आरभत। 1887 तमे वर्षे सः वैष्णवचरणबसकेन सह 'सङ्गीतकल्पतरु' नाम्नः बङ्गगीतानां सङ्ग्रहस्य एकस्य सम्पादनम् अकरोत्। तस्य पितुः आकस्मिकमृत्योः अनन्तरं धनार्जनाय सः अनुवादकार्यं किञ्चित् अकरोत्। गीतगोविन्दस्य तथा च हर्बर्टस्पेन्सरस्य 'एज्युकेशन' इत्यस्य अनुवादं सः अकरोत्। थॉमसकेम्पीसः इत्यस्य लेखकस्य 'इमिटेशन ऑफ ख्राईस्ट' इत्यस्य पुस्तकस्य कतिपयप्रकरणानाम् अनुवादं सः अकरोत् यः प्रथमवारं ज्ञानाङ्कुरः इति बङ्गमासिके प्रकाशितः। एते अनुवादाः तस्य साहित्यप्रतिभायाः पूर्वलक्षणानि आसन्।

विवेकानन्दस्य जीवनावधिः अत्यल्पः आसीत्। श्रीरामकृष्णस्य दिवङ्गमनसमये 1886 तमे वर्षे तस्य वयः त्रयोविंशतितः किञ्चिदेव अधिकम् आसीत्। गुरोः मृत्योः



स्वल्पकालात् परमेव सः परिव्राजकसंन्यासिनः रूपेण समग्रभारते अधिकतया अबङ्गजनैः सह मिलन् भ्रमन् समयम् अयापयत्। साहित्यिकम् उद्यमं कर्तुं तस्य समयः अपि नासीत् रुचिः चापि नासीत्। 1893 तमे वर्षे विश्वधर्मसंसदि भागं ग्रहीतुं विदेशं गतवान् सः चत्वारि वर्षाणि तत्र यापयित्वा भारतं प्रत्यागच्छत्। कोलकातां प्रति आगमनात् परमपि तस्य महान् समयः बङ्गप्रदेशात् बहिः अटने एव गतः। तदनन्तरं तस्य आरोग्यस्य ह्रासः आरब्धः। द्वितीयवारं विदेशं गत्वा आगमनात् परं सः उपसार्धैकवर्षमात्रम् अजीवत्। तस्मात् निरन्तरलेखनाय अत्यल्पं समयं प्राप्नोत् सः। जोसेयः जे.गुडविनः इति ब्रिटिशलघुलेखकः यः न्यूयॉर्कतः आरभ्य स्वामिना सह आसीत् तस्य महद्भिः अविरतैः प्रयत्नैः विना विवेकानन्देन आङ्ग्लभाषया कृतानि अमूल्यानि व्याख्यानानि भाषणानि च निश्चयेन नष्टानि अभविष्यन्। अतिसमर्थः गुडविनः स्वामिनः सर्वाणि भाषणानि, उद्गारान् च यथार्थतया प्रत्यलिखत्। सः स्वामिनः उत्कटशिष्यः जातः। सः यत्र यत्र स्वामी अगच्छत् तत्र तत्र तम् अनुसृत्य सः यद् यद् अवोचत् तत्सर्वं दक्षतया प्रत्यलिखत्। गुडविनस्य कार्याय समर्पणं सुप्रशंसन् विवेकानन्दः तं 'मयि श्रद्धावान् गुडविनः' इति निर्दिशति स्म। गुडविनः प्रेम्णा यं परिश्रमम् अकरोत् तेन एव योगसम्बद्धानि कर्मयोग, राजयोग, भक्तियोग, ज्ञानयोग इति स्वामिनः चत्वारि पुस्तकानि प्रकाशयितुं शक्यानि अभवन्। स्वामी अलासिंगपेरुमलाय (23-3-1896) प्रेषिते पत्रे अलिखत् - 'अग्रिममासे अहम् इङ्ग्लण्डं गमिष्यामि। मया अत्यधिकं कार्यं कृतम् इति चिन्तयामि। मया कृतेन अविरतकार्येण मम ज्ञानतन्तवः नष्टप्रायाः सन्ति। ... परन्तु मम सन्तोषः अस्ति यत् मम भाषणानां लघुलेखनेन कृताभिः टिप्पणीभिः पर्याप्तप्रमाणेन साहित्यं सृष्टम् अस्ति। चत्वारि पुस्तकानि सज्जानि सन्ति। गुडविनस्य मृत्योः (1898) वार्तया तस्य गभीराघातः अभवत्। सः अवदत् -'अधुना मम दक्षिणहस्तः नष्टः। मम हानिः अगणनीया अस्ति।' सः गुडविनस्य मात्रे सुन्दरकवितया युक्तमेकं पत्रम् अप्रेषयत्।

*हे आत्मन्! विकीर्णनक्षत्रे तव पथि अग्रे सर ;*  
*हे परमसुखमय! यत्र विचाराः सदैव मुक्ताः*  
*यत्र स्थलकालाभ्यां दृश्यं कुहिकाच्छन्नं न तत्र सवेगं सर*  
*शाश्वतशान्तिः आशिषः च सन्तु त्वया सह!*  
*तव यथार्थसेवया तव यज्ञः पूर्णतां यातु।*  
*परमस्नेहस्य हृदयभूतं तव गृहं प्राप्नुहि त्वम्*  
*पाटलपुष्पैः धर्मवेदिका इव तव प्रयाणात् परं*  
*समग्रस्थलकालमार्जिकाः तव मधुरस्मृतयः तव स्थानं पूरयन्ति!*  
*बन्धनानि छिन्नानि, तव परमानन्दान्वेषणं सम्पन्नम्*  
*मृत्योः जन्मना च रूपेण आगच्छता सह ऐक्यं सम्पन्नम्*

*हे सहायशील! पृथिव्यां सदैव निःस्वार्थः त्वम्*
*अग्रे सर! अधुनापि सङ्घर्षमयस्य एतस्य जगतः साहाय्यं कुरु!*

तदीये भावपूर्णे पत्रे सः अलिखत् - तस्य मृत्युना मम लोहतुल्यं मित्रम्, अविचलभक्तिमान् शिष्यः, श्रान्तिः नाम किमिति यः न जानात्येव सः श्रमिकः च नष्टः अभवत् अपि च ये अन्येषां निमित्तं जीवनाय एव जायन्ते तादृशानाम् अतिविरलजनानां जगतः निधितः एकः न्यूनः अभवत्।' संन्यासिनि यः कविः आसीत् सः मानवीयगौरवेण स्पृष्टः भूत्वा जागरितः।

महाविद्यालयीयदिनेभ्यः आरभ्य एव विवेकानन्दस्य वाङ्मये महती रुचिः आसीत्। भारतीयं पाश्चात्त्यं च वाङ्मयं दर्शनशास्त्रं च तेन सुष्ठु पठितम् आसीत्। वर्डस्वर्थः इति आङ्ग्लकविषु प्रियः कविः आसीत् तस्य। वर्डस्वर्थस्य एक्सकर्शन् इति कवितायाः विवरणसमये एव प्रधानाचार्यः हेस्टी श्रीरामकृष्णम् उल्लिखितवान् आसीत् येन विवेकानन्दस्य तस्मिन् अवधानम् अभवत्। मिल्टनः इति अपरः तस्य इष्टः कविः आसीत्। मिल्टनस्य 'पॅराडाइज लॉस्ट' इति कृतौ 'सॅटन' इति यत्पात्रम् आसीत् तद् विवेकानन्दस्य इष्टतमम् आसीत्। शेक्सपियरस्य समग्रसाहित्यं विवेकानन्देन पठितम् आसीत्। बायरनः अपि तस्य इष्टः आसीत्। शेली इत्यस्य कविताभिः विवेकानन्दः अतीव भावुकः भवति स्म, प्रेरणां प्राप्नोति स्म च। तस्य 'हिम टू इंटलेक्च्युअल् ब्यूटी' इति कविता, भावहीनस्नेहस्य वैश्वदेवमतम्' उत्कृष्टमानवीयतायाः तस्य कल्पना च विवेकानन्दस्य भावनाशीलं मनः स्पृशति स्म। सः समग्रजगति ऐक्यस्य अध्यात्मिकसिद्धान्तं पश्यति स्म। समकालीनेषु बङ्गलेखकेषु सः बंकिमचन्द्र चटर्जी, दीनबन्धुमित्रः, गिरीशचन्द्रघोषः इत्येतेषां कृतीः रुच्या अपठत्। गिरीशचन्द्र घोषः प्रसिद्धः नाटककारः, अभिनेता, रामकृष्णस्य भक्तः च आसीत् येन सह विवेकानन्दस्य घनिष्ठं सख्यम् आसीत्। सुरेन्द्रनाथमजूमदारस्य कविताः विवेकानन्दस्य इष्टाः आसन्। रविन्द्रनाथठाकुरः यः विवेकानन्दात् वर्षद्वयेन ज्येष्ठः आसीत् (1861 तमे वर्षे जातः) तस्य गीतानि विवेकानन्दः गायति स्म। युवकस्य ठाकुरस्य गीतानि कविताः चापि विवेकानन्दस्य अवधानकर्षणम् अकुर्वन् यद्यपि मूलतया तौ द्वौ अपि जीवनस्य विभिन्नस्तरयोः विचरतः स्म तथापि। विवेकानन्दस्य इष्टतमः लेखकः मायकेल मधुसूदन दत्तः (1824-1873) इत्यासीत्। विवेकानन्दस्य दृष्ट्या सः श्रेष्ठः कविः आसीत् तथा च तेन रचितं मेघनादवधकाव्यम् (1861) यद् आधुनिकभारतस्य प्रथममहाकाव्यम् आसीत् तद् विवेकानन्दस्य अभिप्रायानुसारं बङ्गसाहित्यस्य महत्तमकाव्यरचनम् आसीत्। तत्र यः वीरभावः, पौरुषयुक्ताः कल्पनाः च आसन् ताः विवेकानन्दम् आकर्षन्ति स्म। पौरुषभावः, धैर्यं, वास्तविकनायकत्वभावः इति एतान् अंशान् सः काव्ये तथा च जीवनस्य सर्वेषु मुखेषु द्रष्टुम् इच्छति स्म। दौर्बल्यं भीरुता इति द्वाभ्यां सः द्वेष्टि स्म। तस्मात् एव पॅराडाइज लॉस्ट इत्यस्य सॅटनस्य, मेघनादवधकाव्यस्य मेघनादरावणयोः



च विषये विवेकानन्दस्य प्रशंसाभावः अवगन्तुं शक्यः। 'ब्रह्माण्डं तिष्ठतु अथवा खण्डेषु विदीर्णं भवतु यत्किमपि भवति चेदपि अहं मम कर्तव्यं न विस्मरिष्यामि इति शक्तिमतः रावणस्य शब्दाः आसन् तस्मिन् काव्ये। सर्वेषु पुरुषेषु सः एतमेव भावं द्रष्टुं वाञ्छति स्म। विवेकानन्दस्य लेखनानाम् अपि केन्द्रभावः एषः एव आसीत्।

विवेकानन्देन आङ्ग्लबङ्गभाषाभ्यां कतिपयसुन्दर्यः कविताः लिखिताः। श्रीमता व्ही.के.गोकाकेन सम्पादिते 'द गोल्डन ट्रेझर ऑफ इण्डो-ॲंग्लिकन पोएट्री' इति सङ्ग्रहे विवेकानन्दस्य काली द मदर, द कप, पीस इति कविताः योजिताः। एतासां कवितानां तस्मिन् सङ्ग्रहे योजनस्य कारणं सम्पादकेन स्पष्टीकृतं यत् विवेकानन्दः तेषु केषुचित् सत्पुरुषभारतीयलेखकेषु अन्यतमः आसीत् यस्य वास्तविकं काव्यरचनसामर्थ्यम् आसीत्। गोकाकः अलिखत् - विवेकानन्दस्य पत्रलेखनशैल्याः एव भागः आसीत् तस्य पद्यलेखनम्। सः कदाचित् पत्रस्य मध्ये एव पद्यस्य आरम्भं करोति स्म अथवा कार्यस्य विषये उत्साहं प्राप्य कदाचित् पत्रस्य अन्ते सुन्दरं किञ्चन पद्यं योजयति स्म। द्वितीयभाषायाः सर्जनात्मकप्रयोगे विवेकानन्देन प्राप्तं साफल्यं नाम 'अतिश्रेष्ठा साधना' आसीत्। येषां मातृभाषा आङ्ग्ला एव अस्ति तेषामपि रुचिविषयः भवेत् एषः यत् एतत्प्रकारकेण सम्पर्केण कथं तेषां भाषायां सूक्ष्माः अर्थभेदाः नूतनदृष्टान्ताः च उत्पन्नाः इति। एतादृश्या वाङ्मयसृष्ट्या अन्यदेशस्य राष्ट्रियकल्पनानां, श्रेष्ठसंस्कृतेः च परिचयः तेषां भविष्यति। विचाराणां गाम्भीर्यम्, आकर्षकम् उच्चारणं, कल्पनाः च, गभीरभावनात्मकता इत्येतानि विवेकानन्दस्य गीतानां कवितानां च वैशिष्ट्यानि सन्ति। विवेकानन्दस्य सर्वासु कवितासु नाम बङ्गभाषायाः आङ्ग्लभाषायाः च कवितासु या सर्वाभिः दृष्टिभिः सुन्दरतमा मन्यते सा अस्ति 'काली द मदर' इति तस्य कविता। 'मृत्योः अर्चनम्' इति सङ्कल्पनायाः श्रेष्ठोदाहरणभूतया एतया कवितया भारतीयसाहित्ये नूतनः आयामः कश्चन योजितः। काश्मीरे क्षीरभवान्याः मन्दिरं दृष्ट्वा स्वामिना एषा कविता रचिता। आक्रामकैः अपवित्रीकृतस्य मन्दिरस्य दर्शनेन दिव्यमाता काली तम् आविष्टवती। अतिशक्तिमत्याः विनाशकारिण्याः काल्याः भयङ्करदर्शनं तस्य जातम्। या तेन सह आसीत् तया भगिन्या निवेदितया यस्यां पृष्ठभूमौ सा कविता रचिता तस्य स्मरणार्हं चित्रं तस्याः 'द मास्टर ॲज आय सॉ हिम' इति पुस्तके वर्णितम् अस्ति - 'भयङ्करस्य आराधना इत्येव अधुना तस्य समग्रं क्रन्दनम् आसीत्। रोगेण वेदनया वा एतदेव स्मरणं बहिरागच्छति स्म यत् - सा एव अङ्गम् अस्ति। सा एव वेदना अस्ति। सा एव वेदनादात्री अस्ति, काली! काली! काली! कस्मिंश्चित् दिने सः अवदत् यत् मम मस्तिष्कं विचारैः सुपूर्णम् अस्ति, अपि च तेषां लेखनेन विना मम अङ्गुल्यः विश्रान्तिं न करिष्यन्ति इति। तस्मिन् एव सायङ्काले यदा क्वचित् बहिः गत्वा वयं गृहनौकां प्रत्यागच्छाम तदा तत्र 'काली द मदर' इत्यस्याः हस्तलिखितम् अस्माकं प्रतीक्षायाम् आसीत्।' ज्वरग्रस्तेन इव प्रेरणाग्रस्तेन विवेकानन्देन सा कविता लिखिता। कवितालेखनं

समाप्य स्वस्य एव भावतीव्रतया साकल्येन परिश्रान्तः सः भूमौ अपतत्।

**माता काली**

*नक्षत्राणि विलोपितानि*
*मेघाः मेघान् आच्छादयन्ति*
*स्पन्दमाने सशब्दान्धकारे*
*गर्जति घूर्णति च वायौ*
*सद्यः कारागृहात् विमुक्ताः*
*लक्षशः उन्मत्तात्मानः*
*वृक्षान् समूलान् उत्पाटयन्तः*
*सर्वान् मार्गात् अपसारयन्तः अटन्ति।*
*पर्वतकल्पान् तरङ्गान् कृष्णाकाशं यावत्*
*प्रापयितुं समुद्रोऽपि युद्धं प्राविशत्।*
*मलिनप्रभामयी क्षणद्युतिः सर्वदिक्षु आविष्करोति*
*मृत्योः कृष्णाः धूलिमयाः अनेकसहस्रवर्णच्छटाः।*
*क्लेशान् रोगान् च विकिरन्ती,*
*सानन्दम् उन्मत्तं नृत्यन्ती च*
*आगच्छ! हे मातः, आगच्छ!*
*यतः आतङ्कः एव तव नाम*
*मृत्युः एव तव श्वासः।*
*तव प्रत्येकं कम्पमानं पदम्*
*शाश्वताय जगन्नाशयति।*
*हे सर्वविनाशक, 'काल'!*
*आगच्छ! हे मातः, आगच्छ!*
*यः क्लेशमयं स्नेहम् आह्वयति*
*विनाशस्य नृत्ये नृत्यति,*
*मृत्योः आकारम् आलिङ्गति च*
*तं प्रति आगच्छति माता।*

सत्येन्द्रनाथदत्तः इति प्रसिद्धेन बङ्गकविना बङ्गभाषया तस्याः कवितायाः अतिसुन्दरानुवादः कृतः। 'मृत्युरूपा माता' इति तस्याः नाम अस्ति। स्वामी स्वयमपि बङ्गभाषया 'नाचुक तहाते श्यामा' इति कविताम् अलिखत् या च एतस्य एव भावस्य विस्तृतरूपम् अस्ति। साहित्यसमीक्षकाणां दृष्ट्या 'काली द मदर' इति कविता नाम 'लोकानां भञ्जनेन जगतः विनाशस्य दर्शनम्' अस्ति। इतः परं मातुः काल्याः विषये



विवेकानन्दस्य विचाराः यैः शब्दैः प्रकटिताः तैः तस्य श्रेष्ठसाहित्यरचनायाः क्षमतायाः ज्ञानं भवति। सः अलिखत् -

'माधुर्ये आनन्दे च यथा मातरम् अभिजानाति तथैव दौष्ट्ये, आतङ्के, दुःखे, विनाशे च प्रवृत्तिरूपेण ताम् अभिज्ञातुं पठतु!

भयङ्करस्य आराधनया एव भयङ्करं जेतुं शक्यम् अमरत्वं प्राप्तुं शक्यं च। मृत्युः ध्यायताम्! मृत्युः ध्यायताम्! भयङ्करम् आराध्यताम्, भयङ्करं, भयङ्करम्! माता स्वयमेव ब्रह्म अस्ति। तस्याः शापः अपि वरः एव। हृदयं तद् स्मशानं भवेत् यत्र अहङ्कारः, स्वार्थः, कामनाः च भस्मीभूताः भवेयुः। तदा अपि च तदा एव माता आगमिष्यति।'

स्वामिनः मनसि विचाराणां संमिश्रणम् अविरतं प्रचलति स्म - जगन्मातुः इच्छायै समर्पणं, अन्तपर्यन्तं युद्धस्य निश्चयः, निर्भयः अमरः च भवितुं मृत्योः आराधनं, अभिभवं विना जीवने युद्धम् अन्ते च अन्तः विद्यमानं प्रकाशं दृष्ट्वा नित्यशान्तेः प्राप्तिः। तस्य एते भावाः तस्य 'द साँग ऑफ द संन्यासिन्, द साँग ऑफ द फ्री, होल्ड ऑन येट अ व्हाइल, ब्रेव्ह हार्ट इत्येतासु कवितासु प्रकटिताः। स्वामिनः मृत्योः निर्भया, शान्ता, उत्कटा च अपेक्षा काव्यरूपं प्राप्नोत् जोसेफाईन् मॅक्लिओड् इत्यस्यै प्रेषिते पत्रे -

*अहम् अग्रे पृष्ठतः च पश्यामि*
*जानामि च यत् सर्वमपि सम्यगस्ति*
*मम गभीरतमे दुःखे विद्यते*
*प्रकाशमानः कश्चन आत्मा।*

आङ्ग्लबङ्गभाषयोः तस्य अन्यकवितापत्रभाषणलेखनेषु तस्य विचाराणां वैविध्यस्य समृद्धिः प्रकटिता अस्ति। मानवस्य स्वातन्त्र्यभावस्य विषये तस्य गभीरा चिन्ता, अनुकम्पा, प्रशंसाभावना च 'टू द फोर्थ ऑफ जुलै, टू द अवेकन्ड इन्डिया' इति कविताद्वये प्रकटिताः। जुलैमासस्य चतुर्थदिनाङ्कः यः अमेरिकादेशस्य स्वातन्त्र्यदिनम् अस्ति तस्य योग्यपद्धत्या आचरणाय स्वामिना रचिता एषा कविता तस्य अमेरिकादेशीयशिष्याणां कृते सुखदाश्चर्यम् आसीत्। तस्याः अन्तिमचरणः आसीत् -

*हे भगवन्, तव प्रतीकाररहिते पथि अग्रे सर*
*तावत् यावत् तव मध्याह्नातपः समग्रजगति प्रसरेत्*
*तावत् यावत् प्रत्येकस्मात् देशात् तव प्रकाशः प्रतिफलेत्*
*तावत् यावत् उन्नतशिरस्काः पुरुषाः महिलाः च*
*तेषां नष्टानि बन्धनानि दृष्ट्वा प्लवमाने आनन्दे*
*तेषां जीवनस्य नवीकरणं जानीयुः!*

काश्मीरे 1898 तमे वर्षे जुलैमासस्य चतुर्थे दिनाङ्के स्वामी एतां कविताम्

अरचयत्। चतुर्णां वर्षाणाम् अनन्तरं तस्मिन्नेव दिनाङ्के सः दिवङ्गतः। अतः अनन्ते अन्तिममुक्तेः तस्य उत्कटेच्छायाः भावपूर्ण प्रकटनम् इति मन्यते एषा कविता। एषा एव मुक्तेः मनीषा तस्य 'साँग ऑफ द फ्री' इति कवितायाम् अपि दृश्यते यत्र विवेकानन्दः मुक्तात्मनः माहात्म्यं सुन्दरतया वर्णयति -

*स्वप्नेभ्यः जागृत, बन्धनेभ्यः मुञ्चत*
*मा बिभित! एतद्रहस्यम्,*
*मम छाया मां भाययितुं न शक्नोति*
*एतद् स्पष्टं जानीत यत् अहं सः एव अस्मि।*

स्वामिनः विवेकानन्दस्य सर्वेषु लेखनेषु साकल्येन निर्भयभावः, पौरुषभावः, कीदृशमपि आह्वानं नाम मृत्युमपि सम्मुखीकर्तुं सज्जता इत्येते अंशाः समग्रतया व्याप्ताः सन्ति। तस्य कविताः अतिरिच्य तस्य भाषणेषु, पत्रेषु, कथनेषु च एषः एव भावः प्रकाशते। तस्य शब्दानां चयनं, तेषाम् अभिव्यञ्जनं च प्रेरणादायि स्पन्दनमयं च अस्ति। कॅलिफोर्नियामध्ये तेन कृतस्य एकस्य भाषणस्य कतिपयपङ्क्तिभिः एतद् स्पष्टं भवेत् - 'अनेकदा क्षुधार्तः, व्रणितपादः, श्रान्तः च अहं मृत्युमुखम् अगच्छम्। दिनानि दिनानि यावत् अन्नस्य कणमपि अप्राप्य अहम् अग्रे पदं निक्षेप्तुं न शक्नोमि स्म। अहं कस्यचित् वृक्षस्य छायायां पतामि स्म। अधुना प्राणाः गच्छन्ति इति भासते स्म। मम मुखात् शब्दः अपि न निःसरति स्म, चिन्तनमपि न शक्यम् आसीत्। किन्तु अन्ते मनः एतां कल्पनां प्रतिगच्छति स्म - 'मम न भयम् अस्ति न वा मृत्युः। अहं न कदापि जातः न मृतः च। मम न बुभुक्षा भवति न वा पिपासा। अहं तद् अस्मि! अहं तद् अस्मि! समग्रप्रकृतिः अपि मां चूर्णीकर्तुं न शक्नोति, सा तु मम दासी अस्ति। हे देवाधिदेव! हे परमेश्वर! तव सामर्थ्यं प्रदर्शय! तव नष्टं साम्राज्यं पुनः प्राप्नुहि! उत्तिष्ठ, चल, मा तिष्ठ!' अपि च पुनः शक्तिं प्राप्य अहम् उत्तिष्ठामि स्म, अद्य अहम् अत्र अस्मि, सजीवः। एवं यदा तमः आगच्छति तदा वस्तुतत्त्वं प्रतिपादयत। तेन प्रतिकूलं सर्वमपि लुप्तं भविष्यति। यतः अन्ततो गत्वा सर्वोऽपि कश्चन स्वप्नः एव अस्ति खलु। समस्याः पर्वताकारायन्ते, सर्वमपि भयङ्करं विषादमयं च भासते चेदपि तन्मायामात्रमेव अस्ति। मा बिभ्यतु, तदा तद् निराकृतं भवति। तद् सम्पीडयतु तदा तद् लुप्तं भवति। तद् पादाभ्यां प्रहरतु तदा तद् म्रियते।'

'द साँग ऑफ द संन्यासिन्' इति स्वामिनः कविता अपि कृतिरत्नम् इति मन्यते। तस्मिन् विद्यमानं संन्यस्तभावं या बहिरानयति तादृश्यां मानसिकस्थितौ रचिता अस्ति सा। विरोधस्य अध्यात्मस्य च भावौ तस्यां प्रकटितौ स्तः। तस्य चिन्तनशैलीं संन्यासिरूपेण कार्यस्य योजनां च भर्त्सयतः कस्यचित् पत्रस्य प्राप्त्या एतां कवितां लेखितुं सः प्रेरितः। तस्य वैराग्यभावस्य अवगमनगाम्भीर्यस्य च निरतिशयता शक्तिः



च एतया कवितया ज्ञातुं शक्या। सर्वविधबन्धनेभ्यः, स्नेहबन्धनेभ्यः, द्वेषभावात्, उत्तमानुत्तमाभ्यां च स्वस्य मोचनस्य कस्यचित् संन्यासिनः आवश्यकता तथा च प्रशंसादूषणादीनां चिन्तां विना अविचलः कार्यसमर्पणभावः च एतया कवितया प्रकाश्यते। यतः सत्यस्य मार्गे क्रमणं कृत्वा सत्यस्य अवगमनम् इत्येतदेव संन्यासिनः अन्तिमलक्ष्यम् अस्ति खलु!

*सत्यं कतिपयाः एव जानन्ति, हे महात्मन्*
*अवशिष्टाः तुभ्यं द्विष्युः त्वाम् उपहसेयुः च किन्तु*
*मा अवधेहि, हे मुक्तात्मन्! त्वं स्थानात्*
*स्थानं गच्छन् तान् तमसः बहिरानय, मायायाः*
*अवगुण्ठनम् अपसारय वेदनायाः भयं विना*
*सुखस्य अन्वेषणेन विना च।*
*एतयोः पारं गच्छ हे धीरसंन्यासिन्!*
*वद - ओम् तद् सत्, ओम्।"*

दिव्या काचित् अशान्तिः अपि तस्य 'माय प्ले इज डन' इति कवितायाः मुख्यलक्षणम् अस्ति। सः आङ्ग्लभाषया अन्याः अपि काश्चन कविताः अलिखत् यासु कतिपयाः तेन तस्य पाश्चात्यशिष्येभ्यः भक्तेभ्यः च प्रेषितानां पत्राणाम् अंशाः सन्ति। सङ्ग्रहरूपेण तस्य आङ्ग्लकविताः साहित्यस्य उन्नतस्तरीयाः सन्ति। आधुनिकभारतीयसाहित्यस्य भारतीयाङ्ग्लकाव्यानि इति यन्मुखम् अस्ति तद् विवेकानन्दस्य लेखनेन समृद्धं जातम्। भारतीयसाहित्यस्य एतस्मै क्षेत्राय स्वामिनः विवेकानन्दस्य प्रदानस्य मूल्याङ्कनं कुर्वन् व्ही.के.गोकाकः लिखति - 'एतेषु दिनेषु भारते एतावन्ति चारुपद्यानि लिख्यन्ते। शब्दस्य, उक्तेः, वाक्यखण्डस्य च पुनः पुनः परिष्कारः क्रियते। परन्तु तस्मिन् पद्ये आत्मा न भवत्येव। तद् क्षुद्रविषयसम्बद्धं भवति तथा च वयं तद् ततोऽपि क्षुद्रतरया रीत्या स्वीकुर्मः। स्वामिनः विवेकानन्दस्य समीपे कतिपयानि अपरिष्कृतानि वज्राणि सन्ति किन्तु यानि कृत्रिममौक्तिकानि अथवा ये काचखण्डाः अद्य वज्रायन्ते तेषाम् अपेक्षया तानि अनेकगुणितानि अधिकमूल्यवन्ति सन्ति।' विवेकानन्दस्य आङ्ग्लकवितानां मूलभूतगुणान् एतद् संक्षिप्तं मूल्याङ्कनम् अधोरेखाङ्कितं करोति।

विवेकानन्दस्य बङ्गकवितासु अपि समानाः कल्पनाः दृश्यन्ते, रसः अपि तादृशः एव। बङ्गसाहित्यसमीक्षकैः याः श्रेष्ठाः रचनाः इति मन्यन्ते तासु सृष्टि, प्रोलोय बा गभीर समाधि, साखर प्रति, नाहि सूर्य नाहि ज्योति, गाये गीत सोनाते तोमाय इति एतासां समावेशः अस्ति। कविः विवेकानन्दः रहस्यमयः योगी अस्ति। परन्तु तस्य अन्यानि मुखानि अपि सन्ति। सागर बक्षे (सागरस्य वक्षसि) तथा च 'टू ॲन अर्ली

व्हायोलेट्' इति तस्य कविताभ्यां तस्य प्रकृतिप्रियता, प्रकृतिसौन्दर्यप्रियता च प्रकटिता भवति। विवेकानन्दस्य कविमनसः प्रकटीकरणं तस्य कवितामात्रे नास्ति अपि तु तस्य अभिव्यक्तिः तस्य सर्वेषु लेखनेषु विकीर्णा दृश्यते, तस्य अतिगम्भीरदार्शनिककृतिषु चापि। भगिनी निवेदिता लिखति यत् हिन्दुधर्मस्य दर्शनशास्त्रविषयकेषु लेखनेषु भाषणेषु च स्वामी अधिवक्तृणां शैल्या वादस्य उपस्थापने सदैव कविताकिरणान् प्रकाशयति स्म। अमेरिकायां डेट्रॉईट्नगरे स्वामिना कृतस्य व्याख्यानस्य वृत्तं 'डेट्रॉईट् फ्री प्रेस' इति पत्रिकायां (17-2-1894) एवं प्रकाशितम् -- तस्य स्वदेशे यादृशानि विविधप्रकाशमयवर्णैः सज्जीकृतानि आकर्षकाणि प्रसन्नानि च हस्तनिर्मितानि वस्त्राणि ध्रियन्ते तत्तुल्यमेव अतिसुन्दरं चिन्तनाय सुखदं तार्किकं वस्त्रं तेन धृतम् आसीत् यस्मिन् पूर्वदिशायाः मोहकतमः सुगन्धः आसीत्। यथा कश्चन चित्रकारः वर्णान् उपयुङ्क्ते तथा एषः ईषत्कृष्णः सभ्यपुरुषः काव्यात्मककल्पनाः उपयुङ्क्ते तथा च यत्र आवश्यकाः तत्रैव वर्णान् लिम्पति सः।'

भाषणे दृष्टान्तानाम् उपयोगस्य तथा च प्रश्नस्य उत्तरकथनाय अथवा कस्यचित् बिन्दोः विवरणाय काव्यात्मकसमानतानाम् उपयोगस्य विवेकानन्दस्य विशिष्टसामर्थ्यस्य विषये विविधाः अभिलेखाः जनानाम् अनुभवाः च सन्ति। मॅडम् एम्मा काल्वे तस्याः 'माय लाईफ' इति जीवनचरित्रे एतादृशमेकं प्रसङ्गम् उल्लिखितवती - अहं मम स्वीयं व्यक्तित्वं रक्षितुम् इच्छामि, शाश्वतैक्ये विलीना भवितुं नेच्छामि इति तथा च तादृशीं भयङ्करां कल्पनामपि अहं कर्तुं न शक्नोमि इति वादं सा स्वामिना सह अकरोत्। तदा स्वामी तां दृष्टान्तरूपेण यद् अवदत् तद् अतिश्रेष्ठं काव्यरत्नम् अस्ति -

कस्मिंश्चित् दिने एकः जलबिन्दुः विशाले समुद्रे अपतत्। तत्र पतितः सः तथैव रोदितुम् आक्षेप्तुं च आरभत यथा अधुना त्वं करोषि। महासमुद्रः बिन्दुं दृष्ट्वा अहसत्, अपृच्छत् च - किमर्थं त्वं रोदिषि इति अहं नावगच्छामि। यदा त्वं मया सह मिलसि तदा त्वं तव तैः सर्वभातृभगिनीभिः सह अन्यबिन्दुभिः सह च मिलसि यैः अहं निर्मितः अस्मि। त्वं समुद्ररूपमेव प्राप्नोषि। यदि त्वं मां त्यक्तुम् इच्छसि तर्हि त्वया सूर्यकिरणस्य साहाय्येन मेघं यावत् आरोढव्यं केवलम् अस्ति। ततः त्वं पुनरपि अधः आगन्तुं शक्नोषि, लघुजलबिन्दुरूपेण यः च बिन्दुः तृषार्तपृथिव्याः निमित्तम् आशीः स्वरूपः भवति।'

विवेकानन्दस्य इङ्ग्लण्डतः अमेरिकां प्रति प्रवासे 1899 तमे वर्षे अगस्तमासे या तेन सह आसीत् सा मेरी फन्क इति तस्य अमेरिकादेशीया भक्ता यद् प्रवासवर्णनम् अलिखत् तस्मिन् विवेकानन्दस्य प्रकृत्या सह सङ्गमस्य, ततः तस्य काव्यसर्जनक्षमता कथं प्रेरिता भवति स्म इत्यस्य च वर्णनम् अस्ति। सा लिखति - समुद्रः शान्तः आसीत् कौमुदी च सम्मोहिका आसीत्। अद्भुतरात्र्यः आसन् ताः। स्वामी नौतले इतस्ततः अटति स्म। कौमुद्यां नृपतुल्यदर्शनः सः तदा तदा प्रकृतिसौन्दर्यस्य विषये



अस्माभिः सह लपितुं तिष्ठति स्म। 'अपि च यदि एषा माया एतावती सुन्दरी अस्ति तर्हि तस्याः पृष्ठतः विद्यमानं सत्यतत्त्वं कियत्सुन्दरं स्यादिति चिन्तयत' इति अकथयत् सः।

कस्याञ्चित् अतिसुन्दर्यां पूर्णिमायाः रात्रौ चन्द्रः मृदुतया स्वर्णवर्णेन प्रकाशमानः आसीत्। रहस्यमयी मनोहारिणी च रात्रिः आसीत् सा। तस्यां रात्रौ रात्रेः सौन्दर्यं स्वदमानः सः सुदीर्घं कालं मौनम् अतिष्ठत्। अनन्तरम् अकस्मात् अस्माकम् अभिमुखं भूत्वा अङ्गुल्या समुद्रम् आकाशं च प्रदर्शयन् अकथयत् – 'काव्यपठनं किमर्थम् आवश्यकं यदा काव्यस्य सारः एव पुरतः विद्यते।'

काव्यं स्वामिनः प्रियम् आसीत्। सः बहुधा स्वयं तद् वदति स्म, अन्येषां मुखेन श्रोतुम् इच्छति स्म च। कस्मिंश्चित् दिने यदा सः कस्याश्चित् काव्यकृतेः पृष्ठानि परिवर्तयन् आसीत् तदा जर्मनदेशीयेन प्राच्यशास्त्रविदा पॉल डॉयसेनेन पृष्टस्य प्रश्नस्य उत्तरमपि सः न अकथयत्। अनन्तरं स्वामी तं क्षमां प्रार्थितवान् यत् तस्यां कृतौ अहं तावान् निमग्नः आसं यत् भवतः प्रश्नं न श्रुतवान् एव इति। तदनन्तरं सः डॉयसेनस्य निमित्तं तस्मात् पुस्तकात् पद्यानि अवदत्।

आङ्ग्लबङ्गभाषाभ्यां गद्यलेखने स्वामिना सुमहत् साफल्यं प्राप्तम्। तस्य पुस्तकानि भाषणानि पत्राणि च तस्य कृतिसङ्ग्रहस्य महत्तमः भागः भवति। पाठकाः समीक्षकाः च अनेककारणैः एतेषां द्वारा प्रभाविताः भवन्ति। साहित्यविद्वांसः तस्य बङ्गभाषया आङ्ग्लभाषया च रचितस्य गद्यस्य तुलनां तत्तद्भाषातज्ज्ञानां कृतिभिः सह कुर्वन्ति। चिन्तकलेखकयोः रूपेण सः पारम्परिकतायाः आधुनिकतायाः च उत्कृष्टसम्मिश्रणरूपः आसीत्। स्वीये सर्जनात्मके लेखने सः घटकांशानां दृष्ट्या, रूपस्य दृष्ट्या च नवीनपद्धतीनां निवेशाय प्रयतते स्म। समकालीनेन असमीचीनकादम्बरीनाटकयोः राशिना अप्रसन्नः सः पृच्छति स्म - भवतां साहित्ये इतिहासः, दर्शनशास्त्रं, वैज्ञानिकलेखनानि च कुत्र सन्ति?' उन्नतदार्शनिकविषयाः भवन्तु अथवा जटिलधार्मिकविषयाः वा सर्वत्र भाषा संवादस्य साक्षात् शक्तिमत् च साधनं भवतु इति सः इच्छति स्म। एकदा सः अकथयत् - श्रीरामकृष्णस्य अवतरणेन विचारेषु भाषायां च नवप्रवाहः कश्चन उत्पन्नः अस्ति - सर्वस्य अपि नूतनया शैल्या पुना रचना करणीया अस्ति।' रामकृष्णविवेकानन्दान्दोलनेन भारतीयसाहित्यस्य इतिहासे विशेषतया बङ्गसाहित्यस्य इतिहासे नूतनस्य युगस्य आरम्भः कृतः अस्ति। विवेकानन्दः एव तस्य आदर्शरूपस्थापकः वेगवर्धकः च आसीत्। विवेकानन्दस्य स्वीयानि लेखनानि, श्रीरामकृष्णविवेकानन्दयोः विषये अन्यैः लिखितानि पुस्तकानि, तयोः कृतयः, कल्पनाः च अनेकभारतीयभाषाभिः-प्रकाशितानि। सङ्ग्रहरूपेण तस्य साहित्यस्य निर्देशः 'रामकृष्णविवेकानन्दसाहित्यम्' इति क्रियते।

स्वामिनः भाषणानि लेखनानि च तथा च राजयोग, भक्तियोग कर्मयोग इति

तस्य कृतयः जगतः प्रशंसापूर्णम् अवधानाकर्षणम् अकुर्वन्। 17-2-1896 इति दिनाङ्के कस्मैचित् शिष्याय लिखिते पत्रे स्वस्य लेखनोद्देशस्य लेखनशैल्याः च वर्णनं सः एवम् अकरोत् -

'हिन्दुकल्पनानाम् आङ्ग्लभाषया अभिव्यञ्जनं तथा च शुष्कदर्शनशास्त्रज-टिलदेवताख्यानाभ्यां, विलक्षणात् आश्चर्यकारकात् मानसशास्त्रात् च तादृशस्य धर्मस्यैकस्य सर्जनं यः सुकरः, सरलः, लोकप्रियः च सन् अत्युन्नतमनसाम् आवश्यकताः पूरयेत् इत्येतत्कार्यं ते एव अवगच्छेयुः ये पूर्वं तादृशं प्रयत्नम् अकुर्वन्। कल्पनास्तरे विद्यमानम् अद्वैतं दैनन्दिनजीवने प्राणमयं काव्यमयं च भवेत्। जटिलदेवताख्यानेभ्यः घनीभूताः नैतिकाकाराः आगच्छेयुः तथा च भ्रमजनकात् योगशास्त्रात् वैज्ञानिकतमं प्रायोगिकं मानसशास्त्रम् आगच्छेत्। पुनश्च एतस्य समग्रस्य कृते तादृशं रूपं कल्पनीयं येन कश्चन बालः अपि तद् अवगच्छेत्। एतदस्ति मम जीवनकार्यम्।' एतत्कार्यं सः महता उत्साहेन समर्पणभावेन च अकरोत्।

विख्यातः साहित्यसमीक्षकः डा. श्रीकुमारबॅनर्जी अलिखत्—यथा बंकिमचन्द्र चटर्जी, मायकेल मधुसूदन दत्त, रवीन्द्रनाथठाकुर इत्येतेषां तथैव विवेकानन्दस्य अपि एकः पादः स्वदेशस्य भूमौ दृढमूलः आसीत् तथा च अपरेण पादेन सः पाश्चात्त्यरिक्थस्य समृद्धानि वैविध्यमयानि क्षेत्राणि चरति स्म। चिन्तनसंस्कृत्योः युगलमण्डलयोः आदर्शपरिपूर्णमाध्यमरूपेण सः कार्यम् अकरोत्। तस्मिन् ये पाश्चात्त्यप्रभावाः आसन् तेषां तस्य मूलसर्जकशक्तिभिः सह सम्मिश्रणस्य परिणामः आसीत् तस्य आङ्ग्लभाषाप्रभुत्वम्। यया तेजस्विशैल्या विवेकानन्दः कञ्चन धर्मं तस्य सूक्ष्मगहनताभिः, गूढधारणाभिः, पूर्वपरम्पराभिः किम्वदन्तीभिः दर्शनशास्त्रेण च सह तत्सर्वम् अजानतः पाश्चात्त्यमनसः कृते प्रस्तुतवान् तद् तस्मात् पूर्वं न केनापि कृतम्। विवेकानन्दस्य भाषा अत्युन्नतशिखराणि प्राप्नोति। सा तेजस्विनी, धीमती, अनुनयकारिणी च अस्ति। तस्य भाषणसमये तेन उपयुक्ताभिः कल्पनाभिः, वर्णनैः, क्वाचित्कैः कल्पितप्रसङ्गैः च यथा जनाः मन्त्रमुग्धाः भवन्ति स्म तथैव तस्य लेखनानां पाठकाः अपि भवन्ति। तस्य लेखनभाषणयोः गर्जतः सिंहस्य मधुरं कूजतः कोकिलस्य च सुदीप्तिमत् मिश्रणं दृश्यते। विषयानुसारं, तस्य मानिसिकस्थितेः अनुसारं च भाषा तस्याः उपस्थापनशैली च भिद्यते। तस्य लेखनानि तस्य व्यक्तित्वं, प्रस्फुरन्तम् उत्साहम्, ऊर्जां, दृढविश्वासं च आविष्कुर्वन्ति। तस्य ऋजुता पारदर्शिनी अस्ति। सुनीतीकुमारचॅटर्जीमहोदयस्य अभिप्रायानुसारं स्वामिनः लेखनस्य साफल्यं तस्य लेखनशैल्यां विद्यते 'या च शैली ओजस्विनी सती तस्य विशिष्टव्यक्तित्वेन अङ्किता आसीत्।' एतैः कारणैः एव सः शिकागोनगरे विश्वधर्मसंसदि श्रोतॄणां हृदयानि जितवान्।

स्वामिनः विवेकानन्दस्य बङ्गसाहित्याय महत्तमं प्रदानम् आसीत् तस्य अति प्रभावजननी संलापोचिता भाषाप्रयोगशैली। नवदशतमस्य शतकस्य मध्यभागे एव एषा



प्रक्रिया आरब्धा आसीत्। प्यारेचन्दमित्रः टेकचन्दठाकुर इति नाम्ना 1858 तमे वर्षे अलालेर घारेर दुलाल इति यां कथाम् उपरि उल्लिखितया शैल्या अलिखत् तस्याः नैतिकोद्देशः आसीत् - सामाजिकदुराचरणानि प्रकाश्य तेषां निवारणोपायानां सूचनम् इति। कालीप्रोसन्न सिन्हा अपि एतस्य प्रयोगस्य अनुकरणम् अकरोत् हुतुम पेन्छर नक्सा (1862) इति कृत्या। तस्यां कथायां संलापोचितया भाषया कोलकातायाः समाजजीवनस्य सजीवचित्रणम् अस्ति। प्यारेचन्दः कालीप्रोसन्नः च द्वौ अपि उपहासगर्भलेखने समर्थौ लेखकौ आस्तां यौ मिश्रितसंलापोचितभाषाम् उन्नततरं स्तरं नेतुम् इच्छतः स्म। परन्तु तेषां प्रयत्नानां स्थायिमूल्यं किमपि नासीत्। तयोः लेखनेषु शुद्धभाषायाः संलापोचितभाषायाः च मिश्रणम् आसीदेव। ताभ्यां तथा च विवेकानन्दात् पूर्वतनैः कैश्चित् संलापोचिता भाषा मर्यादितोद्देशार्थं केवलं तन्नाम समाजस्य सामाजिकदुराचरणानां च विषये उपहासगर्भनाटकादीनां लेखनार्थं केवलं प्रयुक्ता आसीत्। विवेकानन्दः प्रथमवारं तादृश्याः भाषायाः प्रयोगं गभीरैतिहासिकसामाजिकसांस्कृतिक-दार्शनिकविषयाणां लेखनाय अकरोत्। सः न केवलं सफलः अपि तु गद्यलेखनस्य नूतनां शैलीं काञ्चित् अन्विष्टवान् यां रवीन्द्रनाथठाकुरः अपि प्रशस्तवान्। विवेकानन्दस्य साहित्यिकप्रयोगं श्रेष्ठसाहित्यसमीक्षकेभ्यः आरभ्य सामान्यपाठकपर्यन्तं सर्वस्तरीयाः पाठकाः इष्टवन्तः। साहित्यरचनाकर्तुः रूपेण विवेकानन्दस्य अतिविशिष्टा साधना आसीत् एषा।

विवेकानन्दस्य प्राच्य ओ पाश्चात्य, भाववर कथा, बर्तमान भारत इत्येतानि लेखनानि बङ्गसाहित्यस्य कृतिरत्नानि सन्ति। 'पत्रावली' इति शीर्षकेण प्रकाशितानि तस्य पत्राणि अपि तत्तुल्यानि एव। तस्य कैश्चित् भक्तैः सुहृद्भिः च तस्य ये वार्तालापाः याः अनौपचारिकचर्चाः च लेखाङ्किताः ताभिः अपि विवेकानन्दः कीदृशः चारुः, विदग्धः, प्रसन्नः च सम्भाषणपटुः आसीत् इति स्पष्टं भवति। तस्य साहित्यिकनैपुण्यम् उपेक्षितुं न शक्यते एव। भाषायाः प्रयोजनस्य सफलप्रयोगस्य च विषये विवेकानन्दस्य सुस्पष्टा कल्पना आसीत् -

'सरलता एव तद्रहस्यम् अस्ति। अतीव संलापोचिता सत्यपि अतिप्रकाशिका मम स्वामिनः भाषा एव मम भाषायाः आदर्शः अस्ति। यः विचारः बोधनीयः अस्ति तां सा अभिव्यञ्ज्यात् एव।'

एतावता स्वल्पेन कालेन बङ्गसाहित्यस्य परिष्काराय प्रयत्नः कृतः चेत् सा कर्तिता शुष्का च भविष्यति। समीचीनतया वदामः चेत् तस्यां क्रियापदानि न सन्ति। काव्ये एतं दोषं समीकर्तुं मायकेल मधुसूदनदत्तः प्रायतत। बङ्गालस्य श्रेष्ठतमः कविः आसीत् कविकङ्कणः। संस्कृतभाषायाः श्रेष्ठतमं गद्यम् अस्ति पतञ्जलेः महाभाष्यम्। तस्य भाषा ऊर्जस्वला अस्ति। हितोपदेशस्य भाषा असमीचीना नास्ति, किन्तु कादम्बर्याः भाषा तु अपकर्षस्य उदाहरणम् अस्ति।

संस्कृतभाषायाः आधारेण बङ्गभाषायाः पुनः घटनं न आवश्यकम् अपि तु पालीभाषायाः आधारेण आवश्यकं यया सह तस्याः तीव्रं सादृश्यम् अस्ति। परन्तु तान्त्रिकशब्दानां निमित्तं बङ्गभाषया शब्दनिर्माणसमये अथवा अनुवादसमये सर्वेषामपि संस्कृतशब्दानामेव प्रयोगः करणीयः, नवशब्दानां रचनार्थं प्रयत्नः करणीयः च। एतन्निमित्तं यदि संस्कृतशब्दकोषात् तेषां सर्वविधतान्त्रिकपदानां सङ्ग्रहः कृतः तर्हि तेन बङ्गभाषायाः घटनाय महोपकारः भवेत्।'

विवेकानन्दः अलिखत् यत् यतः भारते आ प्राचीनकालात् समग्रमपि अध्ययनं संस्कृतभाषया एव आसीत् अतः अधीतवत्सु सामान्यजनेषु च महदन्तरम् उत्पन्नम्। परन्तु सर्वे अपि महापुरुषाः ये जगतः हिताय जाताः ते यां भाषां जनाः अवगच्छन्ति तया भाषया एव अपाठयन्। यद्यपि वैदुष्यम् इति श्रेष्ठः एव विषयः अस्ति, तथापि किं तद् तां भाषां विहाय अन्यया कयाचित् भाषया प्रदर्शयितुं न शक्यते या दृढा, अवगन्तुं कठिना, अप्राकृतिकी, कृत्रिमा च नास्ति? प्राकृतिकीं काञ्चित् भाषां परित्यज्य कस्याश्चित् अप्राकृतिकभाषायाः सर्जनेन किम्? स्वामी अनुभवति स्म यत् जनैः तेषां शैक्षिकशोधप्रबन्धाः वैज्ञानिककृतयः, दार्शनिककृतयः चापि सरलतरया भाषया लेखनीयाः यां सामान्याः जनाः अपि अवगन्तुं शक्नुयुः। सः साग्रहं प्रतिपादयति स्म - यया भाषया वयं स्वं सहजतया अभिव्यञ्ज्मः, यया वयं कोपदुःखस्नेहादीन् सूचयामः तदपेक्षया वरतरा अन्या काचित् भाषा भवितुम् एव नार्हति। सा कल्पना, सः अभिव्यञ्जनप्रकारः, सा कथनशैली इत्यादयः अंशाः अस्माभिः दृढतया ग्रहणीयाः। वार्तालापस्य भाषायां या शक्तिः संक्षिप्तता, अभिव्यञ्जनक्षमता च भवति सा कृत्रिमभाषायां नैव भविष्यति। सः अकथयत् - 'भाषा तीक्ष्णायसतुल्या भवेत् ... तां यथेच्छं वर्तयति, आकुञ्चयति चेदपि सा पुनरपि स्वरूपं प्राप्नोति ... एकेन आघातेन तीक्ष्णायसं पाषाणं खण्डयति, किन्तु तस्य धारा नष्टा न भवति ... अपि च कस्यापि देशस्य प्रगतेः मुख्यसाधनं ज्ञापकं च तस्य भाषा एव भवति।'

भाषा सदैव विकसन्ती स्यात् तथा च यस्य शक्तिवर्धनं जायमानम् अस्ति तस्य स्वीकारेण, प्रकृतिनियमानुसारं प्रसरणेन च सा समृद्धा भवेत् इति विवेकानन्दस्य दृढविश्वासः आसीत्। सः द्रष्टुं शक्नोति स्म यत् कोलकातामहानगरस्य भाषा या बङ्गप्रदेशस्य सर्वविभागानां भाषाम्, प्रयुज्यमानान् शब्दान् च निपिबन्ती आसीत् सा अचिरादेव समग्रबङ्गालस्य भाषा भविष्यति इति। सः साग्रहं वदति स्म - भाषा कल्पनानां साधनम् अस्ति। कल्पनाः प्रधानतमाः भवन्ति, भाषा तु अनन्तरम् आगच्छति।' भारतीयसाहित्यस्य भाषाणां दिशाविषये विवेकानन्दस्य चिन्तनं कियत् योग्यं भविष्यकथनम् इव आसीत् इति आधुनिकबङ्गसाहित्यस्य अथवा भारतीयसाहित्यस्य दर्शनेन स्पष्टं भवति। जागतिकसाहित्ये अपि विकासस्य एषः एव क्रमः दृष्टिगोचरः भवति। अत्यन्ताशया समाधानेन च स्वामी अपश्यत् यत् या भाषा, या कला, यत् संङ्गीतं वा



कमपि अर्थं न अभिव्यनक्ति, तद् प्राणहीनं, प्रयोजनहीनं च भवति इत्यंशं जनाः अवगन्तुं शक्नुवन्तः सन्ति इति स्पष्टचिह्नानि दृश्यन्ते। इदानीं ते अवगच्छेयुः यत् राष्ट्रजीवने यावती शक्तिः प्रपूर्यते, तावदधिकं भाषाकलासङ्गीतादिषु कल्पनाजीवनयोः विषये प्रत्युत्पन्नता प्रकटीभवति इति।'

यथा जीवनस्य अन्यक्षेत्रेषु तथैव अत्रापि विवेकानन्दः सिद्धान्तप्रतिपादकः केवलः नासीत्। सः स्वस्य लेखनेषु स्वकल्पनानां प्रयोगम् अकरोत्। तस्य साफल्यं नेत्रदीपकम् आसीत्। रवीन्द्रनाथेन अङ्गीकृतं यत् स्वामिनः विवेकानन्दस्य लेखनैः एव बङ्गसाहित्ये संलापोचितभाषायाः (चलितभाषायाः) प्रयोगस्य प्रसारेण प्रेरणा प्राप्ता। कश्चन स्मरणार्हः प्रसङ्गः अस्ति - प्रसिद्धः बङ्गभाषासाहित्यविद् दिनेशचन्द्रसेनः विवेकानन्दस्य प्राच्य ओ पाश्चात्त्य इति पुस्तकम् आनेतुं स्वस्य कञ्चन सुहृत् असूचयत्। सः तत्पुस्तकं पठितुम् अत्याकुलः आसीत् इति दृष्टवतः तस्य सुहृदः आश्चर्यम् अभवत् यतः ततः पूर्वं तत्पुस्तकं पठितुं दिनेशचन्द्रसेनेन बहुधा अनङ्गीकृतम् आसीत्। किमर्थम् अधुना तत्पुस्तकं पठितुम् आकुलता इति पृष्टः दिनेशचन्द्रः अकथयत् - अहं सद्यः एव रवीन्द्रनाथठाकुरस्य गृहात् आगच्छम्। सः एतत्पुस्तकम् अतीव प्राशंसत्। अहं तन्न पठितवान् इति श्रुत्वा ठाकुरः आश्चर्यचकितः भूत्वा झटिति तत् पठतु इति साग्रहं माम् असूचयत्। विवेकानन्दस्य प्राच्य ओ पाश्चात्त्य इत्यस्य पुस्तकस्य पठनात् परं संलापोचिता भाषा कियती चेष्टामयी भवति इति भवान् अवगच्छेत् इत्यपि ठाकुरः अकथयत्। सः उत्साहेन तस्य पुस्तकस्य भाषा, तस्य सङ्कल्पना, श्रेष्ठा उदारा चिन्तनशैली, पूर्वपश्चिमयोः आदर्शसंयोजनम् इत्यादीन् गुणान् प्राशंसत्।

शास्त्रीयायाः शुद्धबङ्गभाषायाः प्रयोगे अपि स्वामी विवेकानन्दः निपुणः आसीत्। एतस्य उत्तमम् उदाहरणम् अस्ति तस्य बर्तमान भारत इति पुस्तकम्। दीर्घालङ्कारिकसमस्तपदानां वाक्यानां चापि प्रयोगः ऐतिहासिकविकासप्रक्रियायाः विश्लेषणाय, वर्तमानजटिलविषयाणां समस्यानां च विश्लेषणाय च प्रभाविरूपेण कर्तुं शक्यते इति एतेन पुस्तकेन प्रदर्श्यते। बङ्गभाषायाः मुख्यं दौर्बल्यं विवेकानन्दस्य मतानुसारम् एतदासीत् यत् तस्यां क्रियापदानाम् अत्यधिकप्रयोगः भवति। 'यथा वेगवत्या श्वासस्वीकरणपद्धत्या शरीरे तथैव क्रियापदानाम् वेगवत्प्रयोगेण भाषायाम् अधिकं चैतन्यं नास्ति इति ज्ञायते।' विशेषणानां दक्षप्रयोगेण क्रियापदानां संख्या न्यूना कर्तुं शक्या। बर्तमान भारत इति पुस्तकम् अतिरिच्य हिन्दुधर्म ओ रामकृष्ण इत्यादिषु लेखेषु अपि स्वामिनः भाषाप्रयोगाः द्रष्टुं शक्यन्ते। किन्तु एतेषु लेखनेषु अपि संलापोचितभाषाशैली लोकोक्तीनां प्रयोगः च द्रष्टुं शक्यः। 'साहित्य' इति मासिकपत्रिकायाः सम्पादकः बहुमान्यः साहित्यसमीक्षकः सुरेशचन्द्रसमाजपति एतं शुद्धबङ्गभाषाप्रयोगम् अश्लाघत। सः अलिखत् - शक्तिमत्याः पौरुषवत्याः भाषायाः सरला क्रीडामयी नवीना शैली प्रदर्शयति यत् धीशक्तिः सर्वसमावेशिका भवति इति।'

आधुनिकभारतस्य उदयप्रक्रियायै जागरणाय च दिनपत्रिकाणाम् अन्यपत्रिकाणां च महत्त्वपूर्णं प्रदानम् अस्ति। ऐतिहासिकदृष्ट्या तस्य कालस्य मुख्यभूतानां सर्वेषामपि व्यक्तित्वानां स्वीयाः दिनपत्रिकाः पत्रिकाः वा आसन् अथवा समकालीनैः द्वित्रपत्रैः सह तेषां घनिष्ठसम्बन्धः आसीत्। वस्तुतः आधुनिकभारतीयसाहित्यस्य इतिहासे दिनपत्रिकाणाम् अन्यविधपत्रिकाणां च महत्त्वपूर्णं स्थानम् अस्ति। एतस्मिन् क्षेत्रे अपि स्वामिनः विवेकानन्दस्य मुद्रा अङ्किता अस्ति एव। तस्य उपदेशेन उपक्रमेण च श्रेष्ठानां तिसृणां महत्त्वपूर्णानां पत्रिकाणाम् आरम्भः अभवत्। एताः पत्रिकाः आसन् - ब्रह्मवादिन् (1895) प्रबुद्ध भारत (1896) उद्बोधन (1899) इति। ब्रह्मवादिन् इति आङ्ग्लपत्रिका मद्रासे प्रकाश्यते स्म। प्रबुद्ध भारत इत्यपि आङ्ग्लपत्रिका आरम्भे अल्मोरायाम् अनन्तरं च मायावत्यां प्रकाश्यते स्म। बङ्गभाषया उद्बोधन इति मासिकपत्रिका कोलकातायां प्रकाश्यते स्म। एतासां प्रकाशनस्य मुख्योद्देशाः आसन् - श्रीरामकृष्णस्य विचाराणाम् उपदेशानां च विशालप्रमाणेन जनेषु प्रसारः, प्राचीनभारतीयऋषीणां सत्पुरुषाणां च उपदेशानां दर्शनस्य च उचितम् उपस्थापनं, विवरणं च, भारतीयरिक्थस्य परम्पराणां च विषये पाठकानाम् उद्बोधनं रामकृष्णव्यवस्थायाः कार्याणां वृत्तानां प्रकाशनम् इति। स्वामिनः विवेकानन्दस्य नैकानि भाषणानि, तस्य लेखाः च एतासु पत्रिकासु प्रकाशिताः। अनन्तरकाले स्वामिनः गुरुबन्धुभिः शिष्यैः च तथा च अन्यव्युत्पन्नलेखकैः च कृतैः लेखनैः एतासां पत्रिकाणां स्तरवर्धनम् अभवत्। एतासु पत्रिकासु किं प्रकाश्यते इति विषये, उत्पादनस्य स्तररक्षणे, कस्यापि अन्यमतस्य अपमाननं न भवेत् इति श्रीरामकृष्णस्य आज्ञायाः कठोरतया पालनविषये च स्वयं स्वामी विवेकानन्दः अवदधाति स्म। एकदा स्वामिनः केनचित् शिष्येण कृतम् अन्यस्य कस्यचित् मतस्य अतिनिन्दनं ब्रह्मवादिन् इति पत्रिकायां प्रकाशितम्। तस्य पठनेन उद्विग्नः स्वामी अमेरिकातः अलासिंगाय पत्रमाध्यमेन असूचयत् यत् तत्कार्यं ब्रह्मवादिन् इति पत्रिकायाः ध्येयानुसारि स्वभावनुसारि च नासीत् इति। किमपि मतं कियदपि विचित्रम् अपरिष्कृतं च अस्ति चेदपि तस्य आक्रमणं क्रियमाणम् अस्ति चेत् अस्माभिः तस्य तीव्रता न्यूनीकरणीया। कस्यापि मतस्य विषये उत्तमम् अनुत्तमं वा किमपि 'ब्रह्मवादिन्' पत्रिकायां नागच्छेत्। तस्मिन्नेव समये तेन एतदपि स्पष्टीकृतं यत् वञ्चकेषु सक्रियानुकम्पस्य प्रदर्शनम् अपि न करणीयम्। एषा पत्रिका स्वामिना अमेरिकातः एतन्निमित्तमेव प्रेषितेन धनेन 1895 तमे वर्षे सप्टेम्बरमासे आरब्धा आसीत् इत्यंशः अत्र स्मर्तव्यः। 'ब्रह्मवादिन्' इति पत्रिका मूलतया उन्नतस्तरीयाणां छात्राणां पाठकानां च निमित्तम् आसीत्। पाठकानां युवगणस्य निमित्तं प्रबुद्धभारत इति पत्रिकाम् आरब्धुं स्वामी जनान् प्रेरितवान्, निर्दिष्टवान् च। तस्याः पत्रिकायाः तरुणसम्पादकस्य अकाले जातेन खेदपूर्णेन आकस्मिकमृत्युना प्रबुद्धभारतपत्रिकायाः प्रकाशनं स्वल्पकालार्थं स्थगयित्वा तस्याः कार्यालयः अल्मोरां प्रति नीतः। अनन्तरं सेवियरस्य व्यवस्थापने स्वामिनः स्वरूपानन्दस्य सम्पादकत्वे च



तस्याः प्रकाशनं पुनः आरब्धम्। प्रबुद्धभारतपत्रिकायाः आरम्भात् परं तत्सदृश्यः पत्रिकाः अन्यप्रादेशिकभाषासु अपि आरब्धव्या इति विवेकानन्दस्य उत्कटेच्छा आसीत्। 'अस्माभिः सामान्यजनपर्यन्तं गन्तव्यमेव' इति स्वामी अकथयत्। एतद् प्रादेशिकमाध्यमेन एव साधयितुं शक्यते इति सः जानाति स्म। गच्छता कालेन स्वामिनः लक्ष्यपूर्तिः अभवत्। येन स्वामी अधिकतमं सन्तोषं प्राप्नोत् सा घटना आसीत् 1899 तमे वर्षे जनवरीमासे 'उद्बोधन' इति बङ्गपत्रिकायाः आरम्भः इति। तस्याः प्रथमसम्पादकः स्वामिनः गुरुबन्धुः स्वामी त्रिगुणातीतानन्दः आसीत् यः सानन्दं तद् उत्तरदायित्वं स्वीकृत्य तां पत्रिकां प्रादेशिकपत्रिकासु प्रथमस्तरीयां पत्रिकां कर्तुम् अविरतम् अविश्रामं परिश्रमम् अकरोत्। तस्याः आरम्भः पाक्षिकरूपेण अभवत् परन्तु अनन्तरं तया मासिकपत्रिकायाः रूपं प्राप्तम्। अधुना अपि सा पत्रिका प्रचलति अपि च बङ्गभाषायाः श्रेष्ठपत्रिकासु सा अन्यतमा अस्ति। सुश्रीः मॅक्लिओड् यद् धनम् अयच्छत् तद् धनम् एकस्य मुद्रणालयस्य क्रयणाय स्वामी अयच्छत्।

'उद्बोधन' पत्रिकायाः प्रयोजनानि उद्देशाः च विवेकानन्देन सुस्पष्टतया निर्दिष्टाः आसन्। पत्रिकायां मानसिक-अध्यात्मिक-शारीरक-परिष्काराय अपेक्षिताः भावात्मककल्पनाः केवलाः स्थानं प्राप्नुयुः। अन्येषां निन्दनस्य, तेषु तेषां साहित्ये दर्शने, कला इत्यादिषु प्रकटितयोः विचाराकाङ्क्षयोः दोषान्वेषणस्य च अपेक्षया एते एव अंशाः प्रगतिं साधयितुं सहायकाः कथं भवेयुः इत्यस्य उल्लेखः वरः स्यात्। कस्यापि मतस्य आक्रमणं नाशस्य प्रयत्नाः वा न कर्तव्याः। वेदवेदान्तयोः श्रेष्ठतमतत्त्वानि तादृश्या सरलतमपद्धत्या प्रस्तोतव्यानि यया सामान्यजनाः अपि यथार्थसंस्कृतिम् अवगच्छेयुः ज्ञानम् अधिगच्छेयुः च। एतेन सर्वेभ्यः अधस्तनवर्गस्य स्तरम् उन्नततमवर्गं ब्राह्मणवर्गं यावत् नयनस्य प्रक्रियायाः प्रोत्साहनं सौविध्यं च भवेत्। श्रीरामकृष्णस्य विश्वैक्यस्य सन्देशस्य, स्नेहपावित्र्यवैराग्याणां तदीयादर्शानां प्रसारस्य च प्रातिनिध्यं सा पत्रिका कुर्यात्।

विवेकानन्दस्य परिव्राजक, प्राच्य ओ पाश्चात्त्य, भावबर कथा इत्यादीनि लेखनानि उद्बोधनपत्रिकायां मालिकारूपेण क्रमशः प्रकाशितानि। संतापोचितभाषया लेखनस्य तस्य शैल्या महान् क्षोभः उत्पन्नः। केचन तस्याः शैल्याः स्वागतम् अकुर्वन्, किन्तु अन्येषु अनेकेषु ये बहवः प्राचीनपरम्परासु दृढविश्वासवन्तः, स्वामिनः विरोधकाः च आसन् ते तस्मिन् वाचालत्वस्य अभियोगं कुर्वन्तः मर्मभेदि आक्रमणम् अकुर्वन्। उद्बोधन इति नाम्नः उद्बन्धनम् (उद्बन्धनेन मृत्युः) इति उपहाससूचकं नामकरणं ते अकुर्वन्। परं विवेकानन्दः यथा अन्यानि आह्वानानि सम्मुखीकरोति स्म तथैव निर्भयतया अविचलिततया च एतदपि सम्मुख्यकरोत्। तस्य स्वीयान् शब्दान् एव सः प्रमाणीकृतवान् - 'यशसः पूर्वचिह्नम् अस्ति विरोधः। यत्र विरोधः नास्ति तत्र यशः अपि न भवति।

# दृष्टिः लक्ष्यं च

एकदा रवीन्द्रनाथः रोमाँ-रोलाँमहोदयम् अवदत् यत् स्वामिनि विवेकानन्दे सर्वमपि भावात्मकम् आसीत्। तेन यद् उद्घुष्टं तस्मिन् अभावात्मकं किमपि नासीत्। प्रत्येकस्मिन् मनुष्ये ब्रह्मणः शक्तिः अस्ति इति स्वामिनः श्रद्धा तथा च भगवान् दरिद्राणां माध्यमेन अस्मत्तः सेवां काङ्क्षति इति तस्य उपदेशः एव 'वास्तविकः उपदेशः' अस्ति।' ठाकुरः अलिखत् यत् एतेन उपदेशेन मनुष्यस्य स्वपूर्णत्वस्य विषये जागरणम् अङ्कितम्। एतेन एव कारणेन सः भारतस्य युवजनान् विविधकार्याणां द्वारा, त्यागस्य द्वारा च मानवानां समाजस्य च सेवां कर्तुं प्रेरयितुम् अशक्नोत्। स्वामिनः सन्देशेन मानवैः युगपत् सम्मानादराभ्यां सह ऊर्जा शक्तिः चापि प्राप्ता। जवाहरलालनेहरुः अलिखत् – अवसन्नस्य नष्टधैर्यस्य च हिन्दुसमाजस्य कृते विवेकानन्दः शक्तिवर्धकपेयस्य रूपेण आगतः, तस्मै समाजाय आत्मविश्वासः च तेन प्रदत्तः ...।' नेहरुः अवदत् - भारतस्य आधुनिकराष्ट्रियान्दोलनस्य महासंस्थापकेषु अन्यतमः आसीत् सः ...। रामकृष्णः, विवेकानन्दः, महामना गान्धीः इत्येतादृशाः पुरुषाः जगतः ऐक्यसाधनस्य श्रेष्ठशक्तयः आसन्, रचनात्मकबुद्धिमन्तः च आसन्।' नेताजी सुभाषचन्द्रबोसस्य दृष्ट्या - विवेकानन्दः आदर्शपुरुषः, नायकत्वगुणानां, मानवीयतायाः धैर्यस्य, अध्यात्मस्य, विश्वभावस्य, प्रखरदेशप्रेम्णः च आदर्शः आसीत्। स्वामिनः तावान् अधिकः प्रभावः सुभाषचन्द्रे आसीत् तावतीम् अधिकां प्रेरणां सः तस्मात् प्राप्नोत् यत् सः अलिखत् - 'यदि सः अजीविष्यत् तर्हि अहं तस्य चरणतलयोः अभविष्यम्।' अन्ये अपि अनेके भारतीयमहापुरुषाः तथा च जीवनस्य विविधक्षेत्रेषु विद्यमानाः वैदेशिकाः महापुरुषाः च स्वामिनः महिमानं, जगतः कृते विशेषतया भारतस्य कृते च तस्य महान्ति विविधायामवन्ति प्रदानानि च अङ्गीकृतवन्तः।

भारतस्य निमित्तं स्वामिनः विवेकानन्दस्य चिन्तनं किम् आसीत् तथा च बलवतः भारतस्य पुनर्जागरणाय सः यत्कार्यम् आरभ्य उत्तरदानरूपेण तद् अस्मभ्यं दत्त्वा अगच्छत् तस्य कार्यस्य समग्रावगमनम् अपेक्ष्यते। कल्पनानां क्रियाकलापानां च किमपि क्षेत्रं



तथा नास्ति यद् विवेकानन्देन न स्पृष्टम्। सः एकदा कञ्चन शिष्यम् अवदत् - 'यतः त्वं मनुष्यरूपेण जातः असि अतः त्वया मुद्राम् अङ्कयित्वा एव गन्तव्यम्।' स्वस्य कथनम् अनुकुर्वन् सः भारतीयम् इतिहासं मानवसभ्यतां च तादृश्या मुद्रया अङ्कितवान् यस्याः कदापि मृत्युः न भविष्यति। अमेरिकायां तं 'झञ्झावाततुल्यः हिन्दुसंन्यासी' इति निर्दिशन्ति स्म। एतदपि सत्यमेव यतः सः प्रथमं हिन्दुः आसीत् अनन्तरं च संन्यासी अपि च उभयोः अपि विषये तस्य अभिमानः आसीत्। परन्तु समकाले एव सः ततोऽप्यधिकसत्त्ववान् आसीत्। अद्यतने जगति धर्म इति शब्दस्य अर्थकल्पनं बहुधा सदोषं भवति। अधिकांशाः जनाः चिन्तयन्ति यत् एतेन शब्देन इतिहासे महान् संशयः, द्वेषः, हिंसा, रक्तपातः च जनितः अस्ति इति। यत्र विविधमतीयाः जनाः वसन्ति तत्र भारतदेशे तु ऐतिहासिकदृष्ट्या अनेकवंशीयानां समाजस्य पृथिव्याः विविधभागेभ्यः आगतानां जनानां संस्कृतेः च विकासः जातः अस्ति। यद्यपि अधिकसंख्यया जनाः हिन्दवः सन्ति तथापि शासनं मतनिरपेक्षम् अस्ति। मताधारेण, वंशाधारेण, भिन्नदेशाधारेण वा कस्मै अपि विशिष्टाधिकाराः सौविध्यानि वा न दीयन्ते। भारतस्य निमित्तं स्वामिनः विवेकानन्दस्य अपि एतदेव चिन्तनम् आसीत् तथा च तस्य साकारीकरणाय सः आजीवनं प्रायतत। हिन्दुत्वस्य विषये धर्मस्य च विषये स्वामिनः चिन्तनस्य सारः कः अस्ति?

भगवतः ज्ञानं हृदयद्वारा नाम मानवीय - आत्मनः द्वारा एव प्राप्तुं शक्यते इति स्वामिनः विश्वासः आसीत्। आत्मा सर्वेषु जीववत्सु प्राणिषु भवति। सः अवदत् यत् धर्मः भारतस्य राष्ट्रजीवनस्य चैतन्यम् अस्ति। तस्य दृष्ट्या 'धर्मः तद् सूत्रम् अस्ति येन मौक्तिकानि बद्ध्वा स्थापितानि सन्ति।' परन्तु जातिः, विधयः, प्रथाः, अन्यः कश्चन विशिष्टपूजाप्रकारः वा धर्मस्य मूलभूतांशाः न। धर्मस्य मूलभूतांशाः सन्ति - उत्तमत्वस्य शक्तयः, ईर्ष्यायाः संशयस्य च अभावः, ये उत्तमाः भवितुं प्रयतमानाः सन्ति अथवा उत्तमकार्याणि कर्तुं प्रयतमानाः सन्ति तेषां साहाय्यम् इत्येते। धर्मस्य द्वारा मनुष्यस्य हृदयं चिन्तनशैली च उदारा भवेत्। स्वामी लिखति - यथार्थः धर्मः नाम अन्येषां सहायता ... अन्येषां हिंसनं नाम पापम् ... अन्येषु स्नेहनं नाम पुण्यम्, अन्येभ्यः द्विषनं नाम पापम्।' देवे श्रद्धायाः अपेक्षया स्वस्मिन् श्रद्धा अधिकमहत्त्वपूर्णा।' चारित्र्यं युगपत् विशालतमं तीव्रतमं च स्यादिति' मुख्यतमः विषयः। कस्यचित् धार्मिकमनुष्यस्य प्रमुखलक्षणे स्तः तस्य त्यागभावः, निःस्वार्थसेवाभावः च। कार्याय निःस्वार्थम् आसक्तिहीनं समर्पणम् इति हिन्दुत्वस्य प्रधानतत्त्वम्। मनुष्येण स्वस्य श्रद्धायाः सीमातः अधिकं विकसितुं प्रसरितुं च प्रयतनीयम्। निखिलमपि प्राणिमात्रं भगवतः मन्दिरं मत्वा प्रीणातु। वैश्विकजीवनस्य भ्रातृत्वभावे सर्वस्यापि दृढविश्वासः स्यात्। मतान्धता, पूर्वाग्रहदूषितता, अन्यमतस्य विश्वासस्य च विषये असहना इत्यादिभ्यः जीवने स्थानं न भवेदेव। जीवनस्य सर्वेषु क्षेत्रेषु विविधतायाम् ऐक्यभावस्य अनुभवः

# दृष्टिः लक्ष्यं च

एकदा रवीन्द्रनाथः रोमाँ-रोलाँमहोदयम् अवदत् यत् स्वामिनि विवेकानन्दे सर्वमपि भावात्मकम् आसीत्। तेन यद् उद्घुष्टं तस्मिन् अभावात्मकं किमपि नासीत्। प्रत्येकस्मिन् मनुष्ये ब्रह्मणः शक्तिः अस्ति इति स्वामिनः श्रद्धा तथा च भगवान् दरिद्राणां माध्यमेन अस्मत्तः सेवां काङ्क्षति इति तस्य उपदेशः एव 'वास्तविकः उपदेशः' अस्ति।' ठाकुरः अलिखत् यत् एतेन उपदेशेन मनुष्यस्य स्वपूर्णत्वस्य विषये जागरणम् अङ्कितम्। एतेन एव कारणेन सः भारतस्य युवजनान् विविधकार्याणां द्वारा, त्यागस्य द्वारा च मानवानां समाजस्य च सेवां कर्तुं प्रेरयितुम् अशक्नोत्। स्वामिनः सन्देशेन मानवैः युगपत् सम्मानादराभ्यां सह ऊर्जा शक्तिः चापि प्राप्ता। जवाहरलालनेहरुः अलिखत् -- अवसन्नस्य नष्टधैर्यस्य च हिन्दुसमाजस्य कृते विवेकानन्दः शक्तिवर्धकपेयस्य रूपेण आगतः, तस्मै समाजाय आत्मविश्वासः च तेन प्रदत्तः ...।' नेहरुः अवदत् - भारतस्य आधुनिकराष्ट्रियान्दोलनस्य महासंस्थापकेषु अन्यतमः आसीत् सः ...। रामकृष्णः, विवेकानन्दः, महामना गान्धीः इत्येतादृशाः पुरुषाः जगतः ऐक्यसाधनस्य श्रेष्ठशक्तयः आसन्, रचनात्मकबुद्धिमन्तः च आसन्।' नेताजी सुभाषचन्द्रबोसस्य दृष्ट्या - विवेकानन्दः आदर्शपुरुषः, नायकत्वगुणानां, मानवीयतायाः धैर्यस्य, अध्यात्मस्य, विश्वभावस्य, प्रखरदेशप्रेम्णः च आदर्शः आसीत्। स्वामिनः तावान् अधिकः प्रभावः सुभाषचन्द्रे आसीत् तावतीम् अधिकां प्रेरणां सः तस्मात् प्राप्नोत् यत् सः अलिखत् - 'यदि सः अजीविष्यत् तर्हि अहं तस्य चरणतलयोः अभविष्यम्।' अन्ये अपि अनेके भारतीयमहापुरुषाः तथा च जीवनस्य विविधक्षेत्रेषु विद्यमानाः वैदेशिकाः महापुरुषाः च स्वामिनः महिमानं, जगतः कृते विशेषतया भारतस्य कृते च तस्य महान्ति विविधायामवन्ति प्रदानानि च अङ्गीकृतवन्तः।

भारतस्य निमित्तं स्वामिनः विवेकानन्दस्य चिन्तनं किम् आसीत् तथा च बलवतः भारतस्य पुनर्जागरणाय सः यत्कार्यम् आरभ्य उत्तरदानरूपेण तद् अस्मभ्यं दत्त्वा अगच्छत् तस्य कार्यस्य समग्रावगमनम् अपेक्ष्यते। कल्पनानां क्रियाकलापानां च किमपि क्षेत्रं



तथा नास्ति यद् विवेकानन्देन न स्पृष्टम्। सः एकदा कञ्चन शिष्यम् अवदत् - 'यतः त्वं मनुष्यरूपेण जातः असि अतः त्वया मुद्राम् अङ्कयित्वा एव गन्तव्यम्।' स्वस्य कथनम् अनुकुर्वन् सः भारतीयम् इतिहासं मानवसभ्यतां च तादृश्या मुद्रया अङ्कितवान् यस्याः कदापि मृत्यु न भविष्यति। अमेरिकायां तं 'झञ्झावाततुल्यः हिन्दुसंन्यासी' इति निर्दिशन्ति स्म। एतदपि सत्यमेव यतः सः प्रथमं हिन्दुः आसीत् अनन्तरं च संन्यासी अपि च उभयोः अपि विषये तस्य अभिमानः आसीत्। परन्तु समकाले एव सः ततोऽप्यधिकसत्त्ववान् आसीत्। अद्यतने जगति धर्म इति शब्दस्य अर्थकल्पनं बहुधा सदोषं भवति। अधिकांशाः जनाः चिन्तयन्ति यत् एतेन शब्देन इतिहासे महान् संशयः, द्वेषः, हिंसा, रक्तपातः च जनितः अस्ति इति। यत्र विविधमतीयाः जनाः वसन्ति तत्र भारतदेशे तु ऐतिहासिकदृष्ट्या अनेकवंशीयानां समाजस्य पृथिव्याः विविधभागेभ्यः आगतानां जनानां संस्कृतेः च विकासः जातः अस्ति। यद्यपि अधिकसंख्यया जनाः हिन्दवः सन्ति तथापि शासनं मतनिरपेक्षम् अस्ति। मताधारेण, वंशाधारेण, भिन्नदेशाधारेण वा कस्मै अपि विशिष्टाधिकाराः सौविध्यानि वा न दीयन्ते। भारतस्य निमित्तं स्वामिनः विवेकानन्दस्य अपि एतदेव चिन्तनम् आसीत् तथा च तस्य साकारीकरणाय सः आजीवनं प्रायतत। हिन्दुत्वस्य विषये धर्मस्य च विषये स्वामिनः चिन्तनस्य सारः कः अस्ति?

भगवतः ज्ञानं हृदयद्वारा नाम मानवीय - आत्मनः द्वारा एव प्राप्तुं शक्यते इति स्वामिनः विश्वासः आसीत्। आत्मा सर्वेषु जीववत्सु प्राणिषु भवति। सः अवदत् यत् धर्मः भारतस्य राष्ट्रजीवनस्य चैतन्यम् अस्ति। तस्य दृष्ट्या 'धर्मः तद् सूत्रम् अस्ति येन मौक्तिकानि बद्ध्वा स्थापितानि सन्ति।' परन्तु जातिः, विधयः, प्रथाः, अन्यः कश्चन विशिष्टपूजाप्रकारः वा धर्मस्य मूलभूतांशाः न। धर्मस्य मूलभूतांशाः सन्ति - उत्तमत्वस्य शक्तयः, ईर्ष्यायाः संशयस्य च अभावः, ये उत्तमाः भवितुं प्रयतमानाः सन्ति अथवा उत्तमकार्याणि कर्तुं प्रयतमानाः सन्ति तेषां साहाय्यम् इत्येते। धर्मस्य द्वारा मनुष्यस्य हृदयं चिन्तनशैली च उदारा भवेत्। स्वामी लिखति - यथार्थः धर्मः नाम अन्येषां सहायता ... अन्येषां हिंसनं नाम पापम् ... अन्येषु स्नेहनं नाम पुण्यम्, अन्येभ्यः द्विषनं नाम पापम्।' देवे श्रद्धायाः अपेक्षया स्वस्मिन् श्रद्धा अधिकमहत्त्वपूर्णा।' चारित्र्यं युगपत् विशालतमं तीव्रतमं च स्यादिति' मुख्यतमः विषयः। कस्यचित् धार्मिकमनुष्यस्य प्रमुखलक्षणे स्तः तस्य त्यागभावः, निःस्वार्थसेवाभावः च। कार्याय निःस्वार्थम् आसक्तिहीनं समर्पणम् इति हिन्दुत्वस्य प्रधानतत्त्वम्। मनुष्येण स्वस्य श्रद्धायाः सीमातः अधिकं विकसितुं प्रसरितुं च प्रयतनीयम्। निखिलमपि प्राणिमात्रं भगवतः मन्दिरं मत्वा प्रीणातु। वैश्विकजीवनस्य भ्रातृत्वभावे सर्वस्यपि दृढविश्वासः स्यात्। मतान्धता, पूर्वाग्रहदूषितता, अन्यमतस्य विश्वासस्य च विषये असहना इत्यादिभ्यः जीवने स्थानं न भवेदेव। जीवनस्य सर्वेषु क्षेत्रेषु विविधतायाम् ऐक्यभावस्य अनुभवः

अङ्गीकारः च स्यात्। अन्तिमविश्लेषणम् अनु स्नेहस्य एव प्रतिस्पन्दः प्राप्यते तथा च कतिपयगुणिताधिकः लाभः च प्राप्यते। वयं सर्वे जगतः ऋणिनः स्मः इति मनसा स्मरन्तु इति स्वामी जनान् शक्त्या आग्रहेण च कथयति स्म। कस्मिन् अपि विषये जगत् अस्माकम् अधमर्णं नास्ति। ऋणनिर्यातनं करणीयमेव। 'जगत् इत्येषा नैतिकव्यायामशाला अस्ति। नीतिसम्बद्धः व्यायामः प्रत्येकेन अविरतं करणीयः। सत्यधर्मे श्रद्धया मनुष्यः निर्भयः भवति। शक्तिः एव जीवनम् अस्ति, दुर्बलता च मृत्युः।' सः अस्मारयत् 'भयं नाम मृत्युः, भयं नाम पापं, भयं नाम नरकः, भयं नाम अधर्मः भयं नाम सदोषं जीवनम्।' धर्मः प्रत्येकम् एकैकस्य अपि मानाभिज्ञानम् आदिशति। स्वामी वदति स्म यत् वेदान्तस्य उपदेशानुसारं भगवतः प्राप्तेः तस्य सेवायाः च सर्वोत्तमः मार्गः अस्ति दरिद्राणां सेवनम्, क्षुधार्तेभ्यः भोजनदानं, कष्टे विद्यमानानां सान्त्वनम्, अधः पतितानां मित्रहीनानां साहाय्यकरणं, रुग्णानां शुश्रूषनम् च इति।'

भगिनी निवेदिता अलिखत् यत् विवेकानन्दस्य ध्येयकार्यस्य द्विविधं प्रयोजनम् आसीत् - एकं जगतः प्रेरणम् अपरं च राष्ट्रनिर्माणम् इति। ध्येयकार्यस्य क्रियान्वयने धर्मस्य पात्रम् अतिमुख्यभूतम् आसीत्। हिन्दुत्वस्य महिम्नः विषये, समृद्धपरम्पराणां विषये सांस्कृतिकरिक्थस्य विषये च स्वामिनः अभिमानः आसीत्। चिन्तनशैलीदृष्ट्या ऐतिहासिकदृष्ट्या च तस्य महिमावतः उत्तरदानस्य महत्त्वपूर्णतमः बिन्दुः आसीत् - विचारविश्वासयोः विषये व्यक्तेः पूर्णस्वातन्त्र्यस्य अधिकारस्य अङ्गीकारः इति। स्वेच्छया स्वस्य आदर्शचयनाय दत्तः आदरः इत्येतद् हिन्दुत्वस्य महत्तमं वैशिष्ट्यम् अस्ति। तेन हिन्दुत्वं न केवलं सहनशीलं जातम् अपि तु सर्वस्य अपि श्रद्धायाः संस्कृतेः च निपानं कर्तुं क्षमं जातम् इति विवेकानन्दः साग्रहं प्रत्यपादयत्। उपनिषत्सु गीतायां च उदात्ततमम् उन्नततमं च दर्शनशास्त्रं विद्यते इति तस्य अभिप्रायः आसीत्। तस्य दृष्ट्या वेदान्तः सर्वमतानां मातृस्थाने आसीत्। परन्तु एतद् वेदान्तशास्त्रं हिन्दूनाम् अनन्यसाधारणी सम्पत्तिः नास्ति इति सः निर्दिष्टवान्। परमात्मना सह मनुष्यस्य ऐक्यस्य प्रतिपादनेन मनुष्येषु विभागकल्पनायाः असमानतायाः च सम्पूर्णनिषेधः येन वेदान्तेन प्रतिपाद्यते सः यद्यपि सम्पूर्णमानवजातेः निधिः अस्ति तथापि सः जागरूकतायाः सूचनाम् अकरोत् यत् मम मतं, मम ग्रन्थः, मम शास्त्रं च सर्वश्रेष्ठम् अस्ति इति न कोऽपि चिन्तयेत् अथवा वदेत्। सत्ये कस्यापि एकाधिकारः नास्ति। स्वस्य गुरोः रामकृष्णस्य उपदेशैः गभीरप्रभावितः विवेकानन्दः उपादिशत् यत् एकं मतम् अन्यस्य अपेक्षया श्रेष्ठम् इति प्रतिपादनं नैव करणीयम्। सः अकथयत् यत् 'तथाकथिता सहनशीलता नाम बहुधा भगवतः अवमाननम्' इति। प्रत्येकमपि मनुष्यः अन्येषां मतानि अङ्गीकृत्य तेषां सत्यस्य आत्मसात्करणाय प्रयतेत। राष्ट्रनिर्माणाय राष्ट्रैक्याय समरसतया कार्याय च एषः एव आसीत् तस्य चिन्तनक्रमः। अतीव ऋजुभावनया विश्वासेन च विवेकानन्दः एकः एव वक्तुं समर्थः यत् - अहं मुसलमानस्य मस्जिदं गमिष्यामि। क्रैस्तवस्य चर्च् भवनं



प्रविश्य क्रूसिफिक्स् इत्यस्य पुरतः नमनं करोमि। बौद्धमन्दिरं प्रविश्य अहं बुद्धस्य, तस्य नियमानां च शरणं गमिष्यामि। अहं वनं गत्वा तेन हिन्दुना सह ध्यानाय उपवेक्ष्यामि यः प्रतिजनहृदयं येन प्रकाशते तं प्रकाशं द्रष्टुं प्रयतमानः अस्ति।'

विवेकानन्दस्य मनसि तादृशस्य एकस्य विश्वधर्मस्य कल्पना आसीत् यस्य किमपि नाम न भवेत् यस्मिन् केऽपि स्तराः न भवेयुः, परन्तु यस्मिन् सर्वधर्माणां सारः स्यात् अपि च विकासाय विशालावसरः स्यात् इति। सः अकथयत् - तस्य धर्मस्य शासनव्यवस्थायां हिंसायै असहनायै च स्वल्पोऽपि अवकाशः न स्यात्, प्रत्येकस्मिन् पुरुषे प्रत्येकस्यां महिलायां च दिव्यता अस्ति इति सः अभिजानीयात्, यस्य समग्रा शक्तिः अवसरः च मानववंशः स्वस्य यथार्थं दिव्यं स्वभावं साक्षात्करोतु इत्येतदर्थं तस्य साहाय्यकार्ये केन्द्रीभूतः स्यात् इति। यद्यपि विश्वधर्मस्य सङ्कल्पना कश्चन स्वप्नः इव काल्पनिकः परिपूर्णसुखमयलोकः इव भासते तथापि मानवेतिहासे जाताः सर्वेऽपि महान्तः शिक्षकाः सत्पुरुषाः च एतादृक्कल्पनावन्तः आसन्। ते जनान् शान्तेः, सद्भावस्य, यथार्थानन्दस्य च मार्गं प्रदर्शितवन्तः। धर्मस्य एतादृशस्य निरूपणस्य प्रसारस्य कारणेन एव हार्वर्डविश्वविद्यालयस्य दर्शनशास्त्रविद् विलियम् जेम्सः अचिन्तयत् यत् विवेकानन्दस्य धर्मस्य 'उच्चप्रायोगिकमूल्यम्' अस्ति तथा च सः परिपूर्णां प्रभावपूर्णां महार्हां सुरक्षाम् अपि ददाति।' सः अकथयत् - मानवीयतायाः प्रतिष्ठाभूतः अस्ति स्वामी। रवीन्द्रनाथस्य दृष्ट्या मनुष्ये श्रद्धानिधानस्य नाशः नाम केनचित् आचरितुं शक्यं महत्तमपापम्। तस्य क्रायसिस् ऑफ सिव्हिलायझेशन्' इति स्मरणार्हे महत्त्वपूर्णे भाषणे सः मानवाः तद् न कुर्युः इति अपायसूचनाम् अपि अयच्छत्। सर्वपल्लीराधाकृष्णः अकथयत् यत् श्रद्धाहीनता नाम मानवस्य महिम्नः द्रोहः ... मनुष्यस्य स्वभावस्य अवमाननम् इति। भारतस्य दार्शनिकः भूतपूर्वराष्ट्रपतिः सः अलिखत् यत् विवेकानन्दः भारतीयान् आशां धैर्यं च मा त्यजत इति अकथयत्। स्वामी 'अस्मभ्यं कष्टेषु धैर्यम् अयच्छत्।'

शक्तिमतः, ऐक्यवतः, प्रभाविरूपेण कार्यसमर्थस्य च भारतस्य स्वामिनः विवेकानन्दस्य चिन्तनं कस्यचित् तथ्यहीनस्वप्नस्य परिणामः अथवा मृगमरीचिका नासीत्। स्वामिनः स्वानुभवानाम् अवगमनस्य च फलम् आसीत् तद्। तस्य उदारं गृहवातावरणं, पाश्चात्त्यशिक्षणं, प्रगतिशीलेन ब्राह्मसमाजेन सह सम्बन्धः तथा च अन्तिमः परन्तु महत्त्वपूर्णः अंशः नाम दिव्यमानवस्य रामकृष्णस्य ज्ञानदायि उदाहरणम् इत्येतैः अंशैः विवेकानन्दस्य जीवनविषयकचिन्तनसरणिः अन्यमतानां विषये चिन्तनरीतिः च प्रभाविता आसीत्। परिव्राजकसंन्यासिना रूपेण तेन प्राप्तैः अनुभवैः जीवनस्य कटुसत्यानां परिचयः तस्य जातः, सः दृढविश्वासं धैर्यं च प्राप्नोत्। भारतस्य वर्तमानकालः भविष्यत्कालः च तेन दृष्टः। जीवने किं करणीयम् अस्ति इति तेन अवगतं तथा करणीयमिति तेन निर्णीतं च। इस्लाममतस्य तेन कृतेन अध्ययनेन तथा च तस्य वैयक्तिकानुभवेन, मुस्लिमैः सह सम्पर्केण च तस्य स्पष्टम् अभवत् यत् भारतस्य पुनर्जागरणाय प्रगत्यर्थं

च मुख्यसमुदायद्वयस्य हिन्दूनां मुस्लिमानां च परस्परसाहाय्यम् आवश्यकम्। बहवः मुस्लिमाः तस्य सुहृदः, हितचिन्तकाः, प्रशंसकाः च आसन्। प्राचीनपरम्परावादिभिः कृतं निन्दनम् उपेक्ष्य अपि सः मुस्लिमगृहेषु अवसत्। गङ्गानद्याः तटे विद्यमानस्य हिन्दोः तथा च निश्चितसमये प्रार्थनार्थम् उपविशतः मुसलमानस्य धार्मिकता समानप्रमाणेन भारतीया समतुल्या चासीत् विवेकानन्दस्य दृष्ट्या। काश्मीरे तस्य संन्यासी गुरुबन्धुः यदा एकं मुस्लिमबालं स्वेन सञ्चालिते अनाथालये स्व्यकरोत् तदा तस्य संवर्धनं करणीयं तथा च तस्य धर्मविश्वासे कोऽपि निर्बन्धः न करणीयः इति स्वामी गुरुबन्धुम् आदिशत्। हिन्दुमुस्लिमजगतोः ये भेदाः आसन् ते भासमानाः भेदाः सन्ति न तु यथार्थाः इति तस्य अभिप्रायः आसीत्। सूफीमते अद्वैतवेदान्ते च साम्यम् आसीत्। तस्य दृष्ट्या हिन्दवः मुस्लिमाः च प्रथमतया भारतीयाः आसन्। तयोर्मध्ये विश्वासपार्थक्यस्य कारणेन ये भेदाः आसन् ते देशबन्धुत्वापेक्षया न्यूनमहत्त्वपूर्णाः आसन्। एकस्मिन् पत्रे सः अलिखत् - वेदान्तस्य सिद्धान्ताः कियदपि श्रेष्ठाः अद्भुताः च सन्ति चेदपि व्यावहारिक-इस्लामस्य साहाय्येन विना महत्याः मानवजातेः कृते ते साकल्येन मूल्यहीनाः सन्ति। अस्माकं मातृभूमेः कृते द्वयोः हिन्दुत्वम् इस्लाममतम् इति उभयोः महाव्यवस्थयोः सम्मेलनं नाम वेदान्तस्य मस्तिष्कम् इस्लाममतस्य शरीरं च इत्येषा एव आशा अस्ति।' सः तादृशं जगत् द्रष्टुम् इच्छति स्म यस्मिन् न वेदाः, न बायबल्, न कोरान् वा भवेत् अपि च एतत्सर्वमपि पूर्वोल्लिखितानां त्रयाणाम् उचितकार्यकरणेन भवेत्। स्वामी जगत् अकथयत् - एतानि अन्यानि च सर्वाणि पवित्रपुस्तकानि नाम 'भगवतः अध्यात्मिकाविष्काराणाम् अद्भुतपुस्तकस्य बहूनि पृष्ठानि केवलानि सन्ति'। अनेकेषां पृष्ठानाम् उद्घाटनम् इतोऽपि न जातम् अस्ति।

विवेकानन्दस्य मनसि बुद्धस्य विषये महान् आदरः आसीत्। निवेदिता अलिखत् यत् स्वामिनः 'प्रमुखबौद्धिकरुचिविषयः' बुद्धः आसीत्। बुद्धस्य परिपूर्णतर्कसङ्गतेः विषये विवेकानन्दः वदति स्म। बुद्धस्य स्वातन्त्र्येण नम्रतया, अद्भुतकरुणया, महता व्यक्तित्वेन च विवेकानन्दे प्रगाढपरिणामः जनितः। महापुरुषाः नाम मृदुहृदयवन्तः नायकाः आसन् तथा च बुद्धस्य हृदयं तु नवनीततुल्यं मृदु आसीत्। प्राणिनां बलिदानं स्थगयितुं सः स्वप्राणानां त्यागाय सदैव सज्जः आसीत्। मानवानां समानतां सः अपाठयत्। स्वामी बुद्धस्य विषये सदैव आदरेण महता प्रशंसाभावेन च वदति स्म। सः अवदत् - 'बुद्धः काचित् व्यक्तिः न सः तु साक्षात्कारः कश्चन अस्ति ... मृत्युसमये अपि सः स्वनिमित्तं वैशिष्ट्यं किमपि न ऐच्छत्। तदर्थम् अहं तम् आराधयामि।' बुद्धरामकृष्णौ विवेकानन्दस्य प्रियौ अध्यात्मिकनायकौ आस्ताम्। सः अवदत् - अहं बुद्धस्य सेवकानाम् अपि सेवकः अस्मि।'

स्वामिना जैनानां पवित्रपुस्तकानि अपि साद्यन्तं पठितानि। तेषां सिद्धान्तानां परम्पराणां च सत्यनिष्ठतया तथा च हिन्दुधर्मस्य विकासप्रक्रियायै तेषाम् ऐतिहासिकप्रदानैः



स्वामी सुप्रभावितः। जैनदर्शनस्य संस्थापकानां बौद्धिकाध्यात्मिकोच्चस्तरं सः सहजतया अङ्गीकरोति स्म। झोरोस्ट्रियनमतस्य कृते तस्य मनसि विद्यमानः आदरः तदा प्रमाणीकृतः अभवत् यदा धर्मसंसदि तस्य प्रथमभाषणे सः अकथयत् - अहम् अभिमानम् अनुभवामि यत् अहं तन्मतीयः अस्मि येन मतेन झोरोस्ट्रियनेभ्यः आश्रयः दत्तः तथा च अधुना अपि यत् तस्य महतः झोरोस्ट्रियनराष्ट्रस्य अवशेषान् पालयति।' क्रैस्तमतम् अन्येभ्यः सर्वेभ्यः अक्रैस्तमतेभ्यः श्रेष्ठम् अस्ति इत्यस्य क्रैस्तमतप्रचारकाणां प्रतिपादनस्य विवेकानन्दः स्पर्धाह्वानम् अकरोत्। सः क्रैस्तमतप्रचारकैः भारते हिन्दुधर्मस्य क्रियमाणानाम् आक्रमणानां हिन्दूनां मतपरिवर्तनाय क्रियमाणानां प्रयत्नानां च निन्दां सशक्तविरोधं च अकरोत्। किन्तु तस्य मनसि जीझसस्य कृते तस्य उपदेशानां कृते च महान् आदरः आसीत्। सः 'इमिटेशन ऑफ ख्राइस्ट' इत्यस्य एकस्य भागस्य अनुवादम् अकरोत्। एकदा एकस्य प्रश्नस्य उत्तरं सः एवम् अकथयत् - यदि अहं नाझरेथस्य जीझसस्य काले पॅलेस्टाइन्मध्ये अभविष्यं तर्हि अहं तस्य पादौ मम अश्रुभिः न मम हृदयस्य रक्तेन अक्षालयिष्यम्।' क्रैस्तमतप्रचारकाः पश्चिमस्य जनाः च ये भौतिकसमृद्ध्या मत्ताः जाताः आसन् तान् सः अकथयत् - 'ख्रिस्तं प्रति पुनः गच्छत। एतान् व्यर्थप्रयत्नान् त्यजत। ख्रिस्तेन विना राजभवनेषु वासस्य अपेक्षया जीर्णवस्त्रैः ख्रिस्तेन सह वासः वरतरः स्यात् इत्येतदर्थं सज्जाः भवत। विवेकानन्दस्य महाविद्यालयीयजीवनादारभ्य सः ख्रिस्तस्य सन्देशैः गभीरतया प्रभावितः आसीत्। सः बहुधा जीझसस्य विषये वदति स्म तथा च जीझसः पाश्चात्त्यजगति नीतिशास्त्रस्य नैतिकतायाः च पुनरुज्जीवनं प्रेरितवान् इति वर्णयति स्म। युरोपस्य मध्यकालीनमहत्ता - अर्थात् युरोपखण्डस्य चित्राणि, शिल्पानि, वास्तुशास्त्रं, साहित्यं, राजकीयव्यवस्था, धार्मिकजीवनम् इत्येतत्सर्वं येन केनापि प्रकारेण संन्यासिनः ख्रिस्तस्य उपदेशैः सह उतम् अस्ति। एकदा स्विझर्लंडमध्ये आल्प्सपर्वततः अवतरणसमये लघुप्रार्थनमन्दिरमेकं दृष्ट्वा तेन सह ये आसन् तान् सः अवदत् - कुमारीदेव्याः चरणयोः कतिपयपुष्पाणि समर्पयामः यतः सा अपि तु माता अस्ति।' अतीव कोमलतया कतिपयानि आल्प्सपुष्पाणि सङ्गृह्य सः तस्यै समार्पयत्।

पञ्जाबप्रदेशीयानां निमित्तं विवेकानन्दस्य मनसि परमप्रीतिः प्रशंसा च आस्ताम्। धैर्यस्य नायकत्वस्य च तेषां सुदीर्घस्य इतिहासस्य परम्परा तं बहु आकर्षति स्म। गुरोः नानकस्य उपदेशाः, जगतः निमित्तं तस्य अद्भुतस्नेहः, तस्य हृदयस्य वैशाल्यं च स्वामिनः हृदयं गभीरतया अस्पृशत्। हिन्दूनां मुस्लिमानां च द्वयोः अपि परिष्वञ्जनस्य तस्य प्रयत्नान् स्वामी प्राशंसत्। गुरोः गोविन्दसिंहस्य गौरवपूर्णेन नायकत्वेन सः प्रभावितः। पञ्चनदीनां प्रदेशं गतवान् विवेकानन्दः तत्रत्यान् जनान् सानुरागं सम्बोधितवान् - 'अद्य अहं भवतां पुरतः यत् स्थितवान् अस्मि तद् अस्मासु ये भेदाः सन्ति तान् अन्वेष्टुं न, अपि तु अस्माकं परस्परसम्मतिः केषु विषयेषु अस्ति तद् अन्वेष्टुम्। केन आधारेण

अस्मासु सदैव भ्रातृभावस्य रक्षणं भवेत्, कस्य मूलाधारस्य साहाय्येन शाश्वततः आगतः ध्वनिः विकसन् शक्तिमत्तरः भवेत् इति अहम् अत्र अवगन्तुं प्रयतमानः अस्मि। किञ्चन रचनात्मकं कार्यं प्रस्तोतुम् अहं प्रयते न तु विनाशात्मकम्। निन्दनस्य दिनानि अतीतानि। वयं रचनात्मककार्यं प्रतीक्षामहे ...' एते राष्ट्रनिर्मातुः सत्पुरुषस्य भविष्यत्कथनस्य, चिन्तनस्य च शब्दाः आसन्। यं स्वप्नं यथार्थे परिवर्तितं द्रष्टुं सः काङ्क्षति स्म सः स्वप्नः आसीत् ऐक्यवतः सम्मिल्य कार्यं कुर्वतः च भारतस्य यस्मिन् समकाले एव धर्मसंस्कृत्योः वैविध्यं, स्वाभाविकवैशिष्ट्यानि चापि रक्षितानि स्युः। तस्य उत्कटविश्वासः आसीत् यत् यः धर्मः हृदयं विशालीकरोति, जनान् अन्यान् स्नेहितुं प्रेरयति च सः व्रजलेपः इव एव भवेत् न तु विश्लेषकारकः इति। सः असूचयत् - ये धर्मं वाणिज्यम् इति चिन्तयन्ति ते धर्मे स्पर्धात्मककलहस्य, स्वार्थप्रधानपद्धतीनाम् आनयनस्य च कारणेन सङ्कुचिताः दुराचरणशीलाः च भवितुं विवशाः भवन्ति।' नवदशतमशतके वर्तमानशतकस्य आद्यार्धे च भारते या राष्ट्रनिर्माणप्रक्रिया प्राचलत् तां केचन पाश्चात्त्याः भारतीयाः च विद्वांसः सा प्रक्रिया असूचितरूपेण 'हिन्दु' आसीत् अन्यमतानां विषये मौनिनी आसीत् इति अनिन्दन्। तेषाम् एतदपि कथनम् आसीत् यत् भारते राष्ट्रियतायाः मूलानि हिन्दुसङ्कल्पनाधारितानि सन्ति, रक्तवंशयोः बन्धनेषु बलं निदधन्ति च तानि इति। एतादृश्या चिन्तनशैल्या पद्धत्या च राष्ट्रस्य ऐक्ये, सम्मिल्य कार्यकरणे च बाधाः उत्पद्यन्ते। एषः विषयः जटिलः, विवादितः च अस्ति। परन्तु तस्य कालस्य ये अधिकांशाः नायकाः आसन् तेषां चिन्तनशैली, अवगमनं च निश्चयेन एतादृशं स्वकेन्द्रितं नासीत्। एतस्य प्रश्नस्य विषये एतस्मिन् सन्दर्भे स्वामिनः विवेकानन्दस्य विचाराः कीदृशाः आसन् इत्यस्य ज्ञानं गुणावगुणविवेचनं च महत्त्वपूर्णम् अस्ति।

भारतस्य वर्णनं स्वामी विवेकानन्दः - 'विभिन्नवंशानां वैज्ञानिकदृष्ट्या तुलनात्मकाध्ययनस्य यथार्थः सङ्ग्रहालयः' इति करोति स्म। यद्यपि स्वस्य हिन्दुत्वं तस्य अभिमानविषयः आसीत् तथापि ततोऽधिकं सः भारतीयः आसीत् यः स्वदेशं स्वदेशवासिनः च तीव्रतया प्रीणाति स्म। सा प्रीतिः सर्वविधसङ्कुचितान् अवरोधान् अतिक्रम्य सर्वान् व्याप्नोति स्म। भारतस्य दीर्घेतिहासस्य मुख्यतरङ्गाणां स्पष्टा कल्पना अवगमनं च तस्य आसीत्। पाश्चात्त्यैः इतिहासलेखकैः भारतस्य इतिहासस्य विकृतीकरणं कृतमस्ति अतः भारतीयैः एव स्वयं स्वस्य इतिहासः लेखनीयः इति तस्य उत्कटेच्छा आसीत्। तस्य अवगमनानुसारं भारतीयसंस्कृत्याः सभ्यतायाः च विकासप्रक्रियायां मतान्तरकलहानां सामाजिकधार्मिकश्रेष्ठतावादाय च स्थानमेव नासीत्। रवीन्द्रनाथः विवेकानन्दः च द्वौ अपि जीवनस्य पृथक् क्षेत्रयोः जनौ आस्ताम्। द्वौ अपि स्वीये क्षेत्रे अचरताम्। ठाकुरः कविः, सर्जनक्षममनस्कः च जनः आसीत् यस्य मुख्यक्षेत्राणि आसन् वाङ्मयं, कला, संस्कृतिः च। परं बहुमुखप्रतिभावान् ठाकुरः जीवनस्य अन्यक्षेत्रेषु अपि



सञ्चारं कृत्वा महत्त्वपूर्णान् परिणामान् अजनयत्। विवेकानन्दः मूलतः धार्मिकमनुष्यः आसीत्, किन्तु तस्य धर्मः पारम्परिकक्षेत्रमात्रे मर्यादितः नासीत्। तस्य धर्मः सर्वसमावेशकः, मनुष्यजीवनस्य सर्वविधक्रियाकलापेषु व्याप्तः च आसीत्। यथा द्वयोः सत्त्ववतोः पुरुषयोः चिन्तनरीतौ कल्पनासु भेदाः आसन् तथैव परमसाम्यानि अपि आसन्। बहुषु विषयेषु तौ समानचिन्तकौ आस्ताम्। एतेषु द्वौ प्रमुखौ विषयौ आस्ताम् - शिक्षणं तथा च विविधकालखण्डेभ्यः जगतः विविधस्थानेभ्यः आगतानां जनानां मेलनस्य पवित्रस्थानम् अस्ति भारतम् इति कल्पना। 'भारततीर्थ' इति तस्य प्रसिद्धगीते कविः भारतदेशं तद् तीर्थक्षेत्रम् इति प्रशंसति यत्र विविधवंशानां, मतानां, संस्कृतीनां च जनाः आगत्य सम्मिलितवन्तः। भारतस्य समग्रे इतिहासे एषः देशः मानववंशस्य मेलनस्थानम् आसीत्। एषः विषयः आश्चर्यकारकः अस्ति यत् ठाकुरः यस्मिन् समये भारततीर्थम् अरचयत् तत्समकाले एव विवेकानन्दः अपि भारतस्य विकासस्य विषये लिखन् आसीत् - 'अस्तु, अत्र सन्ति - पर्शियनाः, ग्रीकाः, युच्छी, हूणाः, चिनाः सिदीयनाः, अन्ये च बहवः, विगलिताः सम्मिश्रिताः - ज्यूजनाः, पार्शीजनाः, अरबाः, मोंगोलाः, जर्मनवनानां स्वामिनः व्हायकिंगाः च ... मानववंशस्य समुद्रः - वंशतरङ्गैः निर्मितः... ये च तरङ्गाः निरन्तरं क्वथन्तः, सङ्घर्षन्तः, सदा रूपं परिवर्तयन्तः दृश्यतलं प्राप्नुवन्ति, प्रसरन्ति, लघुतरङ्गान् निगिरन्ति, पुनः उपशान्ताः भवन्ति - एषः एव अस्ति भारतस्य इतिहासः।'

विवेकानन्दः विशिष्टधिकारवतां वंशानां मिथ्या वंशविज्ञानस्य सबलं विरोधं करोति स्म। सः भगिनीं निवेदिताम् अकथयत् - यदि अहं मम श्वेतकायस्य आर्यपूर्वजस्य कृतज्ञः अस्मि, तर्हि ततोऽधिकं कृतज्ञतरः मम पीतकायस्य मोंगोलपूर्वजस्य अस्मि अपि च ततोऽधिकं कृतज्ञतमः मम कृष्णकायस्य निग्रोपूर्वजस्य अस्मि।'

स्वस्य मुखस्य विषये तस्य अतीवाभिमानः आसीत्, विशेषतया तस्य 'मोगोंलचिबुकस्य' विषये यत् 'प्रयोजनविषये दृढसङ्कल्पवत्तां' सूचयति इति सः मन्यते स्म। प्रत्येकस्मिन् आर्ये विद्यमानम् एतद् वांशिकवैशिष्ट्यं सूचयन् स्वामी अकथयत् - 'किं यूयं न पश्यथ? टार्टारजनाः वंशस्य मद्यायन्ते। ते सर्वरक्तेभ्यः ऊर्जां शक्तिं च यच्छन्ति।'

एकदा स्वामी अकथयत् यत् तस्य लक्ष्यकार्यं राष्ट्रियं केवलं न अपि तु अन्ताराष्ट्रियम् अस्ति। यस्मिन् सामान्यतया युरोपस्य अमेरिकायाः च समावेशः भवति तस्य पाश्चात्त्यजगतः निमित्तं विवेकानन्दः अभूतपूर्वधैर्येण, दृढविश्वासेन, अधिकारेण च भारतस्य इतिहाससंस्कृतिपरम्पराणां यथार्थं चित्रम् उपस्थापितवान् इति विवेकानन्दस्य निःसंशयं लोकप्रियं चित्रं जनमनसि विद्यते। हिन्दुधर्मः इति तस्य दृष्टिकेन्द्रम् आसीत् यतः पाश्चात्त्यजगता आ नैकेभ्यः शतकेभ्यः तस्य विकृतीकरणं, मिथ्या दूषणं च कृतम् आसीत्। परं तस्य प्रस्तुतेः सङ्कल्पनायाः वैशाल्यं कस्यचित् विशिष्टमतस्य

सङ्कुचितमर्यादाभ्यः अथवा भारतस्य भौगोलिकमर्यादाभ्यः अपि महता प्रमाणेन श्रेष्ठतरम् आसीत्। सः बहुधा विराजः ब्रह्माण्डस्य आत्मनः विषये वदति स्म तथा च सर्वोऽपि आत्मनः जगतः च विषये तया दृष्ट्या चिन्तयेत् इति सर्वान् साग्रहं वदति स्म। तस्य मनः कीदृशम् आसीत् तत् कथं कार्यं करोति स्म इति विषये रुचिकरी काचित् कथा अस्ति - अमेरिकायां स्नानसमये स्वामी बहुधा उच्चैः श्लोकान् वदति स्म। कस्मिंश्चित् दिने तस्य आतिथेयी स्वजिज्ञासाम् अवरोद्धुम् अशक्ता तं पृष्टवती एव यत् सः स्नानसमये किं वदति इति। स्वामिना उक्तं यत् सः विराजः तन्नाम विश्ववासिनां शान्त्यर्थं हिताय च प्रार्थनां कुर्वन् आसीत् इति। विवेकानन्दस्य कल्पनानां, लक्ष्यकार्यस्य च एतद् किञ्चन महत्त्वपूर्णं मुखम् आसीत्। पाश्चात्यानां स्वस्य श्रेष्ठतायाः प्रतिपादनस्य तथा च अपाश्चात्यजगतः विषये प्रभुताभावेन आचरणस्य सः स्पर्धाह्वानम् अकरोत्। क्रैस्तमतम् अन्यमतेभ्यः श्रेष्ठतरम् अस्ति इति दोषपूर्णज्ञानवद्भिः क्रैस्तमत - प्रचारकैः प्रसारितस्य प्राचीनपरम्परानुसारिणः क्रैस्तमतस्य अपि ससाफल्यं स्पर्धाह्वानं सः अकरोत्। ब्रिटिशाधिराज्यस्य, अमेरिकायाः युरोपस्य च सम्पदः, भौतिकसमृद्धेः च विषये असभ्यगर्वभावस्य सबलनिन्दकः आसीत् सः। किन्तु समकाले एव विश्वमानवः सः पश्चिमस्य गुणान्, पाश्चात्यैः साधितानि कार्याणि च अवगत्य तानि प्रशंसितुमपि न विस्मरति स्म। तस्य वैश्विकचिन्तनशैली जगतः दर्शनस्य पद्धतिः च आसीत् यस्यां पूर्वपश्चिमयोः समानस्तरे समानसम्मानेन च मेलनं स्यात्। द्वाभ्यामपि परस्पराभ्यां पठनार्हाः अंशाः बहवः आसन्। परस्परविनिमयभावयुक्तः सबन्धः द्वयोः स्यात्। पूर्वदिक् यस्याः बहुधा भारतदेशः इति अर्थः भवति स्म तया सदैव कष्टानि एव सोढव्यानि इति स्थितिः न स्यात्। विवेकानन्दस्य जीवनस्य एतस्मिन् लक्ष्यकार्ये तेन सुमहत् साफल्यं प्राप्तम्।

पूर्वपश्चिमयोः आदर्शसम्बन्धस्य या स्वामिनः कल्पना आसीत् सा तथा च पूर्वपश्चिमयोः जगतोः मध्ये विद्यमानं 'विस्तृतम् अखातकल्पम् अन्तरम्' इत्यनयोः बहुभिः मुखैः समीक्षा अपेक्ष्यते। पाश्चात्येतिहासः, सभ्यता, समाजः, सांस्कृतिकव्यवस्था, मूल्यानि, विकासप्रक्रिया इत्येतेषाम् अंशानां विस्तृतं गभीरं च अध्ययनं विवेकानन्देन कृतम् आसीत्। इतिहासः, भूगोलः, विज्ञानं, तन्त्रज्ञानं, मानववंशशास्त्रं, कला, सङ्गीतम् इत्येतेषाम् अन्येषां च बहूनां विषयाणां विश्वकोषतुल्यं ज्ञानं तस्य आसीत्। सामान्यतया भौतिकजगतः व्यवहाराणां ज्ञानम् अनुभवः च हिन्दुसंन्यासिनः स्यादिति न केनापि अपेक्ष्यते किन्तु एतस्यां पृष्ठभूमौ स्वामिनः विवेकानन्दस्य पाश्चात्यानां वेशभूषायाः, परम्पराणां, भोजनाभ्यासानां, सामाजिकप्रथानां च ज्ञानम् अद्भुतम् आसीत्। तस्य स्वदेशज्ञानमपि व्युत्पत्त्या प्राप्तम् अथवा अन्येभ्यः प्राप्तं नासीत्, अपि तु साक्षात् वैयक्तिकं च आसीत्। अतः सः आत्मविश्वासेन निःसंशयतया च पाश्चात्यजगत् सम्मुखीकर्तुम् अशक्नोत्। तस्य विशालहृदयस्य समग्रोत्कटतया, क्षुरपत्रस्य धारया समं



तीक्ष्णबुद्ध्या च सः स्वमातृभमिम् अप्रीणीत्। समकालीने भारतदेशे, एशियाखण्डस्य अन्यान्यभागेषु च ये उपनिवेशवादविरोधकाः, आधिराज्यविरोधकाः च तरङ्गाः प्रवहन्ति स्म तैः सः सुप्रभावितः आसीत् परं तस्मिन्नेव समये सः भारतस्य सम्मिश्रपरम्परायां वृद्धः रामकृष्णेन पाठितः च आसीत्। वेदान्तस्य एकत्वस्य सङ्कल्पनायाः वैश्विकत्वं, सर्वेषां मानवानां परस्परैक्यं च तस्य कृते दर्शनशास्त्रमात्रम् अथवा उन्नतादर्शः कश्चन नासीत् अपि तु श्रद्धायाः विषयः तस्य जीवनस्य जीवनध्येयस्य च सारः आसीत्। भारतस्य आन्तरिकशक्तौ, भारतस्य अध्यात्मिकपरम्परायाः समृद्धौ च सः दृढविश्वासवान् आसीत्। पाश्चात्त्यसभ्यतायाः भौतिकप्रगतौ शक्तौ चापि तस्य तावान् एव विश्वासः आसीत्। द्वयोः आदर्शमिश्रणं द्रष्टुम् इच्छाति स्म सः। तादृशाः केऽपि गुणाः सन्ति ये केवलस्य एकस्य एव कस्यचित् देशस्य एकाधिकाररूपेण सन्ति इत्यस्मिन् तस्य विश्वासः नासीत्। कस्मिंश्चित् देशे अन्यस्मात् कस्माच्चित् देशात् केषाञ्चन उत्तमगुणानाम् आधिक्यं भवितुम् अर्हति इति एतावदेव स्यात् कदाचित्। अन्येभ्यः देशेभ्यः भारतेन पठनीयाः अंशाः बहवः सन्ति परन्तु तत् पठनं भारतीयपद्धत्या परिवर्त्य 'भारतस्य विशिष्टराष्ट्रियतायाः' रक्षणं यथा स्यात् तथा भवेत्। सर्जनशक्त्या युक्तेन मनसा सम्पन्नः भारतदेशः स्वस्य प्राचीनसंस्कृतेः मूल्यानां च शृङ्खलां रक्षन् बाह्यजगता सह विनिमयात्मकं सम्बन्धं पोषयितुं शक्नुयादिति विवेकानन्दस्य आशा आसीत्।

शिकागो-धर्मसंसदि विवेकानन्देन प्राप्तस्य यशसः स्वरूपं तस्य माहात्म्यं च अद्य शतकात्मके काले अतीते अवगन्तुं कष्टम् अस्ति। पूर्वपश्चिमयोः अन्योन्यस्य विषये ये पूर्वाग्रहयुक्ताः अभिप्रायाः आसन् ये च विवेकानन्दस्य चिन्तनानुसारं 'अन्योन्यस्य विषये अविवेकपूर्णचिन्तनात्, अगभीरज्ञानात्, अज्ञानात् च उत्पन्नाः आसन्' तेषाम् अभिप्रायाणां स्पर्धाह्वानम् अकरोत् सः। द्वयोः जगतोः मूलभूतकल्पनानां यथार्थम् अन्वेषणं कृत्वा एतादृशानां गभीरमूलानां मिथ्या कल्पनानाम् अपसारणाय सः प्रायतत। एतस्मिन् जगति स्वर्गे च सुखस्य अन्वेषणम् इति पश्चिमस्य प्रमुखा कल्पना अस्ति या च कार्याधारिता अस्ति। भारतीयाणां प्रमुखा कल्पना तु अस्ति मुक्तिः इति या च शिक्षयति यत् न केवलम् एतस्मिन् जगति अपि तु परलोके अपि सुखान्वेषणं बन्धनाय एव भवति इति। अतः जीवनस्य अन्तिमलक्ष्यं मोक्षः इत्येव भवेत्। स्वामी सबलं प्रत्यपादयत् यत् उभयमपि अन्योन्यं विना अपूर्णम् अर्थहीनं च अस्ति इति। पश्चिमस्य पौरुषं धैर्यं च यावदावश्यकं तावदेव आवश्यकी अस्ति भारतीयैः ऋषिभिः आदिष्टा आन्तरिकशान्तिः अनासक्तिः च। 1893 तमे वर्षे धर्मसंसदि स्वामिनः ध्येयकार्यस्य आरम्भमात्रं जातम् आसीत्। उपदशवर्षाणाम् अनन्तरं जातेन स्वामिनः मृत्युना अपि तद् न समाप्तम्। तद् अधुना अपि प्रचलति, तस्य वेगः प्रवृद्धः अस्ति च। रामकृष्णमिशनूसंस्थायाः द्वारा तथा च भारतात् बहिः वेदान्तसोसायटीसंस्थायाः द्वारा तद् प्रचलति। एताभ्याम् अन्यगणानां व्यक्तीनां च कृते आदर्शोपस्थापनं कृतम् अस्ति।

पाश्चात्त्याः तेषां दृष्ट्या ऐतिहासिकचिन्तनशैल्या चैव द्रष्टव्याः अवगन्तव्याः च इति विवेकानन्दः साग्रहं प्रतिपादयति स्म। तत्समानतया पौरस्त्याः अपि पौरस्त्यानां चिन्तनशैल्या द्रष्टव्याः तेषां विषये चिन्तनीयं च। तेषां वांशिकीं सांस्कृतिकीं च पृष्ठभूमिं सम्यक् अज्ञात्वा एव तेषां वैविध्यानां निन्दनं न करणीयम्। वस्तुतः वैविध्ये एकतायाः अन्वेषणम् एव यथार्थज्ञानस्य प्रयोजनम् अस्ति। प्रत्येकं देशस्य स्वीयानि वैशिष्ट्यपूर्णानि सदाचरणविषयकाणि नीतिविषयकाणि च मूल्यानि भवन्ति। अन्येषां विषये निर्णयं कर्तुं, तेषां विषये सत्वरं निष्कर्षान् स्वीकर्तुं च न कोऽपि प्रयतेत। द्वयोः जगतोः विषये, तयोः परस्पराभ्यां पृथक् सामाजिकसांस्कृतिकव्यवस्थयोः विषये, जीवनपद्धत्योः विषये च चिन्तनं कर्तुं समर्थः विवेकानन्दः विशिष्टः आसीत्। एतस्मिन् क्षेत्रे प्रथमः पदनिक्षेप्ता वस्तुतः सः एव आसीत्। सुदूरवर्तिषु जनेषु संस्कृतिषु च यदन्तरं वर्तते तस्य न्यूनीकरणाय तेन कृतानां प्रयत्नानां महत्ताम् अङ्गीकृत्य ये तस्मै पत्रं प्रेषितवन्तः तेषां नामानि एवं सन्ति - ब्रुकलिन् एथिकल् असोसिएशन् इत्यस्य एल्.जी.जेन्स्, हार्वर्ड डिव्हिनिटी स्कूल इत्यस्य सी.सी. एव्हरेट्, हार्वर्डविश्वविद्यालयस्य विलियम जेम्स्, जोसेय रॉईस्, क्रेम्ब्रिज कॉन्फरन्सेस् इत्यस्य जॉन पी.फॉक्सः, बोस्टन्नगरीया सारा सी.बुल् तथा च अन्ये प्रमुखजनाः। ते पत्रे अलिखन् 'भवता, भवतः सहश्रमिकेण स्वामिना शारदानन्देन यानि स्पष्टीकरणानि उक्तानि तानि न केवलम् ऊहात्मकरुचिजनकानि, प्रयोगार्हाणि च अपि तु सुदूरवर्तिनां जनानां परस्परं सख्यभ्रातृभावयोः सम्बन्धानां सुदृढकारकाणि सन्ति तथा च जगतः सर्वैः महद्भिः मतैः मानवसम्बन्धानां हितानां च यदैक्यं प्रतिपाद्यते तस्य साक्षात्करणे अस्माकं सहायकानि सन्ति।'

1893 तमे वर्षे यदा विवेकानन्दः अमेरिकार्थं नौकायानेन प्रातिष्ठत तदा भारतीयहिन्दुषु समुद्रक्रमणम् इत्येषः निषिद्धविषयः कश्चन आसीत्। समाजदूषणात् भयं, भोजनादीनाम् अन्येषां च आचरणविषयकाणां नियमानाम् उल्लङ्घनम् इत्यादिभिः अंशैः सामान्यः हिन्दुः बाधितः आसीत्। एतादृशानां नियमोल्लङ्घनानां निमित्तं महद्दण्डनं निश्चितम् आसीत्। समाजे प्राचीनपरम्पराणां दृढग्राहः आसीत्। अमेरिकायां वासकाले तथा च ततः प्रत्यागमनात् परं राष्ट्रनायकरूपेण अपि विवेकानन्देन परम्परानिष्ठेभ्यः महत्कष्टं प्राप्तम् आसीत्। एवं सत्यपि पश्चिमप्रवासेन मनुष्यस्य नेत्रोद्घाटनं भवति इति कथनस्य धैर्यं तस्मिन् आसीत्। सः अवदत् - 'न्यूनातिन्यूनं दशलक्षहिन्दवः जगति सर्वत्र भ्रमणम् अकरिष्यन् इति अहम् इच्छामि।' सः भारतीयान् विशेषतया युवकान् सानुरोधम् अकथयत् - स्वस्य सङ्कुचितबिलेभ्यः बहिरागत्य अन्ये देशाः कथम् अग्रे गच्छन्तः सन्ति इति पश्यत। हे पुत्र! कोऽपि मनुष्यः देशः वा अन्यस्मै द्विषन् जीवितुं न शक्नोति। यस्मिन् दिने 'म्लेच्छ' इति शब्दम् अन्विष्य



भारतेन अन्यैः सह मेलनं स्थगितं तस्मात् दिनादेव भारतस्य नाशः आरब्धः' इति अपायसूचनमपि विवेकानन्दः अकरोत्।

आत्मनः श्रेष्ठत्वं कल्पयतः पाश्चात्त्यान् अपि स्वामी न अत्यजत्। पाश्चात्त्याः वंशवादग्रस्ताः, क्रैस्तमतश्रेष्ठतावादिनः, राजकीयप्रभुतावादिनः, भौतिकसम्पद्वन्तः, सांस्कृतिकश्रेष्ठत्वभावं पालयन्तः च जनाः सन्ति इति अकथयत् सः। सः स्पष्टतया प्रत्यपादयत् यत् पूर्वपश्चिमयोः सख्यभावे, यथार्थे ऐक्ये च प्रभुसेवकसम्बन्धाय स्थानमेव नासीत्। वेदान्तविद् विवेकानन्दः असमसहभागम् अङ्गीकर्तुं न शक्नोति स्म एव। दृश्यमानभेदानां पृष्ठतः अथवा अधः यदैक्यं वर्तते तद् मनुष्येण अन्वेष्टव्यम् इति सः सदैव जनान् बोधयितुं प्रायतत। सः अकथयत् - 'येन सिद्धान्तेन मनुष्यः समत्वं द्रष्टुं शक्नोति सः एव विधिः अस्ति। सः एव प्राकृतिकविधिः इति ज्ञायते जनैः। समग्रविश्वे तन्नाम वृक्षेषु, क्षुपेषु, पशुषु, मनुष्येषु, देवेषु, स्वयम् ईश्वरे च ऐक्यं विद्यते - सर्वापि एकस्यैव अभिव्यक्तिः अस्ति। पार्थक्यावगमनं नाम माया अस्ति, अविद्या अस्ति। भारतस्य एताम् अध्यात्मपरम्परां पाश्चात्त्यजगत् अङ्गीकुर्यात् इति स्वामी आशास्ते स्म। एतस्य विनिमयरूपेण भारतदेशः पाश्चात्त्यानां पौरुषं, धैर्यं, भौतिकप्रगतिं च अङ्गीकुर्यात्। विवेकानन्दस्य एतस्याः चिन्तनरीतेः मूलाधारः तस्य तीव्राध्यात्मशीलतायां तथा च जगति क्रियाशीलानाम् ऐतिहासिकशक्तीनां घटकानां च गभीरावगमने आसीत्।

# राष्ट्रस्य पुनारचनायाः निमित्तम् आह्वानम्

स्वामी विवेकानन्दः सदैव साग्रहं प्रतिपादयति स्म यत् जनानां सेवा एव रामकृष्णव्यवस्थायाः भाग्ये शाश्वताय लिखिता अस्ति इति। 'महिलाः जनाः च' इति मन्त्रः अस्ति इति कदापि न विस्मरणीयम् इति सः सदैव स्मारयति स्म। भारतजागरणस्य तस्य कल्पनायाः एतौ द्वौ मुख्यौ आधारौ आस्ताम्। भविष्यत्कालीनः भारतदेशः भूतकालीनात् भारतदेशात् महिमवत्तरः उदात्ततरः च स्यादिति तस्य विशुद्धा आशा आसीत्। अस्पृश्यता, जातिभेदः, मूढविश्वासाः, अर्थहीनाः अपायकराः अत्याग्रहाः, निषेधाः इत्यादिभ्यः राष्ट्रपुर्ननिर्माणस्य तस्य योजनायां किमपि स्थानं नासीत्। महिलानां मुक्त्यर्थं प्रगत्यर्थं च सः आकुलः आसीत्। तस्य चिन्तनानुगुणं तथाकथितनिम्नवर्गाणां दरिद्राणां शोषणं, महिलाभिः सह असमीचीनाचरणम् इत्येते भारतस्य महत्तरे पापे आस्ताम्। सः निर्दिशति स्म यत् यस्य एकः एव पक्षः अस्ति तादृशः खगः यथा उड्डयनं कर्तुं न शक्नोति तथैव यस्य देशस्य महिलाः शृङ्खलाभिः बद्धाः इव सन्ति सः देशः कदापि प्रगतिं साधयितुं न शक्नोति। रूढार्थे स्वामिविवेकानन्दः समाजपरिष्कारकः नासीत्। वास्तविकानि सामाजिकपरिवर्तनानि यथा महिलानां स्थितौ परिवर्तनम् इत्यादीनि अन्तर्भागात् एव आविर्भवेयुः इति तस्य विश्वासः आसीत्। अन्येषां द्वारा अथवा शासनस्य द्वारा कस्यापि विषयस्य आरोपणं भवितुं नार्हति न भवेत् च। परन्तु यस्य विषये तस्य मनसि महान् आदरः आसीत् तस्य ईश्वरचन्द्रविद्यासागरस्य समाजपरिष्कारकार्यस्य उद्देशानां प्रयोजनानां च विषये तस्य मनसि अनुकम्पः आसीत्। वयसः अङ्गीकारविधिः (1891) यः न्यूनद्वादशवर्षीयायाः वध्वाः विवाहनिष्पत्तिं निषिद्धति स्म तं विधिं स्वामी शक्त्या समर्थितवान्। मुम्बय्याः पारसीसमुदायस्य कवेः, पत्रकारस्य, महतः समाजपरिष्कारकस्य बिहरामजी मेखानजी मलबारी (1852-1912) इत्यस्य प्रयत्नानां कारणेन एषः विधिः प्रस्तुतः आसीत्। एतेन विधिना समग्रराष्ट्रे प्रचण्डकोलाहलः उत्सुकता च उत्पादिता। हिन्दूनां सामाजिकधार्मिकपद्धतिषु समाघातः अस्ति इति चिन्तयद्भिः बहुभिः प्रमुखभारतीयैः एतस्य विधेः विरोधः कृतः। परं विवेकानन्दः



संन्यासी सन् अपि तं विधिं समर्थितवान् यतः एतेन बालविवाहानां वैधव्यस्य च नियन्त्रणं भवेत्, एषः विधिः महिलानां हिताय च अस्ति इति सः चिन्तयति स्म। परं भगिन्या निवेदितया लिखितं यत् स्वामी परिष्कारकाणाम् अथवा तेषां विरोधकानां परतया अपि नासीत् विरोधे अपि नासीत् इति। तस्य निर्देशः आसीत् - 'महिलानां जनानां च शिक्षणं भवतु' तदा एव ते स्वयं स्वनिमित्तं निर्णयं स्वीकर्तुं शक्नुयुः। एतादृशं स्वातन्त्र्यं प्रत्येकं जनस्य स्यादिति तस्य इच्छा आसीत्।

आदर्शनारीत्वस्य विवेकानन्दस्य स्वीया काचित् कल्पना आसीत्। भारतस्य प्राचीनकाव्येषु इतिहासे च यानि श्रेष्ठानि अनुकरणार्हाणि स्त्रीपात्राणि आसन् तानि अतिरिच्य राजपूतानां कथासु यानि महिलापात्राणि आसन् तेषां शक्तिं धैर्यं च सः प्रशंसति स्म। राज्ञ्याः अहिल्याबाय्याः विषये तथा च झांस्याः राज्ञ्याः विषये अपि तस्य मनसि महान् प्रशंसाभावः आसीत्। शक्तिः इत्येषः सः महत्त्वपूर्णतमः गुणः आसीत् यं स्वामी भारतीयपुरुषेषु महिलासु च द्रष्टुं काङ्क्षति स्म। मातृहृदयस्य नायकस्य इच्छाशक्त्या सह संयोगः भवेत्। तस्यां विद्यमानयोः मार्दवमधुरतयोः वैदिकस्थण्डिलस्य अग्निना सह ऐक्यं भवेत्। एतद् शिक्षणेन एव सिध्येत् यच्च शिक्षणं तस्याः ज्ञानस्य विकासस्य शारीरकमानसिकाध्यात्मिकविकासानां च निर्वहणं कुर्यात्। विज्ञानस्य तथा च आवश्यकतायां सत्यां यस्य उपयोगं कृत्वा महिलाः धनार्जनं कर्तुं शक्नुयुः तादृशस्य कस्यचित् अंशस्य महिलानां शिक्षणे समावेशः स्यात्। संस्थापितरूढीनाम् आक्रमणकारिणः आन्दोलनस्य फलरूपेण महिलाः समाजे तासां पुरुषसमस्तरम् उचितं स्थानं न प्राप्नुयुः। सा स्थानप्राप्तिः परोक्षा, शान्ता, रचनात्मिका च स्यात्।

विवेकानन्दस्य दृष्ट्या भारतीयस्त्रीत्वस्य आदर्शभूता आसीत् सीता। तस्याः विशुद्धशीलत्वेन, शुद्धतया, पातिव्रत्येन, सहनया, दुःखानां तितिक्षया च सा विशिष्टस्थानं प्राप्नोत्। आधुनिकमहिलासु आदर्शभूता आसीत् शारदादेवी - या च अध्यात्मशक्तेः, प्रेरणायाः, मातृत्वस्य, सामर्थ्यस्य च चिह्नम् आसीत्। यथा ब्रह्मचारिणां साधूनां च प्रशिक्षणाय मठाः भवन्ति तथैव ब्रह्मचारिणीनां साध्वीनां च प्रशिक्षणाय मठः भवेत् इति तस्य कल्पनाः आसन्। भारतीयस्त्रीत्वस्य आदर्शं साक्षात्कर्तुं ताः आत्मानं समर्पयेयुः। भारतीयमहिलानां मातृत्वस्य पारम्परिकगुणानां च स्वामिना कृता आराधना एतन्न निर्दिशति यत् समाजे महिलानां स्थानविषये, तासाम् अधिकाराणां विषये सम्मानस्य विषये च तस्य चिन्तनरीतिः आधुनिकी न आसीत् इति। महिलानां यत् शारीरकमानसिकपीडनं पुरुषैः समाजेन च क्रियते तथा च सन्तत्युत्पादनस्य यन्त्रम् इव ताभिः सह यत् व्यवह्रियते तस्य स्वामी निर्दयतया निन्दनम् अकरोत्। महिलापुरुषयोः स्वाभाविकसमतायां विश्वासवान् सः पाश्चात्यसमाजे महिलानां विषये अतिदाक्षिण्यं यत् प्रदर्श्यते स्म तस्य अपि निन्दकः आसीत्। तस्य अभिप्रायेण तादृशम् आचरणं नाम महिलानाम् एकविधम् अवमाननमेव आसीत्। शीलस्य पावित्र्यं पत्न्यां निष्ठा

इति द्वौ गुणौ पुरुषाणां कृते अपि समानप्रमाणेन महत्त्वपूर्णौ स्तः इति सः मन्यते स्म। हिन्दुविधवानां दुःखदस्थित्या कष्टैः च अतीव चिन्ताक्रान्तः सः तासां कष्टनिवारणाय क्रियमाणान् सर्वान् प्रयत्नान् प्रोत्साहयति स्म। विवाहसंस्थायाः पावित्र्ये द्वयोः आजीवनं स्नेहमये ऐक्ये च दृढविश्वासवान् आसीत् सः।

लिङ्गाधारितस्य भेदभावस्य समग्रकल्पनां विवेकानन्दः अनङ्गीकृतवान्। यदि आत्मनः किमपि लिङ्गं न भवति तर्हि महिलापुरुषयोः मध्ये भेदभावः किमर्थम् इति सः पृच्छति स्म। तस्य दृढाभिप्रायः आसीत् यत् अन्यस्य कस्यापि देशस्य महिलाः यथा तथैव भारतीयमहिलाः अपि स्वस्य समस्यानां समाधानं कर्तुं समर्थाः आसन्। स्वातन्त्र्यं, स्वनिमित्तं निर्णयस्वीकरणस्य अधिकारः इत्येषा एव तासाम् आवश्यकता आसीत्। सः अवदत् - 'अस्माकम् आवश्यकता अस्ति पुरुषाणां महिलानां च ... ये हिमालयादारभ्य केप् कोमोरिन्पर्यन्तं तथा च उत्तरध्रुवतः दक्षिण- ध्रुवपर्यन्तं नाम समग्रे जगति अनियन्त्रिताग्निः इव प्रसरेयुः तादृशानां सहस्रशः पुरुषाणां सहस्रशः महिलानां च आवश्यकता अस्ति अस्माकम्।' महिलासु तथा च भारतीयमहिलानां भारतस्य पुनर्निर्माणस्य सामर्थ्ये तस्य प्रचण्डा श्रद्धा आसीत्। तस्य तीव्रभावनां निरतिशयाशां प्रकटयन् सः अकथयत् - 'पञ्चशतपुरुषैः भारतस्य जयार्थं पञ्चाशत् वर्षाणि आवश्यकानि भवेयुः किन्तु तावद्भिः एव महिलाभिः कतिपयसप्ताहैः एव तत्कार्यं सिध्येत्।' पुरुषत्वम् अथवा महिलात्वं तस्य दृष्ट्या महत्त्वपूर्णं नासीत् अपि तु स्वस्य विकासं साधयित्वा मनुष्यरूपेण मानववंशस्य वास्तविकसदस्यत्वप्राप्तिः तस्य दृष्ट्या महत्त्वपूर्णतमा आसीत्।

समाजपरिष्कारस्य, समाजोद्धारस्य च समस्यायाः विषये स्वामिनः विवेकानन्दस्य विचाराणाम् अध्ययनं जनानां सार्वजनीनजीवने वैयक्तिकजीवने च धर्मस्य भूमिकायाः तस्य विवरणस्य पार्श्वभूमौ भवेत्। लक्ष्यसाधनाय तेन सूचितेषु उपायेषु पद्धतौ च धार्मिकपरिवर्तनं, सामाजिकप्रगतिः, जनजागरणम् इत्येते अंशाः अन्योन्यसम्बद्धाः आसन्। समाजस्य पुनरुज्जीवनस्य तीव्राम् आवश्यकतां, समाजस्य उच्चवर्गस्य द्वारा आ शतकेभ्यः आरभ्य जनानां क्रियमाणपीडनस्य समापनस्य च आवश्यकतां सः पुनः पुनः साग्रहं प्रतिपादयति स्म। निर्धनप्रजानां धनेन शिक्षणं प्राप्य तासां प्रजानां विषये ये प्राप्तशिक्षाः उपेक्षां प्रदर्शयन्ति स्म तान् सः भर्त्सयति स्म। एतादृशान् पुरुषान् सः द्रोहिणः मन्यते स्म। 'यावत् पर्यन्तं भारतस्य प्रजानां पुनरेकवारं सम्यक् शिक्षणं, सम्यक् पालनं च न क्रियते तावत्पर्यन्तं कियता अपि प्रमाणेन राजनीतिः कृता चेदपि लाभः न स्यादिति' अपायसूचनामपि सः अयच्छत्। सः उदघोषयत् - 'भारतस्य एकमात्रम् आशाकेन्द्रं सामान्यप्रजाः सन्ति। उच्चवर्णाः शारीरकदृष्ट्या नैतिकदृष्ट्या च मृताः सन्ति।' तस्य अनुयायिनां, रामकृष्णव्यवस्थायाः, वर्धमानयुवजनानां च सः अनुरोधम् अकरोत् यत् ते जनान् शिक्षितान् कुर्युः, तेभ्यः तेषाम् अधिकारान् दद्युः च इति। सः शूद्राणां नाम कृषकाणां, शिल्पिनां, कर्मकराणां, भूमिहीनश्रमिकाणां च उदयं चिन्तयति स्म। एते



एव भारतस्य आशाकेन्द्राणि आसन्। वस्तुतः स्वामिना कृतस्य भविष्यत्कथनस्य अनुसारं अधः पतिताः, उत्पीडिताः उपेक्षिताः च जनाः भारतस्य भविष्यतः स्वामिनः आसन्।

सामाजिकगतौ स्वामी विश्वसिति स्म। कस्मै अपि विशिष्टाधिकारः कोऽपि न स्यात्, सर्वेभ्यः समानाः अवसराः भवेयुः इति सः वाञ्छति स्म। सः अकथयत् - 'युवकाः सामाजिकोत्थानं, समतां च उपदिशेयुः ... यः स्वातन्त्र्यं दातुं न सज्जः सः स्वातन्त्र्यं नार्हति। स्वस्य क्षमतानाम् अनुगुणं, सामर्थ्यस्य अनुगुणं च विकासस्य समानम् अवसरम् एकैकोऽपि प्राप्नुयात्। समाजस्य पुनर्निर्माणस्य तन्निमित्तं क्रियमाणानां प्रयत्नानां च लक्ष्यं सर्वेषां समानस्तरं प्रति उन्नयनं स्यात् न तु सर्वेषां समानस्तरं प्रति अधः नयनम्। विशिष्टाधिकाराः अदृश्याः भवेयुः। भेदभावनायां विश्वासेन समग्रदौष्ट्यानि उत्पद्यन्ते। वस्तुषु अन्तर्निहितायां समतायाम् एकतायां च स्थापितया श्रद्धया समग्रहितं भवति। अधः पतितानां निर्धनानां च निमित्तम् आमृत्यु अनुकम्पा इत्यस्माकं ध्येयवाक्यम् अस्ति। अग्रे सरत वीरबालकाः।' ये समतायां विश्वसन्ति तान् सर्वान् विशिष्टाधिकाराणाम् उच्छेदनाय अविरतं निर्भयतया च योद्धुं सः आह्वयत्। निम्नवर्णीयानां तेषां वैधाधिकारप्राप्त्यर्थम् उच्चवर्णीयाः स्वस्य हितरक्षणाय साहाय्यं कुर्युः इत्यस्य समयः आसन्नः इति सूचनां सः अयच्छत्।

अस्पृश्यतायाः, मूढविश्वासानाम्, असमानतायाः च विरोधार्थं विवेकानन्देन क्रियमाणं युद्धं वस्तुतः तस्य बाल्ये तदा एव आरब्धम् आसीत् यदा सः पितुः प्रकोष्ठे विविधजातीनां विविधमतानां च जनानां निमित्तं स्थापितानां धूमपाननलिकानां स्वयं प्रयोगम् एतद् द्रष्टुम् अकरोत् यत् कथं तेन तस्य जातिः नष्टा भवति इति। तद् युद्धं न कदापि समाप्तम् अपि तु तस्य जीवनस्य अन्तपर्यन्तं तस्य गतिः शक्तिः च वर्धमाने एव आस्ताम्। तदीये भारतभ्रमणकाले सः समाजस्य सर्वविभागीयैः जनैः सह तेषां जातिं, मतं, सामाजिकस्थानं च अविगणय्य अमिलत्, अभुङ्क्त, अवसत्, अभाषत च। कस्यचित् स्वच्छताकर्मकरस्य गृहे कृतेन वासेन, राजभवनेषु तेन प्राप्तेन स्वागतेन, मुस्लिमगृहेषु प्राप्तेन प्रेममयेन स्वागतेन च सः एतं दृढविश्वासं प्राप्नोत् यत् यैः जनानां विभाजनं क्रियन्ते तादृशानां सर्वेषां भेदभावानां पूर्वग्रहाणां च समग्रोन्मूलनं भवेदिति। तेन दृष्टाभ्याम् अनुभूताभ्यां दारिद्र्यदुःखाभ्यां तस्य हृदयं सर्वेषां निमित्तं स्नेहानुकम्पाभ्याम् अभिभूतम्।

पश्चिमे जयं प्राप्य भारतं प्रत्यागमनात् परं सः 'पाकशालामतं पाकपात्रदेवः' इत्यनयोः विरुद्धं बलवदान्दोलनम् आरभत। दैनन्दिनजीवने ये अर्थहीनाः निषेधाः, विधयः, रूढयः च आसन् ताः सः तीव्रतया अभर्त्सयत्। सः अवदत् - 'सद्यः भारतस्य मतम् अस्ति 'मा स्पृश' इति ... वर्तमानं हिन्दुमतं निम्नस्तरीयम् अस्ति।' 'अहं शुद्धः अस्मि अन्ये सर्वे च अशुद्धाः!' इति समाजजीवनस्य स्थितिं दैनिकाभ्यासं च सः तत्सर्वं पशुतुल्यं, राक्षसीयं, नारकीयं च अस्ति इत्युक्त्वा अनिन्दत्। अस्पृश्यता इत्येषा

गर्हणीया पद्धतिः अस्ति इति सः अमन्यत। तां घृणास्पदं मन्यमानः सः ताम् अनिन्दत्। महता दुःखेन सः अवदत् - 'हन्त! देशे विद्यमानानां दरिद्राणां विषये न कश्चन चिन्तयति। ते एतस्य देशस्य मेरुदण्डतुल्याः सन्ति - ते ये श्रमेण अन्नम् उत्पादयन्ति ... यदि एते स्वच्छताकर्मकराः श्रमिकाः च दिनार्धमपि कार्यं स्थगयिष्यन्ति तर्हि कस्मिन्नपि नगरे भयम् उत्पन्नं भविष्यति। परं तेषां विषये अनुकम्पां न कश्चन अनुभवति, तेषां कष्टेषु तान् सान्त्वयितुं न कोऽपि विद्यते ... अहर्निशं वयं तान् 'अस्मान् मा स्पृशत! अस्मान् मा स्पृशत!' इति वदन्तः स्मः। अस्मिन् देशे करुणा, हृदयस्था दया वा विद्यते किम्? अथवा केवलाः 'मा स्पृशत' इति कथयन्तः जनाः एव सन्ति। एतादृश्यः परम्पराः त्यक्तव्याः। कदाचित् अस्पृश्यतायाः अवरोधान् भञ्जयित्वा ये सर्वे दरिद्राः, दुःखिताः, दीनाः, अधः पतिताः च सन्ति तान् अहं श्रीरामकृष्णस्य नाम्ना एकत्र आनेतुम् इच्छामि। तेषाम् उत्थानं यावद् न भवति तावद् माता न जागृयात्।' भारतीयप्रजासु तासां सुप्तसामर्थ्येषु च तस्य अविचला श्रद्धा आसीत्। ताः नवभारतस्य पुनर्निर्माणं करिष्यन्ति। विशिष्टाधिकारवन्तः उच्चवर्गाः ये आ नैकेभ्यः शतकेभ्यः निर्धनान् अपीडयन् ते 'जीवन्तः शवाः' जाताः सन्ति। जनानाम् उदये जाते एते अदृश्याः भविष्यन्ति। स्वामिनः उत्कटा आशा आसीत् -- हलं स्वीकृतवतः कृषकस्य कुटीरात्, धीवराणां कुटीरेभ्यः, चर्मकाराणां, स्वच्छताकर्मकराणां च कुटीरेभ्यः नवभारतस्य उदयः भवतु। पाकवस्तूनाम् आपणात्, भर्ज्यविक्रेतुः चुल्लीतः च सः कूर्दनं करोतु। यन्त्रालयात्, आपणेभ्यः, विपणिभ्यः च भारतस्य उदयः भवतु। वाटिकाभ्यः, वनेभ्यः, गिरिभ्यः, पर्वतेभ्यः च भारतस्य उदयः भवतु।

जातिव्यवस्थायाः विषये स्वामिनः विवेकानन्दस्य अभिप्रायः आसीत् यत् सा धार्मिकव्यवस्था न, अपि तु सामाजिकसंस्था आसीत् यस्याः उत्तमाः गुणाः आसन् अपि च यद्यपि सा दोषपूर्णा आसीत् तथापि भूतकाले तया तावत्पर्यन्तम् अनेकानि शोभनानि प्रयोजनानि साधितानि आसन् यावत्पर्यन्तं केषाञ्चन ब्राह्मणानां महता अज्ञानेन गर्वेण च तस्याः अधोगतिः नाशः च न कारितः आसीत्। आधुनिकजाति- वैशिष्ट्यानि भारतस्य प्रगतेः अवरोधाः सन्ति। तैः जातेः तन्नाम वर्ण वैविध्यस्य येन समता समानाः विशिष्टाधिकाराः च रक्ष्यन्ते तस्य स्वतन्त्रकार्यं बाधितं भवति। स्वामी अकथयत् - वर्णकलहेन न कोऽपि लाभः। संस्कृतेः विनियोगेन जातेः समत्वसाधनस्य, उच्चवर्गेभ्यः शक्तिदातुः शिक्षणस्य च आवश्यकता अस्ति।' स्वामी साग्रहम् अनुरोधम् अकरोत् - प्रकृत्याम् असमता अस्ति चेदपि सर्वेभ्यः समानावसराः भवेयुः -- अथवा केभ्यश्चित् अधिकाः अन्येभ्यः केभ्यश्चित् न्यूनाः — शक्तिमताम् अपेक्षया दुर्बलेभ्यः अधिकाः अवसराः दातव्याः --- यतः यस्मै प्रकृत्या जन्मना तीक्ष्णा बुद्धिः न दत्ता तस्य अधिकसाहाय्यम् अवश्यं भवेत्।' स्वामी अकथयत् यत् सः यथार्थं सत्यम् अवागच्छत् यत् - 'प्रत्येकस्मिन् जीवे देवः वर्तते। तं देवं विहाय पृथक् देवः न कश्चन वर्तते।



यः जीवस्य सेवां करोति सः वस्तुतः देवस्य एव सेवां करोति।' भारतस्य निर्धनानां पीडितानां जनानाम् उन्नत्यै स्वामिना कृतं महत्त्वपूर्णं प्रदानम् उल्लिखन् आचार्यः विनोबा भावे वदति - 'दरिद्रनारायणः' इति शब्दं विवेकानन्दः असृजत् महात्मा गान्धीः तं लोकप्रियम् अकरोत् च।'

मूलगतेषु शाखागतेषु च परिवर्तनेषु स्वामिविवेकानन्दस्य श्रद्धा आसीत्। सामाजिकपरिष्कारस्य अपेक्षया विकासे तस्य विश्वासः आसीत्। समाजस्य राष्ट्रस्य च पुनर्घटनाय आन्तरिकशक्तेः आवश्यकता भवति। परं परिष्कारकाः समाजस्य परिष्काराय यान् प्रयत्नान् कुर्वन्ति स्म तद्विषये तस्य मनसि अनुकम्पः आसीत्। 1897 तमे वर्षे मद्रासनगरगमनात्परं सोशल् रिफॉर्म असोसिएशन् इत्यस्याः सदस्यान् सः अकथयत् यत् समाजस्य परिष्कारस्य विषये तस्याः संस्थायाः नायकानां विप्लवकारिण्याः चिन्तनरीतेः मम सम्मतिः नास्ति तथापि अस्पृश्यतानिवारणं, बालविवाहाः, प्राचीनायाः तर्कसङ्गतायाः जातिव्यवस्थायाः पुनः संस्थापनम् इत्यादीनां परिष्काराणाम् आवश्यकताम् अहम् अङ्गीकरोमि इति। भारतस्य सर्वमुखजागरणाय पुनरुत्थानाय च विवेकानन्दस्य रामबाणतुल्यः उपायः आसीत् - अध्यात्मक्षेत्रे महता परिष्कारेण सह शिक्षणम् इति।

मनुष्ये यद् पूर्वादारभ्य एव अस्ति तस्य आविष्करणस्य प्रक्रिया नाम ज्ञानप्राप्तिः इत्यस्मिन् सः विश्वसिति स्म। शिक्षणस्य तेन कृता व्याख्या अस्ति - 'मनुष्ये यद् परिपूर्णत्वं पूर्वमेव अस्ति तस्य अभिव्यञ्जनं नाम शिक्षणम्।' समग्रमपि ज्ञानम् अधार्मिकम् अथवा अध्यात्मिकं मानवमनसि एव वर्तते। तस्य आवरणस्य अपसारणाय शिक्षणं शिक्षार्थिनः साहाय्यं करोति। बालः स्वयमेव स्वं शिक्षयति। बालकस्य विकासाय, स्वकीयपद्धत्या अग्रे गमनाय च शिक्षकः तस्य साहाय्यमात्रं कर्तुं शक्नोति। बालेभ्यः भावात्मककल्पनाः दातव्याः। कस्यचित् मस्तिष्के पूरितानां वार्तानां परिमाणं नाम तस्य शिक्षणं न। यत् जीवनं घटयति, यत् मनुष्यं घटयति, यत् शीलं घटयति तादृशं कल्पनामिश्रणम् अस्माकम् अवश्यं भवेत्। यत् शिक्षणं सामान्यमनुष्यान् जीवनस्य सङ्घर्षार्थं न सज्जीकरोति, तेषां शीलस्य सामर्थ्यं न प्रकाशयति, तेषु धैर्यं न पूरयति, जनहितसाधनस्य प्रेरणां तेषु न सृजति तद् प्रयोजनहीनम्। स्वामी जनेभ्यः तादृशस्य शिक्षणस्य दानस्य पक्षे आसीत् येन ते स्वावलम्बिनः भवेयुः, स्वयं स्वस्य आजीविकां निर्वहेयुः च, न तु तादृशस्य पक्षे येन ते आजीविकान्वेषकाः भवेयुः अथवा अन्येषाम् आयस्य आधारेण जीवन्तः समाजेन येषाम् उत्तरदायित्वं निर्वोढव्यं तादृशाः जनाः भवेयुः।

शिक्षणस्य सारः तथा च जीवनस्य सर्वशाखासु साफल्यप्राप्तेः रहस्यं मनसः एकाग्रता अस्ति इत्यपि सः साग्रहम् अकथयत्। जीवने सर्वाधिकमहत्त्वपूर्णा सम्पत्तिः अस्ति आत्मविश्वासः। शिक्षणेन तस्य वृद्धिः प्रोत्साहनीया। शिक्षार्थिनः व्यक्तित्वविकासः इति शिक्षणस्य लक्ष्यं स्यात्। शक्तिमतां स्नायूनां शक्तिमतां ज्ञानतन्तूनां च युगपत्

विकासः स्यात्। शिक्षकस्य उत्तरदायित्वं प्रचण्डं भवति। तस्य विचारेषु, शब्देषु, क्रियासु च शुद्धता स्यात्। गुप्तेभ्यः स्वार्थिभ्यः उद्देशेभ्यः सः मुक्तः स्यात्। सः उदारहृदयः संयमवान् च स्यात्। शिक्षार्थिनि अपि एते गुणाः समप्रमाणेन भवेयुः। छात्रशिक्षकयोः सम्बन्धे उभयोः अपि स्नेहः, आदरः, विश्वासः इत्यादयः गुणाः भवेयुः। छात्राणां विषये शिक्षकस्य मनसि अनुकम्पः, स्नेहः च भवेदेव। छात्राणां सम्मानस्य संवेदनानां च अपायं सः न कदापि कुर्यात्। सर्वासु क्रियासु उन्नततमं नैतिकधैर्यं प्रतिफलेत्। सत्यकथनं धैर्येण भवेदेव। बौद्धिकाध्यात्मिकशारीरकदौर्बल्यानाम् उत्साहभङ्गः निषेधः च भवेदेव। पुस्तकीयं ज्ञानं मनुष्यघटकं शिक्षणं भवितुं नार्हति एव। यथार्थज्ञानस्य शिक्षणस्य च चिह्ने स्तः हृदयस्य विकासः, मानवानां कृते तीव्रा स्नेहभावना च इति। महिलानां शिक्षणस्य उत्कटाम् अपरिहार्यतां स्वामी साग्रहं प्रतिपादयति स्म यतः तेन विना तासाम् उन्नतिविषयकं मुक्तिविषयकं च चिन्तनम् अप्रयोजकम् आसीत्।

विवेकानन्दः पुनः पुनः साग्रहम् असूचयत् यत् सामान्यप्रजानां शिक्षणम् इत्येषा महत्त्वपूर्णतमा आद्यता अस्ति इति। तासां शिक्षणं मातृभाषया भवेत्। परिज्ञानम् अतिरिच्य कल्पनानां संस्कृतेः चापि प्रजाभ्यः दानम् अवश्यं भवेत्। तदा एव जनानां स्थितेः चिरकालार्थम् उन्नयनं शक्यम्। निर्धनाः अपि अवश्यं शिक्षणं प्राप्नुयुः। स्वामी अकथयत् - यदि निर्धनः बालः शिक्षणं प्रति आगन्तुं न शक्नोति तर्हि शिक्षणम् अवश्यं तत्समीपं गच्छेत्। ग्रामीणक्षेत्रे शिक्षणस्य आग्रहः स्यात्। चित्रग्राहिणी, भूगोलस्य प्रतिकृतिः, भूपटः इत्यादीन् स्वीकृत्य शिक्षकाणां गणः कश्चन ग्रामान् गत्वा बालान् खगोलशास्त्रं, भूगोलविषयं च पाठयेत्, अन्यान्यदेशसम्बद्धाः कथाः श्रावयेत् च। एतादृशानां विषयाणां द्वारा बालानां मनस्सु आधुनिकविज्ञाने, इतिहासे, वाङ्मये, धर्मस्य मूलभूतसत्यानां विषये च आकर्षणं स्रष्टव्यम्। एतत्कार्यं प्रेम्णः कर्तव्यभावेन सम्पादनीयम्। यत्र यत्र शक्यं तत्र शिक्षणं मौखिकमाध्यमेन भवेत् इति स्वामी अकथयत्। एतस्य विवरणं सः रामकृष्णमठस्य संन्यासिनां कृते एवम् अकरोत् - 'नेत्रम् एव ज्ञानद्वारम् अस्ति इति नास्ति, कर्णः अपि तत्कार्यं तथैव कर्तुं शक्नोति।' रामकृष्णमिशन्संस्थया तस्याः आरम्भतः एव स्वामिनः विवेकानन्दस्य शैक्षणिककल्पनानां क्रियान्वयने बलं निहितम् अस्ति। मिशन्संस्थया शिक्षणस्य सर्वेषु स्तरेषु सर्वासु शाखासु च याः शैक्षणिकसंस्थाः सञ्चाल्यन्ते ताः भारतस्य उत्तमाः समीचीनतमाः च संस्थाः मन्यन्ते।

1895 तमे वर्षे सप्टेम्बर्मासे लिखिते कस्मिंश्चित् पत्रे स्वामी विवेकानन्दः अकथयत् यत् राजनीतौ तस्य स्वल्पोऽपि विश्वासः नासीत्, सः तया सह कमपि सम्बन्धमपि न इच्छति स्म च इति। यावता प्रमाणेन भारतस्य तस्मिन् स्वाम्यम् आसीत् तावता एव प्रमाणेन जगतः अपि आसीत्। एतद् वस्तुतः सत्यम् आसीत्। एवं सत्यपि भारते राष्ट्रियतायाः विकासाय, भारतस्य स्वातन्त्र्यान्दोलनाय च तस्य प्रदानं सुमहत् आसीत्। सर्वैः इतिहासलेखकैः एषः अंशः अङ्गीकृतः। महान्तः राष्ट्रनेतारः



स्वातन्त्र्ययोद्धारः च तेषां प्रेरणास्रोतः स्वामी आसीत् इति कथयित्वा तस्मै श्रद्धाञ्जलिं समर्पितवन्तः। तेषां दृष्ट्या सः राष्ट्रनायकस्य आदर्शं प्रतिरूपम् आसीत् - देशभक्तः सत्पुरुषः तथा च देशभक्तः देवदूतः। 'राष्ट्रियता' इत्यस्य शब्दस्य प्रयोगं स्वामी न अकरोत्। तस्यैव शब्दैः कथितं चेत् तस्य ध्येयकार्यं 'मनुष्याणां घटनम्' इत्यासीत् न तु 'राष्ट्रस्य घटनम्' इति। परं भगिन्या निवेदितया लिखितं यत् - 'सः आधारशिलासु कार्यं कुर्वाणः श्रमिकः आसीत् ...सः जन्मना प्रियकरः आसीत् तथा च तस्य प्रीतेः राज्ञी आसीत् तस्य मातृभूमिः। तस्य कृते भारतस्य विचारः नाम 'यं वायुं सः श्वसिति स्म तत्तुल्यः' आसीत्। भारतस्य राष्ट्रजीवनस्य 'जीवत् सर्वश्रेष्ठम् उदाहरणम्' आसीत् सः।

शिकागोनगरे जाते विश्वधर्मसंसदि (1893) स्वामिना विवेकानन्देन प्राप्तं साफल्यम् इत्येषा सा महत्त्वपूर्णा घटना आसीत् यस्याः महान् परिणामः प्रभावः च भारतीयानां मनस्सु जातः। भारतस्य वर्धमानं राष्ट्रियताभावं, स्वावलम्बनभावं, पारतन्त्र्यात् मुक्तेः भावं च विवेकानन्दः शक्तिमद्भिः शब्दैः प्राकटयत्। उदयं गच्छतीनां राष्ट्रभावनानां क्रोधं शब्दैः प्रकटय्य सः सुदीर्घकालात् प्रचलतीनां पूर्वपश्चिमयोः जनेषु तथा च क्रैस्तेषु अक्रैस्तेषु च देशेषु विद्यमानानाम् असमतायाः कल्पनानां युद्धाह्वानम् अकरोत्। भारतीये दृश्ये सः कश्चन तादृशः अतिमहत्त्वपूर्णः जनः इव उद्भूतः यः शौर्यस्य, आत्मविश्वासस्य, पौरुषस्य च मूर्तिरूपः आसीत्। समग्रमुक्तिं काङ्क्षतः भारतीयान् सः प्रादर्शयत् यत् केवलं राजनैतिकस्वातन्त्र्यं न पर्याप्तम् अपि तु आगामिकाले राष्ट्रम् एव तेषां भगवान् स्यादिति। सः सर्वान् एतं निर्णयं कर्तुं प्रेरितवान् यत् - 'अग्रिमेषु पञ्चाशति वर्षेषु एषा अस्माकं महती भारतमाता एव अस्माकं मुख्यबिन्दुः स्यात्। तावतः कालस्य निमित्तम् अस्माकम् अन्ये सर्वे व्यर्थदेवाः अस्माकं मनोभ्यः अदृश्यतां गच्छेयुः। अस्माकं स्वकीयः वंशः इत्येकः एव देवः सर्वत्र जागर्ति। तस्य हस्ताः, तस्य पादाः, तस्य कर्णाः च सर्वत्र सन्ति सर्वत्र सः एव व्याप्तः अस्ति। देशभक्तेः स्वस्य संकल्पनायाः व्याख्यां सः एवम् अकरोत् - अहं देशभक्तो विश्वसिमि अपि च देशभक्तेः मम स्वीयः कश्चन आदर्शः अपि अस्ति। महत्याः सिद्धेः निमित्तम् अंशत्रयम् आवश्यकम्। प्रथमः अंशः हृदयेनः अनुभूतिः ... अतः हे मम भाविसमाजपरिष्कारकाः! भाविदेशभक्ताः! अनुभवत! यूयम् अनुभवथ किम्? देवानाम् ऋषीणां च लक्षशः वंशजाः नृपशूनां प्रतिवेशिनः जाताः सन्ति इति यूयम् अनुभवथ किम्? लक्षशः जनाः अद्य बुभुक्षिताः सन्ति, लक्षशः च चिरकालादारभ्य बुभुक्षिताः एव सन्ति इति यूयम् अनुभवथ किम्? अज्ञानं कश्चन कृष्णमेघः इव अस्माकं देशस्य उपरि आगतम् अस्ति इति यूयम् अनुभवथ किम्? तेन यूयम् अस्वस्थचित्ताः भवथ किम्? यूयं निद्रारहिताः भवथ किम्? ... तेन यूयम् उन्मत्तप्रायाः अभवत किम्? नाशस्य दुःखेन ग्रस्तानां युष्माकं युष्माकं नाम्नां, कीर्तीनां, पत्नीनाम्, अपत्यानां, सम्पत्तीनां, युष्माकं शरीराणां चापि विस्मरणं जातम् अस्ति

किम्? तद् युष्माभिः कृतं किम्? देशभक्तभवनस्य प्रथमपदम् आद्यपदम् अस्ति एतद्।' परं यथार्थदेशभक्तस्य एतावदेव न पर्याप्तम्। तस्मिन् पर्वततुल्यानाम् अवरोधानाम् अतिक्रमणस्य इच्छाशक्तिः अवश्यं भवेत्। जगत् अपि तद्विरुद्धं तिष्ठति चेदपि सः स्वस्य लक्ष्यं प्रति सातत्येन अग्रे सरेत्। अन्ते च कोटिशः जनानां दुःखनिवारणाय सः साहाय्यं कुर्यात्, प्रोत्साहनस्य सान्त्वनस्य च शब्दान् वदेत्, 'सजीव-मृत्युतः' तान् बहिरानयेत् च। भारतस्य उदयतां स्वातन्त्र्ययोद्धॄणां परिवर्तनेच्छुकानां च विषपरीक्षा आसीत् एषा। तेषु बहवः एतां परीक्षां स्वीकृत्य स्वसामर्थ्यं प्रमाणयितुं सज्जाः आसन्।

विवेकानन्दस्य भाषणैः लेखनैः च सर्वेऽपि देशभक्तभारतीयाः सुप्रभाविताः। तस्य अवधानकेन्द्रम् आसीत् भारतस्य युवजनाः। तान् सम्बोधयन् सः अकथयत् - 'नायकानाम् आवश्यकता अस्ति युष्माकं देशस्य अतः नायकाः भवत। पाषाणान् इव लोहतुल्यान् स्नायून् चित्रायसतुल्यान् ज्ञानतन्तून् च काङ्क्षति मातृभूमिः। यासां विरोधं न कोऽपि कर्तुं शक्नुयात्, याः ब्रह्माण्डस्य गूढानि, रहस्यानि च भेत्तुं शक्नुयुः, याः आवश्यकतायां सत्यां समुद्रतलं गत्वा मृत्योः आभिमुख्यं कृत्वा अपि कार्यं साधयेयुः तादृशीनां सुमहतीनाम् इच्छाशक्तीनाम् आवश्यकता अस्ति।' एते शब्दाः ज्वालामुखात् उद्गतः अग्नितप्तः द्रवपाषाणः इव आसन् यः समग्रं दुर्बलत्वं, भीरुत्वं, कम्पशीलत्वं, कातरत्वं च अनाशयत्।

भारते ब्रिटिशराज्यस्य उग्रनिन्दकः आसीत् स्वामी। ब्रिटिशैः क्रियमाणं भारतीयानां, भारतस्य आर्थिकप्राकृतिकसम्पदां च शोषणं तस्य अतीव अनिष्टम् आसीत्। वांशिकधार्मिकश्रेष्ठत्वं कथयित्वा ब्रिटिशाः भारते यच्छासनं कुर्वन्तः आसन् तस्य सः विरोधकः आसीत्। काङ्ग्रेस-आन्दोलनाय विवेकानन्दः स्वागतम् अकथयत् यतः 'भारतस्य अनेकवंशानां संयोजनेन निर्मीयमाणम् एकं राष्ट्रं' सः पूर्वमेव द्रष्टुं शक्नोति स्म। परं जनानां 'मानवत्वस्य' प्राप्तिं विना मतनिर्वाचनदलानि उपयोगहीनानि इति मन्यते स्म सः। वास्तविकयोः दीर्घकालिकयोः च हितप्रगत्योः निमित्तं विचारक्रिययोः स्वातन्त्र्यम् अत्यावश्यकम् इति तस्य अभिप्रायः आसीत्। 'प्रार्थनायाचनयोः' काङ्ग्रेसनीतेः निन्दकः आसीत् स्वामी। एतादृशम् आचरणं भिक्षुकत्वम् इति मन्यते स्म सः। अधिकांशाः शिक्षिताः भारतीयाः आजीविकान्वेषकाः केवलाः आसन् इति तस्मै महद्दुःखदः विषयः आसीत्। अभावात्मकशिक्षणेन जनाः 'दुर्मनोभाववति वंशे' परिवर्त्यमानाः आसन्! इण्डियन् नॅशनल् काङ्ग्रेस् इति मध्यमपथगामिभिः नीयमानस्य दलस्य चिन्तनरीतौ नीतिषु च एतस्य प्रतिबिम्बं दृश्यते स्म। एतादृशानि दौर्बल्यानि स्वामी तिरस्करोति स्म। तस्मिन् समये वैचारिकप्रणाल्याः भेदस्य आधारेण काङ्ग्रेसदलस्य मध्यमपथगामिनः एकान्तवादिनः इति गणद्वये विभाजनं जातम् आसीत्। एतद् गणद्वयम् अतिरिच्य अन्ये अपि क्रान्तिकारकाः, युद्धोद्यतानां युवकानां गणाः चापि आसन् ये भारते विद्यमानं ब्रिटिशशासनं विरुद्ध्य सशस्त्रम् आन्दोलनं कर्तुम् इच्छन्ति स्म। विवेकानन्दस्य जीवनात् सन्देशेभ्यः



च एकान्तवादिनः क्रान्तिकारकः च सहजतया प्रेरणां वृत्तिं च प्राप्नुवन्। वस्तुतः स्वामिनः कल्पनाभिः एव अतिरेकिराजनैतिकदर्शनशास्त्रस्य क्रान्तिकारकाणाम् आन्दोलनस्य च निमित्तं पीठिका सज्जीकृता आसीत्। वन्दे मातरम् इति कृत्या ख्यातस्य उपन्यासलेखकस्य बङ्किमचन्द्रचटर्जी इत्यस्य, आर्यसमाजस्य संस्थापकस्य स्वामिनः दयानन्दस्य, बाल-गङ्गाधर-तिलकस्य च उपदेशैः लेखनैः च वैचारिकवातावरणं निर्मितम् आसीत्।

यद्यपि मध्यमपथगामिनां नीतिकार्यक्रमादीनां विषये विवेकानन्दस्य सहानुभूतिः, तेभ्यः आधारदानं च नासीत् तथापि तेषु तस्य प्रभावः सुस्पष्टः अस्ति। मध्यमपथगामिनां प्रमुखः नेता सुरेन्द्रनाथ बानर्जीः अलिखत् यत् शिक्षितभारतीयानाम् आकाङ्क्षासु महाप्रभावजनकः स्वामी विवेकानन्दः दीप्तिमतः अध्यात्ममार्गदर्शकात् अधिकः आसीत्। देशभक्तः इत्यस्य शब्दस्य यथार्थं रूपम् आसीत् सः। मध्यमपथगामिनाम् अन्यः अत्यादरपात्रं नेता जी.के. गोखले इत्यस्मिन् अपि विवेकानन्दस्य गभीरप्रभावः आसीत्। नॅशनल्-काङ्ग्रेस् इति दले ये शनैः मध्यमपथगामिनः छायावृतान् अकुर्वन् तेषु एकान्तवादिषु तिलकस्य मनसि स्वामिनः विषये अतिप्रशंसाभावः आसीत्। 'मराठा' इति तिलकस्य सुख्याते वार्तापत्रे स्वामिनः विवरणं 'भारतस्य राष्ट्रियतायाः वास्तविकः पिता' इत्यासीत्। प्रत्येकमपि भारतीयः तद्विषये अभिमानं वहति इत्यपि तत्र योजितम् आसीत्। लाल-बाल-पाल इति (लाला लाजपत रायः, बाल गङ्गाधर तिलकः, विपिनचन्द्र पालः) प्रख्यातात् त्रिकात् अन्यतमस्य विपिनचन्द्रपालस्य सामाजिकधार्मिकाभिप्रायाणां विषये, चिन्तनरीतौ च स्वामिनः महान्तः अभिप्रायभेदाः आसन्। परं तथापि 'भारतीयराष्ट्रियतायाः महत्तमः उपदेशकः दूतः' इति स्थानं स्वामिना आशुतया स्वाधीनीकर्तुं शक्यते इति सः अन्वभवत्। भारतस्य राष्ट्रियतायाः सोत्साहं पुरस्कारकर्त्री होम रुल् आन्दोलनस्य प्रमुखनेत्री ॲनी बेझण्ट् अङ्ग्यकरोत् यत् जनेषु राष्ट्रियतायाः तीव्रभावनां सञ्जागरय्य सः राष्ट्रियतायाः आन्दोलनं 'शक्तिमतीं क्रियाशीलां स्थितिं' प्रति प्रापयत्। एतादृशीमेव श्रद्धां देशबन्धुः चितरञ्जनदासः प्राकटयत्। नेताजी सुभाषचन्द्रबोसः आत्मानं विवेकानन्दस्य शिष्यं मन्यते स्म। भारतस्य स्वातन्त्र्यात् पूर्वतनैः तदनन्तरकालीनैः बहुभिः राष्ट्रनेतृभिः आधुनिकभारतस्य निर्माणप्रक्रियायै विवेकानन्दस्य प्रदानं दीप्तिमद्भिः शब्दैः अङ्गीकृतम्। सी.राजगोपालाचारी अवदत् - 'तेन विना अस्माकं धर्मः नष्टः अभविष्यत् वयं स्वतन्त्राः नाभविष्यामः च' इति। डा.राजेन्द्रप्रसादः तं 'कञ्चन अतिश्रेष्ठम् आत्मानं' मन्यते स्म यः च मानववंशस्य अधः पतन्तं विभागम् उन्नेतुं पृथिवीम् आगतः आसीत्। डा. एस्.राधाकृष्णन् इति भारतस्य भूतपूर्वः दार्शनिकः राष्ट्रपतिः अलिखत् - 'सः अस्मभ्यं कष्टेषु शौर्यं, सङ्कटे आशां, निराशतायां धैर्यं च अयच्छत्।'

विवेकानन्दस्य साक्षात् प्रभावः सर्वाधिकस्पष्टतया भारतस्य स्वातन्त्र्यप्राप्त्यर्थं प्रयासरतेषु क्रान्तिकारकेषु दृश्यते। सर्वे सर्वकारीयाः अभिलेखाः, आरक्षकवृत्तानि,

क्रान्तिकारकाणां जीवनचरित्राणि, स्मृतिकथनानि च तेषु स्वामिनः गभीरप्रभावं, तैः तस्मात् प्राप्तां प्रेरणाम् आविष्कुर्वन्ति। तस्य पुस्तकानि नाम तेषां धर्मग्रन्थाः एव जाताः आसन्। यदा कदापि आरक्षकाः कस्यचित् क्रान्तिकारकस्य गृहम् अथवा गौप्यस्थानम् अन्विष्यन्ति स्म तदा तत्र विवेकानन्दस्य पुस्तकानि अवश्यं प्राप्नुवन्ति स्म। केचन एकान्तवादिनः क्रान्तिकारकाः च तं 'राष्ट्रियतायाः दूतः' इति निर्दिशन्ति स्म। अन्ये केचन तं 'भारतस्य रुसो' इति प्रशंसन्ति स्म। अरविन्द घोषः अलिखत् - 'दक्षिणेश्वरस्य भूमौ विस्फोटकचूर्णं निर्मीयते' इति। एतेन स्वातन्त्र्यात् पूर्वतनकाले तदनन्तरकाले च रामकृष्णविवेकानन्दव्यवस्थायाः विचारप्रणाल्याः, क्रियाकलापानां च सर्वव्यापिप्रभावः ज्ञायते। सर्वकारस्य गौप्यवृत्तैः अपि एतत्सर्वं प्रमाणितम् अस्ति।

रामकृष्णमठः साक्षात् अथवा परोक्षरूपेण राजनैतिककार्यैः सह सम्बद्धः न भवेत् इति विवेकानन्दः वाञ्छति स्म। मठस्य संविधाने एषः अंशः योजितः आसीत्। स्वामिनः दिवङ्गमनानन्तरं मिशन्संस्थायाः अधिकारिणः एतस्याः नीतेः कठोरतया पालनम् अकुर्वन्। तैः कदापि मिशन्संस्थायाः केन्द्राणाम् उपयोगं भारतीयक्रान्तिकारकाणाम् आश्रयस्थानरूपेण अथवा कार्यस्य केन्द्ररूपेण कर्तुम् अनुमतिः न दत्ता। तथ्यं तु एतदस्ति यत् क्रान्तिकारकैः सह, तेषां क्रियाकलापैः सह च समीपसम्बन्धस्य कारणेन भगिन्या निवेदितया अपि रामकृष्णव्यवस्थया सह साक्षात् सम्बन्धः त्यक्तः। एवं स्थितौ अपि मिशन्संस्थायाः कार्यैः, तस्याः विचारप्रणाल्या च सर्वकारस्य कृते महती शिरोवेदना जनिता एव। 2-2-1917 इति दिनाङ्कस्य क्रान्तिकारकाणां विषयके सर्वकारस्य गौप्यवृत्ते लिखितम् आसीत् - एकस्य क्षणस्य निमित्तम् अपि एवं सूचयितुं न शक्यते यत् एते जनाः क्रान्तिकारकाः सन्ति यतः रामकृष्णमिशन्संस्थया एते सम्बद्धाः सन्ति तथापि ... एवम् ऊहितुं कारणं विद्यते यत् बहुषु प्रकरणेषु ते मिशन्संस्थायाः जनाः आसन् यतः ते क्रान्तिकारकाः आसन्।' वृत्ते स्पष्टीकरणम् आसीत् - 'विवेकानन्दस्य उपदेशाः स्वयं सर्वकारविरोधिनः, अपायकारिणः च न सन्ति। परं वर्तमानकाले क्रान्तिकारककल्पनानां क्षेत्रे कृतं प्रथमपदनिक्षेपम् इति ते अभिज्ञाताः सन्ति।' विवेकानन्दस्य उपदेशैः सृष्टं रामकृष्णवातावरणं, यच्च रामकृष्णमिशन्संस्थायाः क्रियाकलापैः प्रसृतं भवति स्म तद् सर्वकारीयाधिकारिणाम् आरक्षकव्यवस्थायाः च चिन्ताजनकम् आसीत्। विवेकानन्दस्य उपदेशेभ्यः रामकृष्णमिशन्संस्थया या प्रतिष्ठा दीयते स्म तथा च या समाजसेवा क्रियते स्म ताभ्यां ते अत्यधिकचिन्ताग्रस्ताः आसन्। रामकृष्णमिशन् इत्यस्य 'वैचारिकाधिष्ठानयुक्तं विशिष्टसेवायाः आत्मोत्सर्गस्य च यत् वातावरणम्' आसीत् तेन क्रान्तिकारकाः आकृष्टाः भवन्ति स्म। गौप्यवृत्ते लिखितम् आसीत् यत् नूतनानां क्रान्तिकारककार्येषु योजकः जनः क्रान्तिबीजानां वपनात् पूर्वं बुद्धिपुरस्सरं रामकृष्णवातावरणं सृजति। यत्र वातावरणं पूर्वमेव विद्यते तत्र कार्यं सरलतरं भवति।' विवेकानन्दस्य जीवनेन उपदेशैः च सृष्टस्य वातावरणस्य चिरकालस्थायी



परिणामः आसीत् निर्भयराष्ट्रवादितायाः विकासस्य वेगवृद्धिः तथा च सर्वाङ्गीणोत्थानस्य प्रगतेः च उत्कटेच्छा।

न केवले बङ्गप्रान्ते अपि तु समग्रदेशे क्रान्तिकारकाः विवेकानन्देन सुगभीरं प्रभाविताः, प्रेरिताः च। भारतस्य उत्तरपश्चिमदिग्भागे विद्यमानाः, महाराष्ट्रे मद्रासे च विद्यमानाः रणोद्यताः राष्ट्राभिमानिनः, क्रान्तिकारकाः च तस्मात् प्रेरणां प्राप्नुवन्। तिरुमलाचार्यः, चिदम्बरम् इत्येतौ मद्रासस्य क्रान्तिकारकौ तस्य परमप्रशंसकौ आस्ताम्। किन्तु स्वामिनः प्रेरणा ये भारतस्य स्वातन्त्र्यान्दोलनेन सह साक्षात् सम्बद्धाः आसन् तेषां वर्तुलम् अतिक्रम्य सुदूरं गता। येषां लेखनैः राष्ट्राभिमानस्य बीजानां वपनेन जीवनस्य सर्वक्षेत्रेषु भूमिः राष्ट्रजागरणाय ऊर्वरीकृता ते महान्तः चिन्तकाः लेखकाः चापि तस्य प्रभावाधीनाः अभवन्। महान् तमिल् कविः सुब्रह्मण्य- भारती, सुप्रसिद्धः हिन्दीलेखकः प्रेमचन्दः, सुख्यातः हिन्दीभाषिकविः सूर्यकान्त- त्रिपाठी (निराला) इत्येते तेषु आसन्। भारतीयवाङ्मयाय राष्ट्रवादितायै च भारतीमहोदयस्य स्वस्य प्रदानम् अगणितम् आसीत्। याः एकान्तवादिकल्पनानां क्रान्तिकारककल्पनानां प्रसारं कुर्वन्ति स्म तादृशीनां कासाञ्चन पत्रिकाणां सः सम्पादकः अपि आसीत्। एतेषु पत्रेषु एतासु पत्रिकासु च स्वामिनः कथनानां महता प्रमाणेन उल्लेखः भवति स्म तथा च 'नवान्दोलनस्य वास्तविकः पिता' इति तस्य वर्णनं भवति स्म। भारतीमहोदयः भगिन्याः निवेदितायाः अपि परमप्रशंसकः आसीत् तथा च स्वीयानि कतिपयपुस्तकानि तस्यै समार्पयत्। एतद् स्पष्टमेव यत् भगिनीतः एव विवेकानन्दसम्बद्धा प्रेरणा अस्रवत् इति। प्रेमचन्दस्य दृष्ट्या प्राचीनपरम्पराणाम् आग्रहः नाम अभिशापः कश्चन आसीत्। सः समाजस्य परिष्कारस्य विषये उत्साहवान् आसीत् तथा च स्वातन्त्र्यान्दोलनस्य सशक्तसमर्थकः आसीत्। समाजवादे, क्रान्तिकारककल्पनासु, गान्धीवादे च तस्य महती रुचिः आसीत्। बङ्गसंस्कृतेः परमप्रशंसकः आसीत् सः। तस्य प्रेरणास्रोतः विवेकानन्दः आसीत्। युवलेखकरूपेण सः स्वामिनः लघुगात्रकं जीवनचरित्रमेकम् अलिखत्। विवेकानन्दस्य जीवनविषये पठितुं सः अन्येषाम् अनुरोधं करोति स्म यतः स्वामी एव भारतस्य पुनरुज्जीवनस्य अग्रदूतः आसीत्, जगति अध्यात्मजागरणम् आरब्धवान् आसीत् च। सूर्यकान्तत्रिपाठी यः तस्य 'निराला' इति काल्पनिकनाम्ना अधिकख्यातः आसीत् सः रामकृष्णविवेकानन्दयोः कल्पनानां हिन्दीवाङ्मये शक्तिमत्तमः प्रचारकः आसीत्। तस्य जीवनस्य आरम्भभागं सः बङ्गाले अयापयत् अपि च बङ्गभाषां सम्यक् जानाति स्म। विवेकानन्दस्य कैश्चित् गुरुबन्धुभिः सह तस्य समीपसम्पर्कः आसीत्। कञ्चन कालं यावत् सः रामकृष्णमिशन्संस्थायाः हिन्दीपत्रिकायाः कस्याश्चित् सम्पादनमपि अकरोत्। रामकृष्णविवेकानन्दयोः विषये तेन विपुललेखनं कृतं, स्वामिनः कासाञ्चन कवितानां हिन्दीभाषया अनुवादः च कृतः। तेन उक्तं यत् समाजस्य विषये, सामाजिकोत्पीडनस्य, अन्यायस्य च विषये, स्वातन्त्र्यप्रीतेः विषये च तस्य सबलाभिप्रायेषु विवेकानन्दस्य

ध्वनिः अभिव्यक्तिं प्राप्नोत् इति। निरालामहोदयः स्वीयम् एकम् उपन्यासं स्वामिने समार्पयत्। अन्ये अपि बहवः प्रसिद्धाः भारतीयभाषालेखकाः विवेकानन्दात् प्रेरणां प्राप्नुवन्।

भारतीयानां कृते विशेषतया तत्कालीनयुवजनानां कृते ये स्वदेशस्य स्वातन्त्र्यार्थं, जीवनस्य सर्वक्षेत्रेषु विद्यमानयोः अन्यायवञ्चनयोः विरुद्धं च युध्यमानाः आसन् तेषां कृते विवेकानन्दस्य अतिविशिष्टः कश्चन सन्देशः आसीत्। दंशकोपहासेन गभीरदुःखेन च सः अकथयत् - 'भारते अस्माकं समीपे ये अंशाः केवलाः सन्ति ते सन्ति - अन्योन्यस्य विषये गभीरमूला असूया, तीव्रा असूया च, येन केन प्रकारेण दुर्बलानां नाशस्य विकृता इच्छा, शुनकस्य इव सामर्थ्यवतः पादलेहनं च इति।' एतादृशान् दोषान् अपनीय भारतस्य पुनर्घटनं काङ्क्षति स्म सः। एतया दृष्ट्या एतेन अवगमनेन च विवेकानन्दः उत्कटभावेन अग्रे लिखितान् अंशान् प्रार्थयत् - प्रयोजनदाढ्र्यम्, उद्यमशौर्यं, मानसिकशक्तिः, जनानां कष्टविषये गभीरचिन्ता, निःस्वार्थभावेन सेवायै समर्पणम्।



# उपसंहारः

वयसः नवत्रिंशत्तमे वर्षे दिवङ्गतस्य स्वामिनः विवेकानन्दस्य जीवनम् अत्यल्पकालिकम् आसीत्। भारतस्य सर्वाङ्गीणपुनरुत्थानाय सः अविरतकार्येण आत्मानम् अक्षरशः अदहत्। समकाले तस्य कश्चन स्वप्नः अपि आसीत् - नूतना काचित् जागतिकव्यवस्था यस्यां सर्वे देशाः, विविधाः जनाः, विविधसंस्कृतयः च परस्परं संवदन्त्यः शान्त्या ऐक्यसहितं च वसेयुः। वञ्चनप्रभुतयोः स्थाने समानावसराः सहकारः च भविष्यतः। प्रायः सः काल्पनिकः आदर्शः कश्चन आसीत्। परं सर्वेषां महामनसां, पथिप्रदर्शकानां जनानां च एतादृशाः स्वप्नाः भवन्ति। एतस्य स्वप्नस्य यथार्थीकरणम् अशक्यप्रायम् अस्ति इति विवेकानन्दः न जानाति स्म इति न। एवं स्थितौ अपि वेदान्तविदः रूपेण सः विश्वसिति स्म यत् अन्तिमसाफल्यस्य पारितोषिकस्य च चिन्तां विना मनुष्येण एतादृशानां लक्ष्याणां साधनाय प्रयत्नरता भवितव्यमेव। संन्यासिनः अपि तस्य नवभारतस्य विषये बहुमुखकल्पनाः आसन्। भारतस्य पुनर्घटनाय नवीनमार्गान् चिन्तयित्वा सः तान् क्रियान्वितान् अकरोत्। परं व्यक्तिगतरूपेण तैः मार्गैः गन्तुं जनान् नेतुं च तस्य समीपे अत्यल्पः समयः आसीत्। कतिपयकल्पनानां पूर्णविकासः न शक्यः अभवत्। तथा करणात् पूर्वमेव सः दिवङ्गतः। परं तस्य देशस्य वंशजेभ्यः तस्य महती आशा आसीत्।

आधुनिककाले भारतस्य स्वाभिज्ञानस्य अन्वेषणकार्ये विवेकानन्दस्य जीवनम् इत्येषः सुमहत्त्वपूर्णः एकः घट्टः आसीत्। एकमात्रं काचित् घटना एतस्य उदाहरणम् अस्ति। 1835 तमे वर्षे थॉमस् बॅबिंग्टन् मेकॉले असूचयत् यत् ईस्ट इण्डिया संस्थायाः सर्वकारस्य नीत्यनुसारं भारते आङ्ग्लशिक्षणम् एव आरब्धव्यं, तस्य साहाय्यं च करणीयम् इति। पौरस्त्यज्ञानस्य वाङ्मयस्य च कृते तस्य मनसि आदरभावस्य लेशमात्रमपि नासीत्। अवहेलनायाः भावेन सः अलिखत् - 'कस्यचित् उत्तमस्य युरोपीयग्रन्थालयस्य एकस्यां निधानिकायां स्थापितानां पुस्तकानां महत्त्वतुल्यं महत्त्वम् अस्ति भारतस्य अरेबियायाः च समग्रवाङ्मयस्य।' सः आशास्ते स्म यत् तादृशः समयः आगच्छेत् यदा आङ्ग्लशिक्षणस्य परिणामरूपेण मनुष्याणां कश्चन वर्गः संसृष्टः स्यात् यः यान् लक्षशः

जनान् वयं शिष्मः तेषु अस्मासु च अनुवादकस्य कार्यं कुर्यात्, जनानां कश्चन गणः यः रक्तेन वर्णेन च भारतीयः स्यात्, परन्तु यस्य रुचिः, अभिप्रायाः, नीतयः, बुद्धिः च आङ्ग्लेयाः स्युः इति।' एषः हर्षस्य विषयः यत् मेकॉले इत्यस्य एतया अपेक्षया पूर्णया भवितव्यं नासीत्। तस्य तस्याम् इच्छायाम् अन्तिमकीलस्थापकेषु प्रमुखः जनः आसीत् स्वामी विवेकानन्दः। सामान्यतः शतकार्धस्य कालात्ययात् परं 1893 तमे वर्षे हार्वर्ड-विश्वविद्यालयस्य प्राध्यापकं जॉन हेन्री राईटवर्यं स्वामी विवेकानन्दः धर्मसंसदः आयोजकसमितेः अध्यक्षाय दातुं परिचयपत्रं प्रार्थयत् तदा सः साश्चर्यम् अवदत् – हे स्वामिन्! भवान् विश्वासपत्रं प्रष्टव्यः इत्युक्ते सूर्यः तस्य प्रकाशनस्य अधिकारः प्रष्टव्यः इव अस्ति!' ततः परं सः अध्यक्षार्थं लिखिते पत्रे उल्लेखम् अकरोत् - 'सर्वप्राध्यापकानां ज्ञानस्य सङ्कलनं कृतं चेदपि एतस्य पुरुषस्य ज्ञानं तदपेक्षया अधिकम् अस्ति।' संसदि, ततः परम् अमेरिकायां युरोपखण्डे च स्वामिना यत्कार्यं कृतं तेन प्राध्यापकस्य राईट्वर्यस्य कथनं न केवलम् उचितमिति प्रमाणितम् अपि तु तेन भारतीयानां स्वाभिज्ञानान्वेषणस्य आत्मविश्वासान्वेषणस्य च साहाय्यं कृतम्। भारतीयानां स्वस्य पुनः अन्वेषणस्य प्रक्रिया नूतनं महत्त्वपूर्णं घट्टं प्राप्नोत्।

स्वदेशप्रीतेः, स्वदेशबन्धुप्रीतेः च सुदीप्तिमत् उदाहरणम् आसीत् विवेकानन्दः। धर्मसंसदि युगपरिवर्तनकारिणः साफल्यात् परं सः बालवत् अरोदीत् यतः ततः परं तस्य 'संन्यासिनः एकाकित्वस्य स्वातन्त्र्यं' नष्टं भवेदिति सः अचिन्तयत् यच्च स्वातन्त्र्यं सः सवात्सल्यं साकल्येन जनेभ्यः समर्पयितुम् इच्छति स्म। स्वजनैः सह भवितुम् इच्छति स्म सः। निरन्तरं प्रसिद्धिकेन्द्रभूतत्वं तस्य अरुच्यै आसीत्। सः अकथयत् - 'अहं जनानाम् अस्मि। अहं जनानाम् उपदेशकः अस्मि। अहं सामान्यजनानाम् आराधकः अस्मि, मम हृदयं मां तत्रैव आह्वयति।' अमेरिकादेशीये गृहे सुखदां शय्यां परित्यज्य भारते कष्टे विद्यमानान् लक्षशः जनान् चिन्तयन् सः भूमौ निद्रारहिताः रात्रीः यापयति स्म। यस्मिन् केऽपि स्तराः नासन् तस्य भारतस्य सनातनधर्मस्य विषये वदन् सः द्रष्टुं शक्नोति स्म यत् 'ईश्वरः रुग्णस्य, उन्मत्तस्य, कुष्ठरुग्णस्य, पापिनः च रूपेण आगच्छति' इति। सर्वत्र सर्वेषु ईश्वरः एव अस्ति। सः स्नेहरूपः अस्ति। विवेकानन्दस्य कृते स्नेहः एव ईश्वरः आसीत्। अतः यत् वैश्विकमानवतायाः कृते समीचीनं तदेव अहम् उपदिशामि इति सः वक्तुं शक्नोति स्म।

अहं मम ईश्वरं, मम धर्मं, मम देशं च प्रीणामि इति स्वामी अकथयत्। परं जगतः विषये तस्य प्रीतिः किञ्चिदपि अनृज्वी अतीव्रा वा नासीत्। 1896 तमे वर्षे भारतं प्रति प्रस्थानात् पूर्वतने सायङ्काले तस्य ब्रिटिशमित्रं किञ्चन तम् अपृच्छत् - 'सुखदस्य, दीप्तिमतः, शक्तिमतः च पश्चिमदिग्भागस्य चतुर्णां वर्षाणाम् अनुभवात् परम् अधुना भवते भवतः मातृभूमिः कथं रोचते?' स्वामी उदतरत् - 'अत्र आगमनात् पूर्वं भारतम् अहम् प्रीणामि स्म। अधुना भारतस्य धूलिः अपि मम कृते पवित्रा अस्ति,



वायुः अपि पवित्रः अस्ति, अधुना सः पवित्रदेशः अस्ति, धर्मयात्रायाः स्थानम् अस्ति, तीर्थम् अस्ति! ' एवं सत्यपि यदा प्रिन्झ रिजेन्ट ल्युईट्पोल्ड इति नौका यया सः प्रतिगच्छन् आसीत् सा सेद पत्तनसमीपम् आगता तदा सः कस्मिंश्चित् पत्रे अलिखत् - सुएझतः एशियाखण्डः आरभते। पुनरेकवारम् एशिया। किम् अस्मि अहम्? एशियाखण्डीयः युरोपखण्डीयः उत अमेरिकाखण्डीयः? अहम् आत्मनि व्यक्तित्वानां कुतूहलमयं सम्मिश्रणं किञ्चन अनुभवामि।' सत्यं तु एवम् आसीत् यत् युगपत् तस्य प्रतिकणं भारतीयम् आसीत्, सः विश्वमानवः चासीत्। न केवले भारते अपि तु समग्रविश्वे 'विविधतायाम् ऐक्यस्य' अभिव्यक्तौ दृढविश्वासवान् सः साग्रहम् अकथयत् - 'प्रत्येकं देशः शारीरकदृष्ट्या मानसिकदृष्ट्या च विशिष्टप्रकारकः भवति। एकैकोऽपि निरन्तरम् अन्येभ्यः कल्पनाः प्राप्य ताः स्वस्य प्रकारानुसारं स्वस्य राष्ट्रजीवनानुसारं परिवर्तयितुं प्रयतते।' प्रकाराणां नाशस्य समयः इतोऽपि न सन्निहितः इति अपायसूचना विवेकानन्देन कृता आसीत्। तथा करणेन कोलाहलः सङ्घर्षः अशान्तिः चैव उत्पद्येत। सः उत्कटभावेन प्रार्थयत् - 'सर्वाः उत्तमशक्तीः सम्मेलयन्तु। किं फलकं स्वीकृत्य भवन्तः चलन्ति इत्यस्य चिन्तां मा कुर्वन्तु। भवतां कः वर्णः अस्ति हरितः, नीलः रक्तः वा इति चिन्ताम् अकृत्वा सर्वेषां वर्णानां सम्मिश्रणेन तं तीव्रप्रभामयं श्वेतवर्णं, प्रीतेः वर्णं सृजन्तु।'

प्रख्यातः इतिहासलेखकः आर्नोल्ड जे टॉय्नबी अलिखत् यत् आधुनिकतन्त्रज्ञानेन कौशलैः च अन्तरस्य समूलनाशः कृतः अस्ति किन्तु समकाले एव तैः जनेभ्यः विनाशस्य अतिभयङ्करा शक्तिः अपि प्रदत्ता अस्ति। दौर्भाग्येण ते अन्योन्यं स्नेहितुं न ज्ञातवन्तः। मानववंशस्य जीवनाय जगता भारतीयजीवनपद्धतिः अनुसर्तव्या इत्येतद् अवश्यं भवेदेव इति टॉय्नबी अन्वभवत्। एतस्याः भारतीयपद्धतेः अथवा श्रद्धायाः मूलम् उपनिषत्सु, बुद्धोपदेशेषु, भक्त्यान्दोलनस्य सत्पुरुषेषु, अन्येषु द्रष्टृषु ऋषिषु च अस्ति। रामकृष्णविवेकानन्दयोः जीवनाभ्याम् उपदेशैः च आधुनिकभारते पूर्वोक्तैः मूलभूतांशैः नूतनाः आयामाः, नूतना प्रभा, नूतना शक्तिः च प्राप्ता।

# विवेकानन्दस्य लेखनेभ्यः उद्धृतांशाः

धर्मसंसदि (शिकागो) कृतम् उद्बोधनम्

स्वागतस्य प्रतिस्पन्दः

11-9-1893

अमेरिकादेशीयाः भगिन्यः भ्रातरः च,

भवद्भिः अस्मभ्यं यत् सोत्साहं सौहार्दमयं च स्वागतं कथितं तस्य प्रतिस्पन्दप्रकटनाय उत्तिष्ठतः मम हृदयम् अवर्णनीयेन हर्षेण पूर्णं भवति। जगतः प्राचीनतमसंन्यासिव्यवस्थायाः परतया अहं भवद्भ्यः साधुवादान् समर्पयामि; धर्माणां मातुः परतया अहं भवद्भ्यः साधुवादान् समर्पयामि; अपि च सर्वजातीनां सर्वविभागानां लक्षशः हिन्दूनां परतया अहं भवद्भ्यः साधुवादान् समर्पयामि।

सहनायाः कल्पना अस्मद्देशीया अस्ति इति प्रतिष्ठायां सुदूरदेशेभ्यः आगतानाम् एतेषाम् अधिकारः अस्ति इति पौरस्त्यप्रतिनिधीनाम् उल्लेखम् अस्यां वेदिकायां विद्यमानाः ये केचन वक्तारः अकुर्वन् तेभ्यः अपि अहं साधुवादान् समर्पयामि। यः धर्मः विश्वं सहनां वैश्विकाङ्गीकारं च अशिक्षयत् तद्धर्मीयः अहम् अस्मि इति अभिमानः अस्ति मम। वयं वैश्विकसहनामात्रे न विश्वसिमः अपि तु वयं सर्वाणि मतानि सत्यानि इति अङ्गीकुर्मः। अहं तद्देशीयः अस्मि इति मम अभिमानः अस्ति यः च देशः पृथिव्याः सर्वमतानां सर्वदेशानां च यातनाग्रस्तेभ्यः ततः निर्वासितेभ्यः च जनेभ्यः आश्रयम् अयच्छत्।

एतद् भवतः कथयितुम् अहम् अभिमानम् अनुभवामि यत् अस्माकं वक्षसि अस्माभिः इझ्रेलदेशीयानां विशुद्धतमः अवशेषः सङ्गृहीतः अस्ति ये च इझ्रेलदेशीयाः यस्मिन् वर्षे तेषां पवित्रं मन्दिरं रोमनदेशीयानाम् निष्ठुरोपद्रवैः नाशितं तस्मिन्नेव वर्षे दक्षिणभारतं प्राप्य अस्माकं शरणम् आगताः। अहं तद्धर्मीयः अस्मि इति अभिमानम् अनुभवामि यः महतः झोरोस्ट्रियदेशस्य अवशेषेभ्यः आश्रयम् अयच्छत् तान् संवर्धयन् च अस्ति। हे भ्रातरः, अहं भवतां निमित्तं कस्यचित् स्तोत्रस्य कतिपयपङ्क्तीः उद्धरामि



याः च अहं मम अतिबाल्यकालाद् आरभ्य पुनः पुनः उक्तवान् अस्मि, याः च प्रतिदिनं लक्षशः मनुष्यैः पुनः पुनः उच्यन्ते -

'विविधस्थानेभ्यः प्रभवतां विविधनिर्झराणां जलं यथा समुद्रे सम्मिलति तथैव हे भगवन्, ऋजूनाम् अनृजूनां वा विविधस्वभावानां कारणेन मनुष्याः यान् विविधान् मार्गान् अनुसरन्ति ते सर्वेऽपि तान् भवद्दिशि एव नयन्ति।'

वर्तमानसम्मेलनं, यत् अद्यावधि सञ्जातेषु उत्कृष्टतमं सम्मेलनम् अस्ति, तद् गीतायां प्रतिपादितम् अद्भुतसिद्धान्तं प्रमाणीकरोति - येन केन आकारेण यः कश्चन माम् अभिमुखम् आगच्छति तम् अहं प्राप्नोमि। सर्वेऽपि मनुष्याः तेषु एव मार्गेषु क्रममाणाः सन्ति ये च मार्गाः अन्ते मां प्रति एव नयन्ति।' एषा सुन्दरी वसुधा संप्रदायवादेन, स्वमतासक्त्या, तस्याः भयङ्करेण वंशजेन उन्मत्ततुल्येन स्वमताग्रहेण च स्वाधीनीकृता अस्ति। तैः वसुधा हिंसया प्रपूर्णा अस्ति, सा पुनः पुनः मानवरक्तेन स्नापिता अस्ति, सभ्यता विनाशिता अस्ति, अनेके देशाः हताशतां प्रति प्रेषिताः सन्ति च। यदि एते भयङ्कराः राक्षसाः नाभविष्यन्, तर्हि मानवसमाजः अद्य यस्यां स्थितौ अस्ति तदपेक्षया अनेकगुणिताधिकप्रगततरः अभविष्यत्। परम् अधुना तेषां कालः आगतः, अपि च अहं सोत्साहम् आशासे यत् अद्य प्रातः एतस्य सम्मेलनस्य सम्मानार्थं यः घण्टानादः अभवत् सः समग्रस्वमतहठस्य, खड्गेन लेखन्या वा क्रियमाणानां समग्रयातनानां, समानलक्ष्यं प्रति गच्छद्भिः मनुष्यैः अन्योन्यस्य विषये अननुभूतभावनानां च मृत्युघण्टानादः आसीदिति।

# अन्तिमसत्रे कृतम् उद्बोधनम्

27-9-1893

विश्वधर्मसंसद् इत्येतद् अधुना साधितं किञ्चन तथ्यं जातम् अस्ति। ये तां यथार्थं प्रत्यानेतुं परिश्रमं कृतवन्तः तेषां साहाय्यं करुणामयः पिता अकरोत्, तेषां निःस्वार्थतमस्य परिश्रमस्य शिरसि सः यशसः किरीटम् अस्थापयत् च।

येषां महात्मनाम् उदारहृदयैः सत्यस्नेहेन च प्रथमम् एषः अद्भुतस्वप्नः दृष्टः अनन्तरं साकारीकृतः च तेभ्यः अहं साधुवादान् समर्पयामि। एषः प्रबुद्धः श्रोतृवृन्दः यः मम विषये अविरतकरुणावान् आसीत्, मतसङ्घर्षस्य अपनयनाय अभिव्यक्तम् एकैकमपि विचारं प्राशंसत् च तस्मै अहं साधुवादान् समर्पयामि। एतस्मिन् सङ्गीते कतिपयाः कर्णकर्कशाः स्वराः अपि तदा तदा श्रुताः। तेभ्यः अहं विशिष्टान् साधुवादान् समर्पयामि यतः तेषां विशिष्टविरोधेन तैः आहत्य कार्यक्रमस्य माधुर्यं वर्धितम् एव।

मतैक्यस्य समानभूमेः विषये भृशं कथितम् अस्ति। मम स्वकीयसिद्धान्तस्य विषये अहम् अधुना एव न उपक्रमे। परम् एतद् ऐक्यं कस्यचित् एकस्य मतस्य जयेन अन्येषां विनाशेन च सेत्स्यति इति यदि अत्रत्यः कश्चन आशास्ते तर्हि तम् अहं वदामि, 'हे भ्रातः, त्वदीया आशा असाध्या।' क्रैस्तमतीयः हिन्दुः भवेत् इति अहम् इच्छामि किम्? शान्तं पापम्! हिन्दुः अथवा बौद्धः क्रैस्तमतीयः भवेत् इत्यहम् इच्छामि किम्? शान्तं पापम्!

भूमौ बीजम् उप्त्वा तत्परितः मृत्तिकां वायुं जलं च स्थापयन्ति। तर्हि किं बीजं मृत्तिका अथवा वायुः अथवा जलं भवति? न, तद् सस्यरूपं प्राप्नोति। तद् स्वस्य विकासविध्यनुगुणं विकसति, वायुमृत्तिकाजलानि सम्मेलयति, तान् सस्यपदार्थे परिवर्तयति, सस्यरूपेण विकसति च। मतस्य विषये अपि तथैव भवति। क्रैस्तमतीयेन हिन्दुना बौद्धेन वा भवितव्यं नास्ति न वा हिन्दुना अथवा बौद्धेन क्रैस्तमतीयेन भवितव्यम्। परम् एकैकोऽपि अन्यस्य भावम् आत्मसात् कुर्वन् अपि स्वस्य व्यक्तित्वं रक्षेत्, स्वस्य विकासविध्यनुगुणं विकसेत् च।



यदि धर्मसंसदा जगत् किमपि प्रदर्शनीयम् अस्ति तर्हि तद् एतद् अस्ति - पवित्रता, विशुद्धता, दयालुता इत्येताः जगतः कस्याश्चित् क्रैस्तमतसंस्थायाः अनन्यसाधारणी सम्पत्तिः नास्ति, अपि तु एकैकया अपि व्यवस्थया श्रेष्ठतमचरित्रवतां पुरुषाणां, श्रेष्ठतमचरित्रवतीनां महिलानां च निर्माणं कृतम् अस्ति। एतादृशेषु प्रमाणेषु सत्सु अपि यदि कश्चन स्वस्यैव मतस्य जीवनविषये, अन्येषां विनाशस्य च विषये स्वप्नं पश्यति तर्हि अहं तस्य विषये हृदयतलतः करुणाम् अनुभूय तं निर्दिष्टुम् इच्छामि यत् विरोधं सोढ्वा अपि सर्वस्यापि मतस्य ध्वजे अचिरादेव लिखितं भविष्यति - 'साहाय्यं क्रियतां युद्धं न,' 'आत्मसात्करणं स्यात्, न विनाशनम्,' 'चित्तैक्यं शान्तिः च स्यात्, न वैमत्यम्।'

# राजयोगः

इतिहासस्य उदयकालादारभ्य बहवः लोकोत्तरघटनाः मनुष्येषु घटिताः इति अङ्कनं कृतम् अस्ति। एतादृशीनां घटनानां तथ्यं प्रमाणीकर्तुम् अपेक्षितानां साक्षिणाम् आधुनिककाले, तत्रापि आधुनिकविज्ञानस्य पूर्णप्रकाशे जीवत्सु समाजेषु अपि न्यूनता नास्ति। यतः एतादृशानां प्रमाणानां महान् भागः अज्ञानिभ्यः, मूढविश्वासवद्भ्यः वञ्चकेभ्यः च जनेभ्यः आगच्छति अतः अविश्वासार्हः भवति। बहुषु सन्दर्भेषु तथाकथिताः अद्भुतघटनाः अनुकरणमात्रं भवन्ति। परं ताः किम् अनुकुर्वन्ति? सम्यक् विमर्शं विना कस्यापि विषयस्य परित्यागः इत्येतद् निष्कपटस्य वैज्ञानिकस्य मनसः लक्षणं न। अगभीरज्ञानवन्तः वैज्ञानिकाः यदा विविधाः लोकोत्तरमानसिकप्रक्रियाः स्पष्टीकर्तुं न शक्नुवन्ति तदा तासाम् अस्तित्वमेव निराकर्तुं प्रयतन्ते ...

सहस्राणि वर्षाणि यावत् एतादृशीनां घटनानाम् अध्ययनं, विमर्शनं, गणीकरणं च जातम् अस्ति। मनुष्याणां सर्वविधधार्मिकक्षमतानां विश्लेषणात् परं प्राप्तः व्यवहार्यः परिणामः अस्ति राजयोगस्य शास्त्रम्। येषां तथ्यानां स्पष्टीकरणं कठिनम् अस्ति तेषाम् अस्तित्वस्य अनङ्गीकरणस्य केषाञ्चन आधुनिकवैज्ञानिकानाम् अक्षम्यां पद्धतिम् अननुसरन् राजयोगः कोमलतया किन्तु असन्दिग्धशब्दैः मूढविश्वासवतः जनान् वदति यत् लोकोत्तरघटनाः, प्रार्थनया प्राप्तानि उत्तराणि, श्रद्धायाः शक्तयः इत्येतानि तथ्यानि सन्ति चेदपि तानि मेघानाम् उपरि विद्यमानेन केनचित् जीवेन अथवा कैश्चित् जीवैः कृतानि इति मूढविश्वासमयेन स्पष्टीकरणेन अनवगम्यानि न भवन्ति। राजयोगः उद्घोषयति यत् मनुष्यजातौ यः अनन्तज्ञानस्य शक्तीनां च समुद्रः अस्ति ततः निर्गच्छन्ती काचित् प्रणालीमात्रम् अस्ति प्रत्येकमपि मनुष्यः। राजयोगः शिक्षयति यत् कामनाः आवश्यकताः च मनुष्ये भवन्ति, यत् तासां पूर्तेः सामर्थ्यमपि मनुष्ये भवति इति। यत्र कुत्रचित् यदा कदाचित् काचित् कामना, काचित् आवश्यकता, काचित् याचना च पूर्णा अभवत् तदा सा आपूर्तिः एतस्मात् अनन्तविभागात् एव अभवत्, न तु कस्माच्चित् अतीन्द्रियात् जीवात् इति। अतीन्द्रियजीवानां कल्पनया मनुष्येषु केनचित् प्रमाणेन



क्रियाशक्तिः जागृयादपि किन्तु तया आध्यात्मिकनाशः अपि आरभेत। तया कल्पनया परावलम्बित्वम् उत्पद्यते, भयम् उत्पद्यते, मूढविश्वासः उत्पद्यते च। योगी कथयति यत् किमपि इन्द्रियातीतं न भवति, परं प्रकृत्यां स्थूलाभिव्यक्तयः सूक्ष्माभिव्यक्तयः च भवन्ति। सूक्ष्माः कारणानि भवन्ति, स्थूलाः च परिणामाः भवन्ति। इन्द्रियाणां द्वारा स्थूलानाम् अवगमनं सारल्येन भवति, न तु सूक्ष्माणाम्। राजयोगस्य अभ्यासेन सूक्ष्मतराणाम् अभिव्यक्तीनां ग्रहणसामर्थ्यं प्राप्तुं शक्यते।

भारतीयदर्शनशास्त्रस्य सर्वप्राचीनशाखानाम् एकमेव लक्ष्यम् अस्ति यच्च अस्ति परिपूर्णतायाः माध्यमेन आत्मनः मुक्तिः इति। योगः एव सा पद्धतिः अस्ति। योगः इति शब्दः महान्तं स्थानं व्याप्नोति, परं सांख्यः वेदान्तः च इति उभे अपि शाखे येन केन प्रकारेण योगमेव निर्दिशन्ति ...

(राजयोगस्य प्रस्तावनातः उद्धृतांशः)

# युरोपखण्डीयस्य प्रवासस्य स्मरणानि

... एतावता त्वया युरोपस्य विषये तत्रत्याः किं खादन्ति, कान् वेशान् धरन्ति, तेषां रीतयः परम्पराः च कीदृश्यः सन्ति इत्यादिकं बहु प्रमाणेन श्रुतम् अतः तद्विषये मम लेखनं नावश्यकम्। परं युरोपस्य सभ्यता, तस्याः मूलं, तस्याः अस्माभिः सह सम्बन्धः, तां वयं कियता प्रमाणेन अभ्यसितुं शक्ष्यामः - इति एतादृशेषु बहुषु विषयेषु भविष्यत्काले वक्तुं मत्सविधे बहवः बिन्दवः भवेयुः। हे भ्रातः, शरीरं जनान् न आद्रियते अतः अन्यस्मिन् कस्मिंश्चित् समये अहं तद्विषये वदिष्यामि। अथवा तस्य कः उपयोगः? सम्भाषणे चर्चासु च कः वा पृथिव्याम् अस्माभिः (विशेषतया बङ्गजनैः) सह स्पर्धितुं शक्नोति? यदि शक्नोषि तर्हि तद् क्रियाभिः प्रदर्शय। तव कार्येण उद्घोषणं भवतु जिह्वा विश्रान्तिं प्राप्नोतु च। परं गच्छता गच्छता कञ्चन विषयं निर्दिशामि तावत् यत् यस्मात् दिनाङ्कात् युरोपस्य निर्धनेषु निम्नस्तरीयेषु वर्गेषु च शिक्षणशक्त्योः प्रवाहः आरब्धः तस्मात् दिनात् एतस्य खण्डस्य प्रगतिः आरब्धा। अनेके कष्टे विद्यमानाः निर्धनाः जनाः यान् तेषां देशाः असारान् इव मत्वा पर्यत्यजन् ते अमेरिकादेशे गृहम् आश्रयं च प्राप्नुवन्ति अपि च एते एव अमेरिकादेशस्य मेरुदण्डायन्ते! धनिकाः, विद्वांसः च त्वां श्रुत्वा अवगत्य प्रशंसन्ति अथवा दूषयन्ति इत्यस्य किञ्चिदपि महत्त्वं नास्ति यतः ते देशस्य आभूषणमात्राणि अलङ्कारमात्राणि सन्ति। लक्षशः निर्धनाः निम्नवर्गीयाः जनाः एव एतस्य जीवनम् अस्ति। अङ्कानाम् ऐश्वर्यस्य निर्धनतायाः वा महत्त्वं नास्ति, परं येषा विचारवाणीक्रियासु ऐक्यम् अस्ति तादृशाः अङ्गुलिगणनीयाः अपि जनाः जगत् परिवर्तयितुं शक्नुवन्ति इति दृढविश्वासं कदापि न विस्मर। यावान् अधिकः विरोधः तावद् वरतरमेव। किम् अवरोधाभावे नद्याः वेगः वर्धते? कश्चन विषयः यावान् नवीनतरः समीचीनतरः च भवति तावान् अधिकतरः विरोधः तस्य आरम्भकाले तस्य भवति। विरोधः एव सः अंशः अस्ति यः भाविसाफल्यं सूचयति। यत्र विरोधः नास्ति तत्र साफल्यमपि न भवति ...

कति गिरीन्, नदीः, पर्वतान्, निर्झरान्, उपत्यकाः, कन्दराः च, कति निरन्तरं हिमाच्छन्नानि मेघमालाभिः अलङ्कृतानि शिखराणि, कति च झञ्झावातमयान्, गर्जतः, फेनमयान् च समुद्रान् अहं न दृष्टवान्, तेषां विषये न श्रुतवान्, तान् न क्रान्तवान् च! परं भूमिस्तरीये अट्टस्थे कस्मिंश्चित् अन्धकारमये प्रकोष्ठे यत्र दिने अपि दीपज्वालनस्य आवश्यकता भवति, यस्य च भित्तयः चर्विततताम्बूलस्य रसेन चित्रिताः सन्ति, यस्मिन् च मूषकाणां दिवान्धिकानां गोधिकानां च विविधशब्दैः कोलाहलः भवति, यः च मुख्यमार्गस्य पार्श्वस्थः प्रकोष्ठः प्राचीनानाम् अश्वशकटानां, ट्रामशकटानां शब्देन ध्वनितः भवति, धूलिपुञ्जैः अन्धकारमयः भवति च - एतादृशे काव्यमये वातावरणे अव्यस्थिते पर्यङ्कावन्धे कस्मिंश्चित् उपविश्य सः कविः श्यामाचरणः सर्वसुपरिचितया धूमनलिकया धूमं पिबन् हिमालयस्य, समुद्राणां, शाद्वलानां, मरुभूमिनाम्, अन्येषां च वास्तविकानि इव यथार्थानि चित्राणि यद् अलिखत् तद् बङ्गजनानां कीर्त्यै जातं ... किन्तु तेषाम् अनुकरणस्य अस्माकं प्रयत्नः व्यर्थः एव! श्यामाचरणः तस्य बाल्ये स्थानपरिवर्तनाय प्रदेशस्य मध्यभागम् अगच्छत् यत्रत्यं जलं पचनसंस्थायाः तावत् प्रेरकम् अस्ति यत् सम्यक् गरिष्ठभोजनात् परम् एकचषकमितं जलं पिबति चेत् तत्सर्वं सम्यक् जीर्णं भवति, पुनः बुभुक्षानुभवः भवति च इति। अत्रैव श्यामाचरणस्य सहजोपलब्धया धीशक्त्या प्रकृत्याः उदात्तानां सुन्दराणां च मुखानाम् ईषद्दर्शनं कृतम्। परम् अत्र समस्या एका एव अस्ति - ते वदन्ति श्यामाचरणः बरद्वानं (बङ्गाले) यावदेव प्रवासम् अकरोत् ततः अग्रे न इति!

(परिव्राजकात् अनूदितः लेखांशः)

# स्वदेशमन्त्रः

हे भारत! किम् एतेन अन्येषां प्रतिध्वनिना, अन्येषां निकृष्टेन अनुकरणेन, एतेन परावलम्बनेन, एतेन दासतुल्येन दौर्बल्येन, एतेन अधमेन गर्हणीयेन क्रौर्येण च त्वं सभ्यतायाः श्रेष्ठतायाः शिखरम् आरोढुम् इच्छसि? यत् स्वातन्त्र्यं शूरैः पराक्रमिभिः चैव काङ्क्ष्यते, तत् किं त्वं तव निन्दनीयया भीरुतया प्राप्तुम् इच्छसि? हे भारत! नारीत्वस्य तव आदर्शः सीता, सावित्रि, दमयन्ती च अस्ति इति मा विस्मर। मा विस्मर यत् यं भगवन्तं त्वं पूजयसि सः विरक्तानां विरक्तः, सर्वसङ्गपरित्यागी शङ्करः, उमास्वामी अस्ति! मा विस्मर! मा विस्मर यत् तव विवाहः, तव सम्पत्तिः, तव जीवनं च इन्द्रियसुखाणां निमित्तम् अथवा तव वैयक्तिकसुखाय नास्ति। मा विस्मर यत् मातुः यज्ञवेदिकायाम् आहुतिरूपेण तव जन्म अभवत्। मा विस्मर यत् तव समाजव्यवस्था नाम अनन्तवैश्विकमातृत्वभावस्य प्रतिफलनमात्रम् अस्ति। मा विस्मर यत् निम्नवर्गीयाः, अज्ञानिनः, निर्धनाः, अशिक्षिताः, चर्मकाराः, खलप्वः च तव मांसं रक्तं च अस्ति, तव बन्धवः सन्ति च। हे शूर! धैर्यवान् भव, विक्रमं धर, अभिमानी भव यत् त्वं भारतीयः असि अपि च साभिमानम् उद्घोषय, 'अहं भारतीयः अस्मि, निर्धनः अकिञ्चनः च भारतीयः मम भ्राता अस्ति; ब्राह्मणः अन्त्यजः च भारतीयः मम भ्राता अस्ति।' त्वम् अपि कट्यां जीर्णवस्त्रमात्रं बद्ध्वा उच्चतमेन ध्वनिना उद्घोषय यत् - भारतीयः मम भ्राता अस्ति, भारतीयः मम जीवनम् अस्ति, भारतीयाः देव्यः देवाः च मम देवाः सन्ति। भारतस्य समाजः मम शैशवस्य प्रेङ्खा अस्ति, मम यौवनस्य सुखोद्यानम् अस्ति, मम वार्धक्यस्य पवित्रस्वर्गः वाराणसी चास्ति। वद भ्रातः, यत् 'भारतस्य मृत्तिका मम उन्नततमः स्वर्गः अस्ति, भारतस्य हितं मम हितम् अस्ति' इति। पुनः पुनः अहर्निशं च वद यत् - हे उमापते! हे विश्वमातः! मयि पौरुषं वितर! हे शक्तेः मातः, मम दौर्बल्यानि अपनीय मम अपौरुषम् अपनीय मां पुरुषं कुरु!

(वर्तमानभारततः अनूदितम्)



# पूर्वा पश्चिमा च

(आहारः पाकः च)

अधुना पाश्चात्यपाककलायाः विषये किञ्चित् शृणु। अस्माकं पाकप्रक्रिया अन्यदेशानाम् अपेक्षया शुद्धतरा भवति परम् अस्मासु आङ्ग्लानाम् उत्पीठिकायाः परिपूर्णनियतता, पद्धतिः, स्वच्छता च न भवति। प्रतिदिनम् अस्माकं पाचकः पाकशालाप्रवेशात् पूर्वं प्रथमं स्नाति वस्त्राणि परिवर्तयति च। सः व्यवस्थिततया पात्राणि, चुल्लिं च जलेन मृत्तिकया च स्वच्छीकरोति अपि च यदि सः स्वीयं मुखं, नासिकाम्, अन्यशरीरावयवं वा स्पृशति तर्हि अन्नस्य पुनः स्पर्शात् पूर्वं हस्तौ क्षालयति। पाश्चात्यपाचकः तु कदाचिदेव स्नाति, अपि च यत् सः पचन् अस्ति तस्मिन् चमसं निमज्य तस्य रुचिं दृष्ट्वा तमेव चमसं पुनरपि पात्रे निमज्जनात् पूर्वं न किञ्चिदपि चिन्तयति। करवस्त्रं निष्कास्य सः तेन शक्त्या नासिकां स्वच्छीकरोति अपि च तेनैव हस्तेन सः पुनः पिष्टं मर्दयति। बहिर्भागात् आगत्य हस्तक्षालनस्य चिन्तनमपि अकृत्वा सः सपदि पाकारम्भं करोति। परं तदा एव तस्य समीपे हिमशुभ्राणि वस्त्राणि शिरस्त्रं च भवति। प्रायः सः तस्मिन् जलसंसिक्ते पिष्टे नृत्यति अपि यतः तदा सः तस्य समग्रशरीरस्य भारेण तद् सम्यक् मर्दयितुं शक्नोति, तस्य भ्रुवस्थः स्वेदः तस्मिन् पिष्टे सम्मिलितः भवति चेदपि चिन्ता न कार्या! (सौभाग्येन एतेषु दिनेषु एतत् कार्यं कर्तुम् अधिकतया यन्त्राणाम् उपयोगः भवति) एतद् सर्वम् अपवित्रीकरणं समाप्तं भूत्वा यदा ब्रेड् सज्जं भवति तदा कस्याञ्चित् पोर्सलेनस्थालिकायां तद् संस्थाप्य हिमश्वेतेन वस्त्रेण तद् आच्छाद्य कश्चन कलङ्कहीनवेशधारी धृतश्वेतहस्तकोषः सेवकः तद् नीत्वा स्वच्छवस्त्रेण आच्छन्नायाम् उत्पीठिकायां स्थापयति। अत्र हस्तकोषौ स्मर - अनावृताभिः अङ्गुलिभिः सः यत् किञ्चित् स्पृशति चेत्!

एतद्विपरीततया अस्मदीयं पश्य। अस्माकं ब्राह्मणः पाचकः स्नानेन आत्मानं पवित्रीकृत्य साद्यन्तैः स्वच्छीकृतैः पात्रैः पाकं करोति, परं तद् सः स्थालिकायां संस्थाप्य तां रिक्तायां भूम्यां स्थापयति या च भूमिः मृत्तिकया गोमयेन च लिप्ता भवति अपि

च तस्य वस्त्रं यद्यपि तद् प्रतिदिनं क्षालितं भवति तथापि तावद् मलिनं भवति यत् तद् कदापि न क्षालितं स्यादिव दृश्यते। पुनश्च तद् कदलीपर्णं यत् कदाचित् स्थालिकायाः कार्यं निर्वहति, तद् यदि छिन्नम् अस्ति तर्हि सूपस्य आर्द्रभूम्या गोमयेन च मिश्रणं भूत्वा अद्भुता काचित् रुचिः उत्पद्यते!

सम्यक् स्नानं कृत्वा वयं मलिनदर्शनं वस्त्रं यत् तैलेन संलग्नशीलम् इव जातम् अस्ति तद् धरामः परन्तु पश्चिमे ते सम्यक् स्नानेन विना मलिने शरीरे परिपूर्णतया स्वच्छं वस्त्रं धरन्ति। अधुना एतद् विशदतया अवगन्तव्यम् - यतः अत्र पूर्वपश्चिमयोः मध्ये मूलभूतभेदस्य बिन्दुः कश्चन अस्ति यत् हिन्दोः अन्तर्मुखदृष्टिः, पाश्चात्त्यानां च बहिर्मुखदृष्टिः क्रमशः तेषां सर्वासु रीतिषु परम्परासु च अभिव्यक्ता भवति इति। हिन्दुः वस्त्राणि जीर्णवस्त्रेण आच्छाद्य स्थापयति पाश्चात्त्यः च मृत्तिकालोष्ठं स्वर्णपात्रे स्थापयति। हिन्दुः शरीरं स्वच्छं रक्षितुं स्नाति, तस्य वस्त्राणि कियन्ति अपि मलिनानि सन्ति चेदपि तस्य चिन्ता न भवति। पाश्चात्त्यः तु स्वच्छवस्त्राणां धरणे अवधानं करोति, तस्य शरीरे मालिन्यं तिष्ठति चेत् का वा चिन्ता! हिन्दुः प्रकोष्ठान्, द्वाराणि, भूम्यः, गृहस्य अन्तःस्थान् सर्वान् भागान् च व्यवस्थितान् स्वच्छान् च स्थापयति, परं तस्य गृहस्य मुख्यद्वारात् बहिः मालिन्यावकरयोः राशिः भवति चेदपि तस्य न कापि बाधा! पाश्चात्त्यः तस्य गृहस्य भूमिं प्रकाशमयवर्णयुक्तैः सुन्दरैः च भूम्यावरणैः आच्छादयितुं प्रयतते, तस्य अधः विद्यमाना मलिनता धूलिः च दृष्टिपथं न आयाता चेत् चिन्तायाः कारणं नास्ति। हिन्दुः मलिनजलकुल्याः मार्गे अनावृताः त्यजति ततः आगच्छतः दुर्गन्धस्य चिन्तां विना। पाश्चात्त्यानां मलिनजलकुल्याः भूमिगताः भवन्ति - टायफॉईडज्वरस्य उत्पादनकेन्द्रभूताः। हिन्दुः अन्तर्भागं स्वच्छीकरोति पाश्चात्त्यः च बहिर्भागम्।

आवश्यकता अस्ति स्वच्छशरीरस्य स्वच्छवस्त्राणां च। मुखक्षालनं, दन्तधावनम्, अन्यानि अपि कार्याणि करणीयानि एव–परं व्यक्तिगतरूपेण। यथा वासगृहाणि स्वच्छानि रक्षणीयानि एवं तथैव वीथयः, मुख्यमार्गाः, अन्यानि बाह्यस्थानानि चापि। पाचकेन यथा शरीरं तथैव वस्त्राणि अपि स्वच्छानि रक्षणीयानि। एतदतिरिच्य भोजनं स्वच्छेषु चषकेषु पात्रेषु च संस्थाप्य व्यवस्थिते स्वच्छे च स्थाने उपविश्य कर्तव्यम्। आचारः अर्थात् जीवने आचरणसम्बद्धानां संस्थापितनियमानां पालनम् इत्येषः धर्मस्य प्रथमसोपानः अस्ति तत्रापि शरीरमनसोः शुचिता, सर्वस्मिन् अपि शुचिता इत्येषः तस्य महत्त्वपूर्णतमः घटकः अस्ति। आचारहीनः कश्चन कदापि धर्मं प्राप्स्यति किम्? ये आचारहीनाः सन्ति तेषां दुःखानि किं तव नेत्रयोः पुरतः न विद्यन्ते? अतः तदर्थं महन्मूल्यं दत्त्वा अपि किं वयं ततः पाठं न पठेम? कॉलरा, मलेरिया, प्लेग इत्येतैः भारते स्थिरवासस्थानं निर्मितम् अस्ति अपि च लक्षशः जनान् निहत्य नयन्तः सन्ति ते। कस्य दोषः अस्ति एषः? निश्चयेन अस्माकम् एव। दुःखस्य विषयः अस्ति एषः यत् वयम् आचारहीनाः स्मः!



# पठनाय चितानां पुस्तकानां सूचिः


The Life of Swami Vivekananda (Two volumes)
by His Eastern and Western Disciples (Sixth Edition. Calcutta, 1993)

Vivekananda :A Biography
Swami Nikhilananda (Fifth Edition, Calcutta, 1987)

*The Life of Vivekananda and the Universal Gospel*
*Romain Rolland (Mayavati,Almora --- First published in 1930)*

A Comprehensive Biography of Swami Vivekananda (Two volumes)
S.N. Dhar (Madras, 1975-1976)

The Master as I Saw Him
Sister Nivedita (Fourteenth Edition, Calcutta, 1987)

Swami Vivekananda in the West (Six volumes)
Marie Louise Burke (AdvaitaAshrama, Calcutta)

Socio-Political Views of Vivekananda
Binoy K. Roy (Calcutta, 1977)

Swami Vivekananda : Patriot -- Prophet
Bhupendranath Datta (Calcutta, 1954)

World Thinkers on Ramakrishna -- Vivekananda
(Edited) Swami Lokeswarananda, (Calcutta, 1983)

Patriot-Saint Vivekananda
(Edited) Tarinisankar Chakravarty (Allahabad, 1963)

Swami Vivekananda In Indian Newspapers
(Edited) Sankariprosad Basu and Sunil B. Ghosh (Calcutta 1969)

## पठनाय चितानां पुस्तकानां सूचिः

Reminiscences of Swami Vivekananda
By His Eastern and WesternAdmirers (Calcutta 1961)
The Complete Works of Swami Vivekananda (Eight volumes)
(AdvaitaAshrama. Calcutta)
The Ramakrishna Movement
(Golpark. Calcutta. 1991)
Comprehensive Biography of Swami Vivekananda (Two volumes).

Sailendra Nath Dhar (Madras. 1975-76)
IndianAwakening and Bengal
Nemai Sadhan Bose (Third edition, Calcutta 1976)
Yuganayak Vivekananda (Three volumes)
(in Bengali) Swami Gambhirananda (Calcutta)
Vivekananda O Samakalin Bharatvarsha (Seven volumes)
(in Bengali), Sankari Prosad Basu (Calcutta)
Saswata Vivekananda
(Edited) Nemai Sadhan Bose, (In Bengali) (Calcutta, 1992)

□□□